R
S
V
L
00995
278/XXIX
995

RC

995

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 1

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५६ मन्मथ - कन्या [सं १

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

SEPTEMBER 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription **Rs. Two only.**

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाशयेरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* **D.T. Tatacharya** Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

# विषयाः ॥

1 शृङ्गारनारदीयम्।
2 वरदाभ्युदयचम्पूः।
3 मुकुन्दमाला।
4 प्राचीनम्।
5 श्रीवेङ्कटाध्वरी।
6 वैदिका विशेषाः।
7 वृद्धभाषितम्।
8 वीरलब्धं पारितोषिकम्।
9 कविः महालिङ्गशास्त्री।
10 प्रकृतिभेदः।

॥ ओम् ॥

श्री शिवाभ्यां नमः ।

# शृङ्गारनारदीयम् ॥

श्रीमन्महालिङ्गकविविरचितम् ।

---

शरदभिराममधामशशिशुभ्रशरीरधरे
कलितविपञ्चिकाक्षसरपुस्तककीरकरे ।
स्फुरितरसं तरस्वि समुदञ्चय मञ्जु वचः
प्रथनपटु प्रसीद च सरस्वति पालय माम् ॥

नान्द्यन्ते

सूत्रधारः— (दिशोऽवलोक्य पुष्पाञ्जलिं विकीर्य साञ्जलिबन्धम्)

आनन्दाब्धेरमृतकण इत्याशयादाशयिष्यन्
काव्यालापं सरसहृदयो योऽनुबध्नाति लोकम् ।
तस्मिन् हिक्काकबलितहृदः सप्रयत्नाभिशापान्
हित्वा पापान् प्रणयमहतो भावुकान् भावयामः ॥

( नेपथ्याभिमुखमवलोक्य ) सखे, परपुष्ट, इतस्तावत् । किं न शृणोति ? (विभाव्य) अहो, वार्तापत्रिकावलोकनपारवश्यं सुहृदः । तथाहि—

उत्फुल्लनयनयुग्मं विकासिगण्डं मुहुः स्फुटद्धासम् ।
अन्तर्वेगनिरोधादुद्धूताङ्गं विचेष्टते किमिदम् ॥

यत्किमप्युद्धताद्भुतहास्यरसकन्दमुदन्तजातं भवितुमर्हति, (उच्चैः) सखे, नैकः स्वादु भुञ्जीत इत्यभियुक्तोक्तिः । तदिहानय । अहमपि प्रेक्षे । सममेव हसिष्यावः ।

नेपथ्ये

उपपन्नं भोः । तर्हि क्षमस्व क्षणमात्रविलम्बम् । बाढं सममेव हसिष्यावः ।

सूत्रधारः— अहो, समासाद्य आराद्रक्तपटं प्रावृण्वानः क्लीव सविभ्रमं परिक्रामन्नुपासीदति ।

(ततः प्रविशति यथानिर्दिष्टो विदूषकः)

विदूषकः— आर्य, इयमस्मि । को नियोगोऽनुष्ठीयताम् ।

सूत्रधारः— वयस्य, किं नटी संवृत्तोऽसि ।

विदूषकः— बाढम् । तवैव गृहिणी भवामि । किं पर्याप्तिस्ते परितोषस्य ।

सूत्रधारः— वयस्य, किमिदं विपरीतम् ? परिहासेऽप्यनौचित्यमित्यभियुक्तोक्तिः ।

विदूषकः— नात्रानौचित्यम् । किं पुरुषः स्त्री न भवति । स्त्री वा पुरुषः ।

सूत्रधारः— अस्त्युपचारतः । "अर्थतः पुरुषो नारी या स्त्री साप्यर्थतः पुमान्" इत्यभियुक्तोक्तिः ।

विदूषकः— अन्यत्र, अभियुक्तानामनभियुक्तानां वा ?

सूत्रधारः— अन्यत्र, अस्मद्विधानां रङ्गस्थले स्त्रीभावः कृत्रिमः ।

विदूषकः— अकृत्रिमः स्वरूपपरिवर्तः ?

सूत्रधारः— असम्भाव्यमेतत् ।

विदूषकः— कीदृशस्ते द्रुपदापत्यं शिखण्डी ?

सूत्रधारः— तत्खलु भारतीयं पुरावृत्तम् ।

विदूषकः— एतत्किलेदानीन्तनमैरोपीयम् ।

सूत्रधारः— किं पत्रिकायामीदृशी वार्ता ?

विदूषकः— (सगर्वस्मितम्)

आसीत् काचित् कोमलाङ्गी कुमारी
यामन्वायन् कामयाना युवानः ।
यावन्नाभूत् कस्यचिद्वा कलत्रं
तावद्वेद स्वं च सा भोः पुमांसम् ॥

सूत्रधारः— यथार्थतः ?

विदूषकः–

नारी नरीभूय पुनर्मनोज्ञः
स्वैरं युवा येन पथा प्रयाति ।
तस्मिन्निदानीमबला असंख्या
मनोजवश्या जवतोऽनुयान्ति ॥

सूत्रधारः— किमीदृशमपि ? न प्रत्येमि, यदि न दर्शयसि पत्रिकाम् ।

विदूषकः— (पत्रिकामपवाहयन्)

तं सद्विचक्रं वनिता द्विचक्रैः
सयन्त्रयानं कृतयन्त्रयानाः ।
सञ्चारशीलं खलु सञ्चरन्त्यः
शर्मण्यबाला अनुविद्रवन्ति ॥

सूत्रधारः— अहो चित्रचरित्रता संसारस्य ।

विदूषकः— वयस्य, (इति साभिनयम्)
"सञ्चारशीलं खलु सञ्चरन्त्यः"

अथवा व्यत्यासेन,
सञ्चारशीलः (भवान्)
खलु सञ्चरन्तीम् (माम्)
एहि, अनुपत ॥

सूत्रधारः— वयस्य, किमिदम् । प्रस्तुतपरिक्षयकारि विनोदमात्रं सुदूरमनुबध्यते ।

विदूषकः— (साक्षेपडम्बरम्) अथ यत् प्रस्तुतं तत् श्रोतुमिच्छामि ।

सूत्रधारः—(सानुनयम्) यद्भवते रोचते । यथाकथञ्चिदद्य मार्गशीर्षाद्रायां श्रीहाटकसभानटनायकयात्राप्रसङ्गसङ्गीभूतानाम् अशेषदेशागतानां विदुषां चाक्षुषश्रावणक्रतुक्रियासम्पादनं नः परमं व्रतम् ।

विदूषकः— तेन हि मया यत्प्रस्तुतं तदेव सुदृढं प्रस्तुतम् ।

सूत्रधारः— कथमिव ?

विदूषकः— अस्ति किल मे मित्रं श्रीमहालिङ्गकविः ।

यस्याभिजात्यं हि कुलेऽप्ययाख्य-
मखीश्वराणां प्रभवेण सिद्धम् ।
वाचां च तत्तेन तथैव, किं च
पचेलिमस्वान्तरसावसेकः ॥

सूत्रधारः— अत्रैव किल वर्तते । शीलित एव स प्रज्ञावैशद्यशाली प्रतिराजसूयाद्यनेकरूपकप्रणेता । भवत्विदानीं व्युत्पद्ये । तेन कृतमीदृशविचित्रवस्तुप्रस्तावं रूपकमभिनीयते इति ।

विदूषकः—बाढम् । तच्च शृङ्गारनारदीयम् नाम प्रहसनमचिरनिर्मितम् ।

सूत्रधारः— तेन हि मा चिरम् ।

(नेपथ्ये गीयते)

श्रीनारद नादसरोरुहभृङ्गशुभाङ्ग भेशनिभ ।
वेदोद्भवनिजवीणावादनतत्वज्ञ विजयस्व ॥

सूत्रधारः— कथमुपक्रान्तं कुशीलवैः ।

विदूषकः— अथ किम् । पश्य भो वयस्य, सङ्गीतकोलाहले पदच्छेदपरिपाटीम्— श्रीना - रदना - दसरो - रुहभृङ् - गशुभाङ् - ग

सूत्रधारः— (विहस्य) भवतु परिहासः । कस्यात्र प्रथमः प्रवेशः ।

विदूषकः—वयस्य, किं न पश्यसि, एष गन्धर्वः—

अकाण्डे प्रतीपां प्रियां विद्रवन्तीं
पुरः पर्वतस्योच्चकैः सानुषु द्राक् ।
अनुप्रस्थितोऽयं युवा मञ्जुलाङ्ग-
प्रभश्चारुवेषश्चटूक्त्याऽनुरुन्धे ॥

तदावामन्यतोऽपसरावः ।

सूत्रधारः— बाढम् ।

(निष्क्रान्तौ)

प्रस्तावना

पुरतो ववृते परितश्चक्रमे बभ्रमे गातुमारेभे परिरेभे जिघ्रे दध्रे पस्पृशे चुक्रुशे रेमे पुनःपुनर्ननेमे वव इतश्चेरे सहर्षं पुप्लुवे दुद्रुवे तुष्टुवे चैवम् ।

जितं ते मुरारे चिदानन्दमूर्ते जितं ते विधूतप्रपन्नाखिलार्ते ।
जितं ते पयस्सागरस्मेरकीर्ते जितं ते तमालस्फुरद्दीप्तिपूर्ते ॥ ४६ ॥

इदानीं भाग्यं नः परिणतमिदानीं सुदिवसं
ग्रहास्सर्वेऽप्ये[2]कादशपदमिदानीमुपगताः ।
निदानीभूतस्त्वं निखिलभुवनानन्दजनने
यदानीतोऽस्येवं वरद पदमक्ष्णोरिह मया ॥ ४७ ॥

क्षमस्तेवलोकान्निरस्तो मदीयस्समस्तेजसा ते रमेश व्युदस्तम् ।
समस्ते न कश्चित्समस्ति क्व तुङ्गो[3] नमस्ते समस्तेश मस्तेन कुर्याम् ॥ ४८ ॥

वशयति हृदयं मे वर्षति श्रीश हर्षं
जनयति परिशुद्धिं जायते मङ्गलाय ।
दमयति परितापं देव निर्हन्ति पापं
दरमपि विधुनीते दर्शनं तावकीनम् ॥ ४९ ॥

आलिङ्गानि तवाहमङ्गमथवा चुम्बानि पादाम्बुजं
व्याजिघ्राणि मुखारविन्दमपि वा गृह्णानि हस्ताम्बुजम् ।
यद्वा चामरमुद्वहानि पुरतो नृत्यानि गायानि वा
पूजामारचयानि वा वरद ते भूयो नमस्यानि वा ॥ ५० ॥

पादाम्भोरुहरेणुरूपिततया नाभीसरस्यादरात्
स्नात्वा वक्ष उपेत्य तद्गतजगन्मात्रा चिरं लालितम् ।
संलीयाथ मुखे वपासुरभिले संपाद्य सद्वासनां
नृत्तं प्रारभते गजाचलपते चित्तं किरीटे तव ॥ ५१ ॥

---

1 हे मुरारे तव जितं जयः अस्त्विति शेषः । (नपुंसके भावे क्तः)

2 आदित्यादीनां ग्रहाणां एकादशे स्थाने स्थितिः भाग्याय कल्पत इति ज्योतिर्विदां समयः ।

3 हे समस्तेश ! ते नमः मस्तेन- शिरसा कुर्यामित्यन्वयः ।

[1]रजोविदूरे बत [2]नित्यसूर्यालोकप्रकर्षाविरतप्रसादे ।
आलम्बतां दृष्टिरसावजस्रं लोलम्बतां त्वद्वदनारविन्दे ॥ ५२ ॥

लावण्यभूपालकराजधानीं मनस्तुरङ्गस्य ममापिधानीं ।
मूर्तिं तवो[3]दन्वदपत्यजाने मोहानलप्रावृषमेव जाने ॥ ५३ ॥

राजीवोन्नतिलोपने तव पदे रक्षासुदक्षामिमान्
बाहून् राहुमदापहारचतुरान् बाहान्तरं सेन्दिरम् ।
ओष्ठं लीढवपारसं सरसिजच्छायाजुषी चक्षुषी
वन्दे सुन्दर सिन्धुराचलपते वक्त्रं च मित्रं विधोः ॥ ५४ ॥

[4]सिन्धुरावनिधराधिनाथ ते सिन्धुराजतनयोज्वला तनुः ।
बन्धुराङ्कुततटिद्घनच्छटाबन्धुराशयमुपैति मामकम् ॥ ५५ ॥

भ्रमो वा स्वप्नो वा परिणतिमती भक्तिरथवा
स्पृहाणां स्रोतो वा स्मरणपरिणामोऽयमथवा ।
न साक्षात्कारस्ते नरकमथनैवं मम भवेत्
क मन्दानंदोहं क वरद भवद्दर्शनसुखम् ॥ ५६ ॥

निदिध्यासन्ति त्वां नियमितहृषीकाश्शमधनाः
तरीतुं संसारं कतिचन तपस्साहससहाः ।
निरस्तान्योपाया नियतमनुतिष्ठन्ति कतिचित्
[5]प्रपत्तिं पञ्चाङ्गां प्रकृतिपुरुषेशस्थितिविदः ॥ ५७ ॥

---

1 रजोविदूरे - पुष्पपरागविदूरे । रजोगुणरहिते इति परमार्थः ।
2 नित्य–सूर्यालोकप्रकर्षेण, अविरतप्रसादे - अविच्छिन्नविकासे । नित्यसूरीणां आलोकप्रकर्षेण ।
3 उदन्वदपत्यं महालक्ष्मीः, सा जाया यस्य सः उदन्वदपत्यजानिः तस्य सम्बुद्धिः ।
4 सिन्धुरावनिधरः– हस्तिगिरिः । सिन्धुराजतनया समुद्रकन्या महालक्ष्मीः, तया उज्ज्वला– प्रकाशमाना । अत एव बन्धुरा– सान्द्रा, अङ्कुता, तटित्– विद्युत् यस्यां सा, तादृशघनच्छटायाः - मेघसमूहस्य बन्धुः- सदृशी, ते तनुः मामकं आशयमुपैति ।
5 पञ्चाङ्गां प्रपत्तिम्— आनुकूल्यसङ्कल्प-प्रातिकूल्यवर्जन-महाविश्वास-गोप्तृत्ववरण- कार्पण्यरूपपञ्चाङ्गयुक्तां शरणागतिम् ।

[1]यद्भातः परितो हरित्सु भगवन्नेकान्ततस्स्पन्दते
यस्मिन्द्रावरुणाशयोस्समुदितौ वीतश्च चन्द्रारुणौ ।
यद्भावाष्षडपि प्रयान्ति विकृतीर्यश्च प्रतीचां गण-
स्तत्तत्पिण्डसमन्वयं व्रजति तत्सर्वं तवैवेच्छया ॥ ५८ ॥

[2]विश्वस्थित्युदयभिदाविधायकत्वा-
द्विद्वद्भ्यो निरवधिसौख्यदायकत्वात् ।
ब्रह्म त्वां वरद परं ब्रवीमि सत्यं
नालीकोदित इति नाम हि श्रुतं मे ॥ ५९ ॥

[3]स नामरूपाण्यखिलान्यपि स्वयं पुरा भवान् व्याकृतवानिति श्रुतम् ।
कथं प्रकृत्यन्वयमेव लुम्पता विधीयते प्रत्ययसंहतिस्त्वया ॥ ६० ॥

---

1 'भीषास्माद्वातः पवते' इत्यादिश्रुत्यर्थोऽत्र विवृतः । 'समुदितः' इति समुद्भ्यां उपसर्गाभ्यां परात् इण् गतावित्यस्मात् लटि प्रथमपुरुषद्विवचनम् । उत्पद्येते इत्यर्थः । इन्द्रावरुणाशयोः - पूर्वापरदिशोः । एवं 'वीतः' इत्यपि विपूर्वकेण्धातोर्लटि प्रथमपुरुषद्विवचनान्तम् । लीयेते इत्यर्थः । भावाः पदार्थाः । षट् विकृतीः - षट् विकारान् जायते, वर्धते, परिणमते, अपक्षीयते, नश्यतीत्युच्यमानान् प्रयान्ति । प्रतीचां गणः जीवानां गणः । तत्तत्पिण्डः तत्तद्देहः ।

2 हे वरद ! जगत्सृष्टिस्थितिलयकारित्वात् (जगत्कारणत्वात् ।) विद्वद्भ्यः उपासकेभ्यः, प्रपन्नेभ्यश्च निरवधिसौख्यदायकत्वात् मोक्षप्रदत्वा त्त्वां परं ब्रह्म ब्रवीमि । एतद्वचनं सत्यम् । 'हि' यस्मात् मे नालीकोदित इति नाम श्रुतम् । न अलीकं मिथ्या भवतीति नालीकं सत्यं उदितं वचनं यस्य सः सत्यवाक्य इत्यर्थः । नालीकात कमलात् उदितः उत्पन्नः इति तु परमार्थः ।

3 स भवान्, अखिलान्यपि सर्वाण्यपि, नाम्नां - नामपदानां रूपाणि स्वरूपाणि, पुरा, स्वयं व्याकृतवान् प्रकृतिप्रत्ययबोधनेन विविच्य निष्पादितवान् इति श्रुतम् । प्रत्ययोत्पत्तेः अवधिः अपादानं प्रकृतिः । तस्याः अन्वयं- सम्बन्धमेव, लुम्पता- नाशयता त्वया, प्रत्ययानां प्रकृत्युत्तरं जायमानानां, संहतिः संयोजनं

[1]भवन्तमन्तस्थितमस्फुटं हरे तमोभिदश्चोरमिवेश गृह्णते ।
तथापि तेषां त्वमनन्त पश्यतां चिरार्जितानर्थचयान् हरस्यहो ॥ ६१ ॥

[2]उपास्यते दक्षिणमीक्षणं भवानपि स्वकीयं परकीयमावसन् ।
इति श्रुतिस्सम्प्रति तु त्वयि स्थितिं भजन्त्यहो प्रत्युत लोचनानि नः ॥

[3]वलक्षया सत्तरवारिधारया स्थितं पदे श्यामलया करे च ते ।
सुरस्य पूर्वा क्रतुनाशिनश्शिरस्यपप्तदन्या त्वसुरस्य तादृशः ॥ ६३ ॥

---

कथं विधीयते क्रियते इति असङ्गतमित्याक्षेपः । अखिलान्यपि, नामरूपाभ्यां सहितानि सनामरूपाणि, व्याकृतवान् निर्मितवान् । प्रकृतेः त्रिगुणात्मकमूलप्रकृतेः प्रधानस्य अन्वयं– सम्बन्धं लुम्पतेत्यनेन स्वाश्रितानां जन्मजरामरणादिकं नाशयति मोक्षं ददाति इत्यर्थबोधनात् परिहारः ।

1 हे ईश हरे ! रात्रौ गृहान्तः प्रविष्टं चोरं तमोभिदः– दीपादि प्रकाशनेनान्धकारनिवर्तका जना इव, हृदयान्तःप्रविश्य स्थितं अस्फुटं– गूढं, त्वां, तमोभिदः– अज्ञानान्धकारनिवर्तकाः ज्ञानिनः गृह्णते । तथापि त्वां चोरवत् पश्यतां तेषां, चिरकालार्जितान् अर्थानां द्रव्याणां,सञ्चयान् समूहान्, हरसि, अहो आश्चर्यं पश्यतोहरस्त्वमिति । चिरार्जिताः ये अनर्थाः - कर्माविद्यादयः, तत्समूहान् हरसीति वास्तवार्थः ।

2 हे वरद ! भवान्, स्वकीयं दक्षिणमीक्षणं सूर्यमित्यर्थः । चन्द्रसूर्ययोः भगवन्नेत्रत्वप्रसिद्धेः । परकीयमपि दक्षिणमीक्षणं अक्षिविद्योपासकस्य दक्षिणं नेत्रमपीत्यर्थः । 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्यादि श्रुत्या दक्षिणाक्षिस्थभगवदुपासनविधानात् । आवसन्, तत्र वसन् उपास्यते सूर्यमण्डले अक्षिणि च भवान् उपास्यते इति भावः । इति श्रुतिः अस्ति । सम्प्रति तु, प्रत्युत– वैपरीत्येन, नः अस्माकं लोचनानि त्वयि स्थितिं भजन्तीत्यहो आश्चर्यम् ।

3 वलक्षया - शुभ्रया, सत्तरया-श्रेष्ठया, वारिधारया- गङ्गाप्रवाहेण, ते पदे, श्यामलया-नीलया, सतः, तरवारेः- खङ्गस्य- धारया- तीक्ष्णाग्रभागेन च ते करे, स्थितम् । पूर्वा प्रथमनिर्दिष्टा गङ्गाधारा क्रतुनाशिनः दक्षाध्वरध्वंसिनः, सुरस्य शिवस्य, मूर्ध्नि अपप्तत् पपात । अन्या तु खड्गधारा तु तादृशः - क्रतुनाशकस्य असुरस्य दैत्यस्य शिरस्यपप्तत् ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २९] कलि ५०५६ मन्मथ - कन्या साधारण [सं १


## मुकुन्दमाला ॥

—०—

महाराजः कुलशेखरः आसनबन्धं कृत्वा भगवद्ध्यानयोगे प्रवृत्तः मनसो नैर्मल्यात् सत्त्वगुणप्राचुर्याच्च निरन्तरोदितेन निरतिशयप्रियेण भगवच्चिन्तासन्तानेन परमां रतिं लभमानः प्रायः सर्वं कालं एवंविधेन योगेनैव निनाय । प्राज्ञाः समर्थाः महाराजे अत्यन्तं भक्तिमन्तश्च मन्त्रिणः राज्यकार्याणि सर्वाणि निपुणं यथावदवेक्षमाणाः तदीयस्य योगस्य अन्तरायो यथा न भवेत् तथा जागरूका अभवन् ।

कदाचित् योगादुत्थाय दर्शनं दत्तवन्तं महाराजमुपसृत्य मन्त्रिणोऽन्ये च महान्तः योगदशायां तस्य यद् भवति तत् जिज्ञासमानाः तदनुरूपं प्रश्नमकुर्वन् । महता हर्षेण स्वयोगस्वरूपं वर्णयन् महाराजः तान् प्रत्युवाच—

चिन्तयामि हरिमेव सन्ततं
मन्दमन्दहसिताननाम्बुजम् ।
नन्दगोपतनयं परात्परं
नारदादिमुनिबृन्दवन्दितम् ॥ १ ॥

चिन्तयामि । तदानीं मे चिन्ता भवति । चिन्ता स्मृतिः । सा च सन्ततं भवति । अविच्छेन अनुवृत्ता भवति । इदं निरन्तरचिन्तनमेव योगो नाम ।

हरिमेव । किंविषयं चिन्तनम् ? हरिविषयमेव । स हि परमं दैवतम् । स हि सर्वस्य मम च अन्तरात्मा । स हि आर्तत्राणपरायणः अभयप्रदः । स हि मे सर्वम् ।

उपविश्य आसनं बध्वा इन्द्रियाणि प्रत्याहृत्य मनः भगवति निवेशयामि । आः ! सद्यः किं भवति ! अपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्यमहोदधिः सः दरविवृतेन आलक्ष्यदन्तावलिद्वयेन अधरबिम्बसम्पृक्तमन्दस्मितसुभगेन आननाम्बुजेन अग्रत आविर्भूय दिव्यदर्शनं मे ददाति ।

किं तद् रूपं, येन स आविर्भवति ? नन्दगोपतनयम् । साक्षात् कृष्णरूपम् । परात्परम् । न च कस्यचित् पुत्रभावं प्राप्नुवतो भगवतः तेन काचन हानिर्भवति । स हि

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवत्यात्ममायया ॥

ते हि मूढाः, ये मानुषीं तनुमाश्रितं तमवजानन्ति ।

न च तस्य परात् चतुर्मुखादेरपि परत्वे मनागपि संशयस्यावकाशोऽस्ति ; यतः स केवलं स्वात्मानं न दर्शयति, अपि तु

नारदादिमुनिबृन्दवन्दितम् । नारदप्रभृतयो देवर्षयः प्रणम्य साञ्जलिबन्धं 'देवदेव, परात्पर, ब्रह्मेश्वरेन्द्राद्यर्चित, श्रीमन्नारायण, वासुदेव,' इति स्तुवन्तः तत्स्वरूपयाथात्म्यमवगमयन्ति ।

एवं इतरदुर्लभः सर्वविलक्षणो भगवदनुभवो मे योगदशायां भवतीति महाराजः कुलशेखरः स्वकीयेभ्य उवाच ।

---

# प्राचीनम् ॥

"प्राचीनं सर्वं साधु । अर्वाचीनं सर्वमसाधु ।" इति किल पूर्वं बहूनां अभिनिवेश आसीत् । स्वसमानकालिकेषु प्रायः सर्वेषां गौरवं न भवति । तेन प्राचीनसम्प्रदायविरुद्धं यदि केचित् अभिनवं किञ्चित् कुर्वन्ति, तत्र जनानामवज्ञा, प्राचीने बहुमतिश्च भवत इति सहजसिद्धमेतत् । परन्तु विषयविवेकमकृत्वा 'प्राचीनं प्राचीनत्वादेव साधु, अर्वाचीनं अर्वाचीनत्वादेव असाधु' इत्याग्रहो यदि प्रदर्श्यते तत् अभिज्ञेभ्यो न रोचते । अतः

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥

तदात्वे नूतनं सर्वमायत्यां च पुरातनम् ।
न दोषायैतदुभयं न गुणाय च कल्पते ॥

इति तस्मिन् विषये प्रतिबोधनं कुर्वन्ति । अद्य पुनः विपरीत आग्रहः सार्वत्रिको दृश्यते । प्राचीने सर्वस्मिन् विषये प्रबलो द्वेषो दृश्यते, नवीने च अभिषङ्गः ।

नवीनमित्येव न साधु सर्वं
पूराणमित्येव न चाप्यवद्यम् ।

इति विपर्यस्तं प्रतिबोधनं प्राप्तावसरं भाति । पर्यालोचनं विवेचनं च विना चिरानुसृतपाश्चात्यप्रक्रियासमाहितसुदृढवासनाविशेषपरवशीभूतया स्वबुद्ध्या केवलया हि अद्यत्वे उत्थितान् प्रश्नान् सर्वान् निर्धारयन्ति ; न तु चिन्तयन्त्यपि—किं पूर्वस्मिन् काले इमे प्रश्ना उत्थिता उत न? उत्थिताश्चेत् तत्र पूर्वे जनाः कं परिहारमवालम्बन्त ? नोत्थिताश्चेत् कुतो नोत्थिताः ? एषु विषयेषु प्राचीना ग्रन्थाः किं किमपि कथयन्ति ? तथा चेत् किं तत् ; इति । प्राचीनं सर्वमसारम् । अस्य कालस्य यदुपयुक्तम्, तादृशं तत्र न किञ्चिदस्तीति एषां दृढो ग्रहः । अभिज्ञैः अयमेषां भ्रान्तिग्रन्थिर्भेदनीयः ।

लोकयात्रा यथा सर्वसौख्यावहा प्रवर्तेत तथा जनानां विशदां विपुलां व्युत्पत्तिमाधातुमेव हि इतिहासपुराणधर्मशास्त्रग्रन्थाः सर्वे समुत्पन्नाः । तान् अत्यन्तमुपेक्ष्य स्वोत्प्रेक्षया इतरानुकारेण च उच्चावचसङ्कटपरिहाराणां योगक्षेमस्य च मार्गं निश्चेतुं प्रवर्तमाना भारतीयाः वस्तुतः किं न शोच्याः । सिद्धमन्नं परित्यज्य हि एते भिक्षामटन्ति ।

विरक्तान्वेषणीयो मोक्षः । सर्वसाधारण्येन चिन्तायां क्रियमाणायां धर्मोऽर्थः काम इत्ययं त्रिवर्गः प्रधानं भवति । अद्यतने राज्यतन्त्रे धर्मशब्दोऽपि न स्मर्यते । कामः प्रतिव्यक्तिविश्रान्त उच्छृङ्खलः प्रसरति । अवशिष्टस्तु अर्थ एकः राज्यशासने स्थितानामतिप्रधानीभवन् सर्वां

चिन्तामाक्रामति । प्रजाहितैकप्रावण्यमात्मनः ख्यापयन्तः समये प्राप्ते स्वयं राज्याधिकारमाच्छिद्य ग्रहीतुमुत्सुका अन्ये च एवमेव अर्थैकपरा भवन्ति ।

एते सर्वे दरिद्रो धनिक इति भेदमेव लोके लोप्तुमिच्छन्ति । अभिप्रायस्य उद्यमस्य च मन्दतीव्रभावभेदेन 'समस्ववादः' 'साधारणस्ववादः' इति अस्मिन् विषये मतभेद उत्पन्नः । तत्र इदानीं शासने स्थिताः समस्विनः । इदं लक्ष्यं साधयितुं तीव्रमुद्युञ्जाना इमे जनसमूहे सर्वप्रकारं साम्यं सम्पादनीयमातिष्ठन्ते । क्षेत्रिभ्यः क्षेत्राणि अपहृत्य इतरेभ्यो विनियोक्तुं समुचितं शासनं सज्जीकुर्वन्ति । अस्मिन् विषये एकतः स्थिते, महति अधिकारे स्थिताः जातिभेदविध्वंसनमवश्यकर्तव्यं अविरतं घोषयन्तो वर्तन्ते ।

संक्षिप्य कथने अस्य अस्मदीयस्य भारतदेशस्य, अविज्ञातादेः कालात् नागरिकतायाः परमां काष्ठामधिरूढस्य सर्वो महिमा यन्मूलः तत् सर्वमद्य अत्यन्तप्रतिकूलमिति अत एव सर्वथा परिहर्तव्यमिति मन्यन्ते, एतदनुरूपं प्रवचनं कुर्वन्ति, आचरन्ति चेति वक्तव्यं भवति । अथात्र प्रतिविधानं प्रति यदि चिन्ता क्रियते तदत्यन्तं शोकास्पदं भवति । शास्त्राधिकारिणः प्राज्ञा विरलाः । तेऽपि लोकयात्रानिर्वाहक्लिष्टाः निरुत्साहा निरादराः । लोकमार्गे उन्नते पदे स्थिताः कतिपये विषयविदोऽपि गम्भीरस्वभावत्वात् दाक्षिण्याच्च ऊर्जितं किमपि वक्तुं नेच्छन्ति । अबोधोपहता अन्ये निश्चिन्ताः स्वस्वकार्यैकारिणो भवन्ति । इतरे 'यथा राजा तथा प्रजाः' इति न्यायमनुसरन्तो वर्तन्ते । बत नैराश्यदा दुर्दशा ।

---

# श्रीवेंकटाध्वरी ॥

श्री इळङ्गाडु अरशाणिपालै निगमान्ताचार्यस्वामिनां मुखात् विश्वगुणादर्शादिबहुग्रन्थप्रणयनप्रसिद्धस्य श्रीवेङ्कटाध्वरिणः अवतारनिर्याणवत्सरज्ञापकौ इमौ द्वौ श्लोकौ श्रुतौ—

श्रीशालिवाहनशकाभिधवत्सराणां
यातेषु षोडशशतेषु ततः परस्तात् ।
अष्टादशस्वपि च निर्गलितेषु वर्षे-
ष्वेकोनविंशतितमं विदुरीश्वराब्दम् ॥

विश्वावसौ वत्सर एव भेजे
विष्णोः पदं वेङ्कटदेशिकेन्द्रः ।
इतः परं स्यां यदि भूतलेऽस्मिन्
पराभवो हन्त भविष्यतीति ॥

इतः, आङ्गलगणनया १६९७ तमे ईश्वरवत्सरे जातः ७८ वर्षाणि जीवित्वा १७७५ तमे विश्वावसुवत्सरे कविः स कीर्तिशेषो बभूवेति ज्ञायते ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

## प्रजापतिर्यज्ञानित्याद्यनुवाकार्थः ।

कृष्णयजुस्संहितायाः प्रथमकाण्डे षष्ठप्रपाठके 'प्रजापतिर्यज्ञान्' इत्यादिर्नवमोऽनुवाको विद्यते । अयं माधवीये भाष्ये 'अष्टमे यज्ञायुधसम्भृतिरुक्ता । नवमे द्वादशद्वन्द्वसम्पत्तिरुच्यते ।' इत्यवतार्य व्याख्यायत । तदभिप्रायः प्रकाश्यते— प्रजापतिः अग्निहोत्रं अग्निष्टोमञ्च, पौर्णमासी उक्थ्यञ्च, अमावास्या अतिरात्रञ्चेत्युभयविधान् यज्ञानसृजत् । अत्र अग्निहोत्रपौर्णमास्यमावास्यायागा अल्पैर्द्रव्यमन्त्रक्रियाविशेषैस्साध्या अत एवाल्पफलाः । अग्निष्टोमोक्थ्यातिरात्रयागा बहुभिर्द्रव्यमन्त्रक्रियाविशेषैस्साध्या अत एवाधिकफलाः । स इमान् सृष्ट्वा कनिष्ठपुत्रे पितेव कनीयस्स्वग्निहोत्रादिष्वनुग्रहेण तुलया त्रीण्येतानि द्वन्द्वान्युदमिमीत । तदनुग्रहात्, अग्निहोत्राग्निष्टोमौ पौर्णमास्युक्थ्यौ अमावास्यातिरात्रौ च मिथस्समौ समपद्येताम् । यः अग्निष्टोमेन अग्निहोत्रस्य साम्यं विद्वान् अग्निहोत्रं जुहोति स यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति । य उक्थ्येन पौर्णमास्यास्सादृश्यं विदन् पौर्णमासीं यजते स यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति । योऽतिरात्रेण अमावास्यायास्तुल्यत्वं जानन् अमावास्यां यजते स यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति । अत्र 'य एवं विद्वानग्निहोत्रञ्जुहोति ... ... यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति' इति वाक्ये अनुष्ठाता फलाधिक्याय अग्निहोत्रादीनां अग्निष्टोमादिसाम्यं भावयेत् इति विधिरुन्नीयते । 'प्रजापतिर्यज्ञानसृजत .... .... तावानतिरात्रः' इति वेदभागः पूर्वोक्तसाम्यभावनाविध्युन्नयनार्थोऽर्थवादो भवति । अग्निहोत्रादीनामल्पफलानामधिकफलाग्निष्टोमादिसाम्यभावनया अग्निष्टो-

मादिफलसमानफलकत्वं भवत्येव। लोके, राज्ञा ग्रामेषु प्रेरिते राजमुद्राधारिणि नीचे कस्मिंश्चिद्भृत्ये राजसाम्यं भावयन्तीनां प्रजानां भृत्यचित्तप्रसादेन प्रसादाधिक्यमुपलभामहे । इह भाष्ये "यद्यपि पूर्वमीमांसायां द्वितीयाध्याये 'य एवं विद्वान् पौर्णमासीं यजते' इत्यस्य विद्वद्वाक्यस्य विधायकत्वं निराकृत्यानुवादकत्वमुक्तम । तथापि कर्मविधेरेव तत्र निराकरणात् 1 सम्पद्विध्युन्नीतौ न कोऽपि विरोधः। भावनाविधिपरत्वे वाक्यमेतत्कर्मप्रकरणादुत्कृष्यत इति चेत् उत्कृष्यताम्नाम । अग्निचयनप्रकरणपठितानां मनश्चिदाद्युपास्तीनां प्रकरणोत्कर्षस्य व्यासेनैव 2 निर्णीतत्वात्। अन्यपरस्य अन्यार्थत्वात् दर्शपूर्णमासौ प्रशंसितुमत्र पाठोऽस्तु" इत्यभाष्यत । 'परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् ... ... काष्ठाङ्गच्छति' इति श्रुतिः पुनरपि दर्शपूर्णमासावेवं प्रशंसति—'सत्यलोकस्थस्य पूर्वस्मिन्कल्पे यजमानत्वेनावस्थितस्य चतुर्मुखस्यैष दर्शपूर्णमासयज्ञः प्रावर्तत । कृष्णार्पणबुद्ध्यानुष्ठितेन तेन यज्ञेन स यजमानः इदं परमेष्ठित्वपदं प्राप्नोत् । स वेधास्तेनोत्तमफलहेतुदर्शपूर्णमासाध्वरस्योपदेशेन दक्षादिप्रजापतिं पूर्वस्मिन्जन्मनि तस्यानुष्ठानाय प्रेरयामास। दक्षादिप्रजापतिस्तस्मिन्जन्मनि यजमानो भूत्वा तमनुष्ठायानुष्ठितेन तेनाध्वरेणोत्तरजन्मनि दक्षादित्वमविन्दत्। स चतुर्मुखस्तेन तथाविधस्य तस्य यागस्योपदेशेन इन्द्रं प्राचीने जनने तस्याचरणाय प्रैरयत । इन्द्रस्तस्मिन्जनने यजमानस्सन् तमाचर्याचरितेन तेन यागेनानन्तरजनने इन्द्रपदमलभत । स ब्रह्मा तेन तादृग्विधस्य तस्य क्रतोरुपदेशेनाग्नीषोमौ प्राक्तने जनुषि तस्याहरणायाचोदयत । अग्नीषोमौ तस्मिन्जनुषि यष्टारौ भूत्वा तमाहृत्याहृतेन तेन क्रतुना पाश्चात्यजनुषि अग्नीषोमपदमगच्छताम। 'य एवं विद्वान् दर्शपूर्णमासौ यजते स परमामेव काष्ठाङ्गच्छति।' इति। अत एव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, इति दर्शपूर्णमासयोस्स्वर्गकामार्थत्वमाम्नायत। मीमांसकैस्तद्व्यचार्यत च। 'यो वै प्रजातेन ... सम्पाद्यानीत्याहुः' इति वेदभागो द्वन्द्वसम्पादनं विधातुमित्थं प्रस्तौति— योऽत्यन्तविस्तृतेन यज्ञेन यजते स प्रजया पशुभिर्मिथुनैश्चात्यन्तविस्तृतो भवति। द्वादश मासाः संवत्सरः, द्वादश द्वन्द्वानि, तानि दर्शपूर्णमासयोस्सम्पाद्यानीत्याहुः । यथा संवत्सरस्य द्वादशमासोपेतत्वादत्यन्तं विस्तारः तथा दर्शपूर्णमासमखस्य द्वादशद्वन्द्वोपेतत्वादत्यन्तविस्तृतत्वमिति ।

---

1 अग्निष्टोमादिसाम्यभावनाविध्युन्नीतौ। 2 अनुबन्धादिभ्य प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तमिति ब्रह्मसूत्र इति शेषः।

'वत्सं च ... ... आसादयत्याज्यं च' इति वेदभागो द्वन्द्वान्येवं विधत्ते— मन्त्रैर्वत्सस्य मोचनं गार्हपत्ये उखायास्स्थापनं, व्रीहीणामवहननं, पाषाणेन, 1 शम्यया वा पेषणदृषदुपलयोस्समाहननं, दृषदि तण्डुलानामधिवपनम्, अग्नौ कपालानामुपधानं, तेषु कपालेषु पुरोडाशस्य आहवनीये आज्यस्य चाधिश्रयणं, चिकीर्षितवेदिस्थाने 2 स्तम्बयजुषो हरणं, उत्करे प्रक्षिप्तानां सतृणानां पांसूनामभिग्रहणं, वेद्याः परिग्रहणं, योक्त्रेण पत्न्यास्सन्नहनं, 3 स्फ्यनिष्पादितायां रेखायां प्रोक्षणीनामासादनं, रेखायामाज्यस्य सादनं च कुर्यात्। इति।

'एतानि वै ... ... मिथुनैर्जायते' इति वेदभागो विहितानि द्वन्द्वानि प्रशस्येत्थमुपसंहरति— एतान्येव द्वादशद्वन्द्वानि। यो दर्शपूर्णमासयोस्तान्येवं सम्पाद्य यजते सोऽत्यन्तविस्तृतेनैव दर्शपूर्णमासयज्ञेन यजते। प्रजया पशुभिर्मिथुनैश्चात्यन्तविस्तृतो भवति। इति। अत्र भाष्ये 'यद्यप्युक्तानां वत्सविमोकादीनां चतुर्दशत्वात्सप्तैवैतानि द्वन्द्वानि तथापि चकारैः पूर्वानुवाकोक्तेषु दशसु यज्ञायुधेषु समुच्चितेषु द्वादश सम्पद्यन्ते' इत्यभाष्यत। आग्नेयाग्नीषोमीयोपांशुयाजानां तत्तद्वाक्यावगतपौर्णमासीकालसम्बन्धं निमित्तीकृत्य 'य एवं विद्वान् पौर्णमासीं यजते, इत्यन्त्ये विद्वद्वाक्ये पौर्णमासीपदेनैकवचनान्तेन समुदायरूपेणानुवादः। सान्नाय्याग्नेयानां तत्तद्वाक्यावगतामावास्याकालसम्बन्धं निमित्तीकृत्य 'य एवं विद्वानमावास्यां यजते' इत्यन्त्ये विद्वद्वाक्ये अमावास्यामिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः। तस्य प्रयोजनन्तु अत्रत्ययोर्दर्शपूर्णमासौ दर्शपूर्णमासयोरिति पदयोः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादौ च द्विवचनोपपत्तिरिति मीमांसकाः।

पूर्वानुवाके 'स्फ्यश्च 4 कपालानि चाग्नि5 होत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि' इति विद्यते।

---

1 शम्या— बाहुमात्रो गदाकृतिः काष्ठविशेषः।

2 स्तम्बयजुः — यजुर्मन्त्रको दर्भः।

3 स्फ्यो नाम बाहुमात्रः खड्गाकारः काष्ठविशेषः।

4 कपालानि भग्ननूतनमृद्भाण्डलेशानि।

5 अग्निहोत्रहवणी— वैकङ्कती बाहुमात्री अरत्निमात्री वा प्रसृताकृतिः।

# वृद्धभाषितम् ॥ (15)

—:o:—

आचार्यः— वेदवैभवं प्रति यदहं वदन्नस्मि, मन्ये तत्सर्वं सुगृहीतं भवद्भिः ।

केशवार्यः— कः संशयः । आचार्यपादैः अनाकुलं अतिविशदं उपपादने क्रियमाणे विषयाणां ग्रहणे कस्य क्लेशो भविष्यति ?

आचार्यः— न तथा केशवार्य । भवादृशानां अयं विषयः परिचितः । तेन तं प्रति उच्यमानं सर्वं सहसा बुद्धिलग्नं भवेत् । अनयोः रामकृष्णयोस्तु अभिनवमिदं सर्वम् । तौ कथं गृहीतः, किं मन्येते इति ज्ञातव्यम् ।

रामकृष्णौ— सत्य इदम्प्रथमं इदं सर्वं आवां शृणुवः । चिरं सम्यङ्मननेन बुद्धौ धारणीयम् । एवमेतदिति सम्प्रतिपत्तिरधिगन्तव्या । अचञ्चलमवधारणं च । अत्र तु यद्भगवन्त उपदिशन्ति तद् विशदं गृहीत एव । तथा सरलं, तथा स्फुटं च किल भगवन्त उपदिशन्ति ।

आचार्यः— साधु । एवमेतत् । प्रवचनसमये यद्गुरुणा उच्यते तत् तदानीं सावधानं यथावद्ग्रहीतव्यम् । पश्चात् तत् मननेन प्रत्यवेक्ष्य विभज्य विशोध्य निष्कृष्टं बुद्धौ धारणीयम् । तथा युवाभ्यां क्रियत इति द्रक्ष्यामि ।

अथ वेदवैभवं प्रति वक्तव्यमल्पमवशिष्टमस्ति । तदिदानीं ब्रवीमि । श्रूयताम् ।

आनन्दमयं परमात्मानं विविच्य प्रदर्शयन्ती उपनिषत् ततः पूर्वं अर्वाचीनान् चतुर आत्मनो दर्शयति— अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमय इति । एषु अन्नमयः अस्मच्छरीरमेव । अत्र मनोमयस्य स्वरूपं एवं प्रतिपाद्यते— तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा—

इति । मनःस्वरूपं कृत्स्नं वेदमयमुपदिश्यत इति स्पष्टमेतत् । अत्र अभिप्रायः अन्तरवगाह्य उपलब्धव्यः । मनुष्याणामन्तःकरणं मनः समीचीनसंस्कारवत्त्वे शोभने मार्गे प्रवर्तेत, अन्यथा मार्गान्तरे । अत एव स्मरन्ति—

मन एव मनुष्याणां कारणं बन्धमोक्षयोः। इति,

आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः। इति च।

कथं तु मनसः समीचीनसंस्काराधानम्? यद्यपि मनोऽस्माकमुपकरणं, तदस्माकं वशे न वर्तते। तत् स्वाभिमतेऽर्थे अस्मानाकर्षति, न तु अस्मदिच्छानुरोधि वर्तते। सर्वप्रत्यक्षसिद्धमेतत्। श्रुतिस्मृती अपि ब्रूतः—

"मनसो वशे सर्वमिदं बभूव। नान्यस्य मनो वशमन्वियाय। भीष्मो हि देवः सहसः सहीयान्।"

"चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥"

इति। तस्मात् मनसः अनुकूलावस्थत्वसम्पादने परमो यत्नः अस्माभिः कर्तव्यः। कः स यत्न इति जिज्ञासायां उपनिषदियं तत्र तत्त्वं बोधयति। वेदाभ्यासेन तदर्थावधारणेन तदुपदिष्टधर्माचरणेन च अस्मदीयं मन सुशोभनसंस्कारसम्पन्नं सत् श्रेयोमार्गे सक्तं भविष्यतीति। अथर्ववेदोक्त शान्तिपुष्टिकर्माणि कृत्वा सुखजीवनं तावत् प्रथमतः संविधातव्यम्। अतः अयं वेदः प्रतिष्ठेत्युच्यते। अथ पूर्वोक्तरीत्या सर्वप्रधानयज्ञानुष्ठानं कर्तव्यम्। अत्र तत्परो यजुर्वेद इति अस्य शिरस्त्वम्। यज्ञैराराधनीया ये देवाः तेषां गुणाभिधानरूपा स्तुतिः ऋग्वेदेन कार्येति अयं वेदः दक्षिणः पक्षः। गीतिरूपेण साम्ना स्तुतौ विशेषाधानं क्रियत इति सामवेदस्य अस्मदीय-दक्षिणहस्तसहकारिणो वामहस्तस्येव उत्तरपक्षत्वम्। एवं च वेदचतुष्टयाध्ययनतदर्थावगमतदनुष्ठानविभवसमुद्भूतविलक्षणसंस्कारसंस्कृतं मन एव मनः, अन्यत् केवलं यन्त्रं भूतपिशाचादिवेति भाव इह अतिगम्भीरः अत्यन्तमवहितैर्ग्राह्यः।

एवं वेदविरहे मनुष्याणां या काचिदपि प्रवृत्तिः शोभना, हितपर्यवसायिनी न भविष्यतीति तत्त्वे गृहीते तदीयो महिमा कियानिति ज्ञायेत।

---

श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥ (व्यासः)

# वीरलब्धं पारितोषिकम् ॥

[ R. Ramamurti, M. A. ]

अनुवृत्तम् ।

अप्रतीक्षितात् अरेः कौटिल्यात् भीतिं नैव भेजे युद्धतन्त्रनिष्णातः विजयः। निरन्तराभ्याससञ्जातेन हस्तपाटवेन आत्मीयां आशीविषोपमां असिवल्लीं अपचकर्ष । असियुद्धे आत्मानं स्वच्छन्दकेसरिणं मन्वानः कुटिलः वैरिणं कान्दिशीकतां नेतुमयतत । यद्यद्रहस्यं तेन अधिगतं, अभ्यस्तं, आत्मोन्नत्यै च आविष्कृतपूर्वं तत्सर्वं प्रायुङ्क्त । परन्तु सा रहस्यसम्पत् राहुग्रस्तेन्दुमण्डला पौर्णमासीनिशेव परिक्षीणप्रभावा जाता। यां स्ववशवर्तिनीत्यहङ्कारेण अमंस्त, सा जयश्रीः परिचितपरिभाविनी इत्यधुना सः अजानात्। अभिप्रेतां, आत्मानुकूलां सिद्धिं अनाप्नुवन् अहङ्कृतो नरः कोपं हि भजते। कोपः धियं हि कलुषयति। कलुषिता धीः कथं सिद्धिं दद्यात्? कोपस्य परां काष्ठां अधिगतः कुटिलः, असिलतां अप्रदृश्यामिव चक्राकारेण भ्रमणविशेषेण कुर्वन्, आपपात विद्धो व्याघ्र इव विजयं विनिहन्तुम। सः विसस्मार असिसमरशास्त्रस्य प्रथमं सूत्रम— 'आत्मरक्षणं कुर्वन् परहननाय प्रयतेत' इति। विजयः लघुतया अन्यत्र उत्प्लुत्य, रिपोः हस्तात् असिं आच्छिद्य दूरतः चिक्षेप। आह्लादपरवशानां जनानां करघोषः वर्षर्तुजीमूतानां निनाद इव निर्ह्लादी, प्रतिध्वनिपीनः सर्वासु दिक्षु विजयस्य विजयं प्रकटयन्निव प्रासर्पत्।

अमात्यः अनिरुद्धब्रह्मरायः विजयिनं विजयं सार्वभौमस्य सन्निधिमनयत्। कोटिभानुभास्वरं स्वजन्मभूमिभूपतिं मन्दस्मितमुखशोभं वीक्ष्य भक्तिप्रणम्रेण शिरसा सः ववन्दे। अवनिपालः प्रीतिस्निग्धेन माङ्गल्यमृदङ्गमांसलेन ध्वनिना 'उत्तिष्ठ, वीर, उत्तिष्ठ। तव सामर्थ्यं बहु मन्यामहे। सन्तुष्टा वयं त्वां प्रधानराजरक्षकं कुर्महे। वीरश्रीरिव इयं रत्नमाला वीरस्य तव विशाले वक्षसि विश्राम्यतु' इति प्रशंसन्, तस्मै नवरत्नमालां दत्त्वा निरगात्। किं प्रतिवक्तव्यमित्यजानन् विजयः मत्तमतङ्गजमन्दगामिनं चक्रवर्तिनं चक्रधारिणमिव पश्यन् प्रकृतिमूकवत् तस्थौ। न बुबोध सः तदा शरच्चन्द्रसमानवदना, महादेव्याः प्रियप्रथमसखी शशि-

कला तं अनुरागतृष्णादीर्घेण चक्षुषा पश्यन्ती शुक्लाच्छदन्तच्छविसुन्दरं स्मितवतीति । एकस्मिन्नेव समये पार्थिवप्रसादस्य, अनङ्गानुग्रहस्य च पात्रभूतं अरातिं दृष्ट्वा अपजयेन, असूयया च प्रदह्यमानहृदयः, भस्मावशेषकीर्तिः कुटिलः क्रुद्धः पन्नग इव सुदीर्घं निशश्वास । निसर्ग-कुटिलः तस्य स्वभावः वैरिणं वञ्चनावागुरायां निपातयितुं ऊर्णनाभ इव सूक्ष्माणि तन्तुजालानि असृजत् ।

तस्मिन् काले चोलपाण्ड्यदेशयोः सौहार्दं नासीत् । पाण्ड्यदेशीयाः चोलराज्यक्षेमकुठाराः इति सार्वजनीनः अभिप्रायः चिरप्ररूढमूलः अभवत् । एकस्यां रजन्यां विजयः बृहदीश्वरस्य आलयोद्यानं जिगमिषुः महता वेगेन प्रतस्थे । सा प्रधाननगरी शान्तजनप्रचारा, दिवसश्रान्ता सुन्दरीव स्वपिति स्म । गच्छन्नेव सः पौनःपुन्येन सस्मार सायङ्काले स्वहस्तदत्तं मुद्रितं तमालपत्रलेखनं । 'को वा अस्यां कालरात्र्यां मां आलयारामे प्रतीक्षते । निपुणं निरूपयन्नपि तत्त्वाधिगमेऽप्रभुरस्मि ।' इति चिन्तातरङ्गतरलितहृदयः जगाम । यदा सः उपवनं प्रविवेश तदा नगरघण्टा विरावं चकाण ।

आरामे तमोबाहुल्यं असूचिभेद्यं अजृम्भत । शाखानिलीनः दिवा-भीतः परप्रवेशाक्षमः रराट । नक्तंचराः कीटाः, भ्रमरनिभाः मशकाश्च 'झोय्' 'झोय्' इति क्वणन्तः तं आवृत्य ददंशुः । मार्गमार्गणखिन्नः विजयः निरस्तपादपे उद्यानमध्ये मन्दंमन्दं ज्वलन्तं दीपं अद्राक्षीत् । तमुद्देशं गन्तुं यतमानस्सः तुरगखुररवं अश्रौषीत् । 'किमिदम्' इत्याकलयत्येव तस्मिन् अश्वारूढः कश्चन भटः मनोजवेन आपपात । प्रत्युत्पन्नमतिः सः यदि निकटवर्तिनं लतागुल्मं न अधाविष्यत्, वाजिपादाहतः मृतः अभविष्यत् । अनस्तमिते अतर्कितोदिते अस्मिन्नाश्चर्ये, लतानिलीनः सः अवैद्यत दीपहस्तान्, सायुधान् सप्तवीरान् । ते यस्मिन् लतागुल्मे सः प्रच्छन्नः अभवत् तं परिवार्य तस्थुः । तदा औत्तरात् वृक्षषण्डात् आयान्तं कुटिलं निशाम्य, 'सोदर कुटिल, एतेभ्यः वीरेभ्यः भीतः पुरुषः उत्तरां दिशं पलायितः । जातं कालविलम्बं मत्वा तस्य ग्रहणं असुलभं मन्ये । जवग्राही तुरगः सन्निहितश्चेत् यत्नः सफलः स्यात्' इति आक्रोशत् । एतानि वचनानि शृण्वन् कुटिलः स शरीरकम्पं जहास, जगाद च, 'अरे जाल्म, पाण्ड्यचार, आत्मत्राणपरायणः त्वं अलीकभाषणेन अस्मान् वञ्चयितुं ईहसे । सोदराः,

पश्यत अस्य डिम्भस्य समयोचितं बुद्धिचातुर्यम्। राजकर्मकुशलाः सर्वे वयं मूढाः इति खलु अस्य मनुषपशोर्मनीषा। रे अहङ्कृत, यः अन्यान् मूढान् मनुते स एव मूर्धाभिषिक्तो मूढः। पाण्ड्यमहाराजः प्रकृत्या मृत्पिण्डबुद्धिरपि अधुना परीक्ष्य हि समर्थं अपसर्पं प्रेषितवान्' इति। 'कुटिल, किं त्वं वदसि? तव वाक्यानां आशयं अवगन्तुं अनीशोऽस्मि' इति विजयः अलपत्। 'राजद्रोहिन्, सार्वभौमस्य सन्निधौ सर्वं व्यक्तं भविष्यति' इति साट्टहासं प्रजल्पन् कुटिलः भटान् विजयं बन्धुं आदिशत्।

भ्रमत् कालचक्रं जनानां दुःखं न जानाति। दुःखी एव विजानीयात् तद्दुःखस्य दुरमहताम्। अपरस्मिन् अहनि चोलमहीपतिः सभायां प्रथमामात्येन राजकार्याणि आलोचयन्नवर्तत। तदा कुटिलेन आनीयमानं शृङ्खलितहस्तं विजयं वीक्ष्य, "कुटिल, किमिदम्? अयं प्रधानराजरक्षकः इति त्वं किं न जानासि? कारणं आशु ब्रूहि तव अनुचितस्य असमीक्षितकार्यस्य" इति ननर्द। कुटिलः दण्डवत्प्रणम्य, 'भूपतीन्द्र, अयं अस्मदीयराज्यशत्रोः पाण्ड्यराजस्य अपसर्पः। तस्य प्रथमदर्शन एव शङ्कितं मे आर्यं मनः। अनालोच्य, आधारं विना अवनिपतिसन्निधौ न किमपि प्रलपितव्य इति अस्य वृत्तान्तं रहसि परीक्षमाणः अभूवम्। गतेऽहनि अस्य राजरक्षकस्य राजद्रोहं बृहदीश्वरोद्याने अपश्यम्। रहसि आगतेन, अश्वारूढेन पाण्ड्यदेशवीरेण अयं निशीथे मुणुमुणायमानः अभवत्। इमे मदीयाः सखायः साक्षिणः। अस्मान् दृष्ट्वा भीतः स वीरः पलायितः। अयं पुनः पलायने नैष्फल्यमुत्प्रेक्ष्य अस्मान् शरणं गतः। न जाने किं रहस्यं चोलराज्यक्षेमघातुकं असौ पाण्ड्यमहीपालाय प्रेषितवान्। कृतघ्नं, द्रोहिणं, वञ्चकं, अमुं मानुषतुषं शिक्षितुं वयं कुतूहलिनः। उचितां आज्ञां अधुनैव ददातु महाराजः' इति व्यजिज्ञपत्।

विजयः प्रतिवचनं दातुमयतत। किन्तु तस्य प्रत्यक्षदैवस्य पार्थिवस्य अपारं कोपं दृष्ट्वा मौनं अभजत। चोलसंराट् कोपविस्फारितताम्रनयनः, स्फुरिताधरोष्ठपुटः जगर्ज, 'किमेतत् वैशसवज्रघोरपतनम्? अमुं नीचं निशिततमे शूले क्षिपत, न, न, प्रथमं तावत् कानि वा रहस्यानि अयं जानाति अनेन प्रहितानि, इति तस्य अङ्गानि कणशः कणशः छित्वा निबोधत' इति।

तदा अमात्योत्तमः अनिरुद्धः प्राह, 'प्रभो, मुखं हि हृदयसमवस्थायाः दर्पणम् । अपराधं कृत्वा अकलङ्कं मुखं वोढुं न कोऽपि समर्थः अस्मिन् जगति । ईदृशं मुखं निष्कलङ्कं, सुप्रशान्तं कपटशौण्डस्य चारस्य सर्वथा अतिदुर्लभम् । प्रथमं तावत् कारागृहे असौ क्षिप्यताम् । पश्चात् तत्वावबोधस्य अवकाशः अस्त्येव । क्षिप्रकारिणा राज्ञा हतः, राजनि पश्चात्तापतप्ते प्राणान् आप्नोति किम् ? सर्वं विमृश्य कर्तव्यम्' इति ।

(अनुवर्ति)

# कविः महालिङ्गशास्त्री ॥

—— :o: ——

अस्यां पत्रिकायां क्रमेण प्रकाशितान् व्याजोक्तिरत्नावली, भ्रमरसन्देशः, वनलता, कलिप्रादुर्भावम्, इत्येवन्नामकान् काव्यबन्धान् सहृदया अनुवाचितवन्त एवेति मन्महे । वैदर्भीरीतिबद्धा इमे सकलगुणाढ्या रसभरिताश्चेति तेषु अस्माभिर्निवेदनं ज्ञातज्ञापनातिरिक्तं किमपि न भवति ।

प्रकृतिसिद्धकविमार्गवासनाविशेषः विद्यापरिश्रमशाली पाश्चात्यकलापरिचयसन्धुक्षितप्रज्ञाविकासः श्रीशास्त्री यद्यपि सत्कारनिरपेक्षः तत्तदृतुकाले तत्तत् चेतनाचेतनवस्तिष्वव स्वलक्षणं किमपि प्रकाशयन्नास्ते, तथापि पण्डितैः प्रभुभिश्च संस्कृतप्रियैः स्वस्वोचितेन स्वस्वशक्त्यनुरूपेण प्रकारेण चायं प्रोत्साहनीयः ।

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः । अबोधोपहताश्चान्ये इति यत् चिरन्तनेन कविना सशोकमुक्तं तत् त्रिकालसत्यत्वात् अधुनाऽपि सत्यमेव दृश्यते । 'जीर्णमङ्गे सुभाषितम्' इत्येतत् परं पत्नमारोप्य स्ववित्तव्ययेन प्रकाशितत्वात् । किञ्चिद् विपर्यसनीयं भाति । तत्र क्रेतॄणां विरहेण पुस्तकानां शिथिलीभावात् जीर्णं पत्ते सुभाषितम्' इति युक्तं पठितुम । तत्र तत्र स्थिताः पण्डिताः स्वस्वकलाशालापुस्तकार्थं एषां काव्यानां क्रयणाय यदि प्रवृत्तिं कुर्युः स्वस्वविदितं संस्कृताभिमानिनं प्रभुं च क्रयणाय प्रार्थयेरन् कवेः श्रमः सर्वथा लघूकृतो भविष्यति । उत्साहश्च वर्धेत । सर्वथा तावत् पण्डिताः, परस्परोपकारेण सत्कारेण च परस्परस्य श्रेयो वर्धयितुमर्हन्ति । 'पण्डितानामसङ्घातः' इति प्रथा मार्जयितुं नार्हन्ति । [सं]



——

# प्रकृतिभेदः ॥

I

माता— वत्स, इमं शिशुं कञ्चित् कालं रक्षन् आस्व, यावत् नदीं गत्वा त्वरया प्रतिनिवर्ते। साधुः किल त्वम्।

पुत्र— याह्यम्ब, न मे तच्छक्यम्। घण्टां पश्य। कियती अभूदिति। कालो ह्ययं कलाशालां गन्तुम्।

माता— आं तात, जानामि कलाशालागमनाय अयं ते काल इति। किन्तु नान्योऽत्रास्ति शिशोरवेक्षणाय। किञ्चिद्रक्ष। अतित्वरया निवर्तिष्ये। कियता विलम्बेन कलाशालागमनेऽपि न प्रमादो भविष्यति।

पुत्रः— त्वं वदसि न प्रमादो भविष्यतीति। प्रथमे कालभागे प्रधानपाठो भवति। तदानीं असन्निहितं मां पश्चात् कः पाठयेत्। विषयः कठिनः। उपाध्यायः कोपनः। न द्वितीयं वारं किमपि वदति।

माता— यथेच्छं कुरु तात। नाहमितोऽधिकं त्वां वक्तुं शक्नोमि।

---

II

माता— याहि रे कलाशालाम्। शिशुना क्रीडन् वर्तसे। कालो ह्यत्येति।

पुत्रः— अहं चेत् गतः स्यां कः शिशुं रक्षेत्। एकाकी त्यक्तो ह्ययं रुद्यात्। त्वं कर्मसु व्यापृता भवसि। न चान्यः कश्चिदस्ति।

माता— नाहं बहु व्यापृताऽस्मि। व्यापृताऽपि शिशुमपि अवेक्षिष्ये। धाव त्वं कलाशालाम्। कञ्चन व्याजं कृत्वा कलाशालामगच्छन् गृह एव स्थातुमिच्छसि।

पुत्रः— आमम्ब, कलाशालां गत्वा किं कर्तव्यम्। उपाध्यायः प्रायः कक्ष्यां नागच्छति। उपागतोऽपि वृथा जल्पान् करोति, न पाठयति। पाठश्च ललित एव। स्वयमेव मया पठितश्च अवगतश्च

माता— यत्किञ्चित् कुरु। अलसस्त्वम्। न ते विद्यायां श्रद्धाऽस्ति

---

Registered No. M 2300

Book XXIX || श्रीः || No. 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५६ मन्मथ - तुला [ सं २

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

OCTOBER 1955

R
S
V
L
00995

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।
२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३ ग्राहकीबुभूर्षद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari*,
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः॥

शास्त्रानुबन्धः—श्रीगीतार्थदीपः १३७—१४४

SRI VENKATESWARIYA SANSKRIT VIDYA ... LIBRARY TIRUPATI.



पादाय देवतार्चने प्रयतन्ते, केचिच्च दानेषु, केचिच्च योगेषु, केचिच्च होमेषु। एते सर्वे द्रव्ययज्ञाः। केचित्तपोयज्ञाः— कृच्छ्रचान्द्रायणोपवासादिषु निष्ठां कुर्वन्ति। योगयज्ञाश्चापरे— पुण्यतीर्थपुण्यस्थानप्राप्तिषु निष्ठां कुर्वन्ति। योगोऽत्र संयोगः; प्राप्तिः। सा च पुण्यतीर्थाद्यभिगमनादिरूपा। कर्मनिष्ठाप्रकरणत्वाद्योगशब्दस्य साक्षाद्योगविषयत्वं न युक्तम्। स्वाध्यायश्च ज्ञानञ्च स्वाध्यायज्ञाने, ते एव यज्ञौ येषां ते स्वाध्यायज्ञानयज्ञाः। केचित् स्वाध्यायाभ्यासपराः, केचित् तदर्थज्ञानाभ्यासपराः। 'अपर' शब्दवत् यतयः संशितव्रताः इति च प्रत्येकमन्वयिनौ सर्वकर्मयोगनिष्ठसाधारणार्थपरौ। यतयः- यतनशीलाः, सम्यक् शितानि तनूकृतानि—तीक्ष्णीकृतानि, दृढानीति यावत्, व्रतानि—संकल्पाः, येषां ते संशितव्रताः।

தாங்கள் அநுஷ்டானம் செய்யும் கர்மயோகங்களில் அதிக முயற்சியும் த்ருடஸங்கல்பமும் கொண்டவர்களான கர்ம யோகிகளில் சிலர் முறைப்படி த்ரவ்யஸம்பாதநம் செய்து அத ஞல் செய்யப்படும் தேவதாராதனம், தாநம், யாகம், ஹோமம், இவற்றிலொன்றில் ப்ரயத்நம் பண்ணுகிறார்கள். சிலர் தவம் செய்வதிலும், சிலர் புண்ய தீர்த்தக்ஷேத்ரங்களுக்குப் போவது முதலியவற்றிலும் மற்றும் சிலர் வேதாப்யாஸம் செய்வதிலும் சிலர் வேதார்த்தவிசாரத்திலும் முயல்கின்றார்கள். 28

१९१ अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

१९२ अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति।

प्राणायामपरायणाः, अपरे, नियताहाराः, इति पदत्रयस्य प्रतिवाक्यमन्वयः। दृष्टादृष्टोपकारद्वाराऽऽहारनियमस्सर्वप्राणायामसाधारणः। प्राणायामास्त्रिविधाः— पूरकरेचककुम्भकभेदात्। 'अपाने जुह्वति प्राणं' इति पूरकः। ऊर्ध्वप्रवृत्तस्य प्राणस्याधःप्रवेशनं हि पूरकः। ततश्च अपाने जुह्वतीत्युपचारादुपपन्नम्। 'प्राणेऽपानमि'ति रेचकः अधस्स्थितस्य।

वायोरूर्ध्वप्रवर्तनं हि रेचक इति प्राणेऽपानमित्युपचरितम् । वायोरूर्ध्वाधोगमननिवारणेनावस्थपनं कुम्भकः । स च प्राणापानगती रुध्वा प्राणान् प्राणेषु जुह्वतीत्युच्यते । प्राणान् प्राणवृत्तिभेदान् ।

மற்றும் சில கர்மயோகிகள் ப்ராணாயாமத்தில் நிஷ்டையுடையவர்களாய் ஆஹாரநியமத்துடன் ரேசகம், பூரகம், கும்பகம் என்கிற ப்ராணாயாமங்களில் ஒரொன்றையே செய்கின்றார்கள். 29½

सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥

१९३ यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।

यज्ञानां शिष्टं यज्ञशिष्टं, यज्ञशिष्टं च तत् अमृतं च यज्ञशिष्टामृतं, तत् भुञ्जते इति यज्ञशिष्टामृतभुजः । द्रव्ययज्ञप्रभृतिप्राणायामपर्यन्तेषु कर्मयोगभेदेषु स्वसमीहितेषु प्रवृत्ता एते सर्वे महायज्ञपूर्वकनित्यनैमित्तिककर्मरूपयज्ञविदः तन्निष्ठाः, तैर्यज्ञैरेव क्षपितकल्मषाः, यज्ञशिष्टमन्नं अमृताख्यं तेन शरीरधारणं कुर्वन्त एव कर्मयोगे व्यापृताः सनातनं ब्रह्म ब्रह्मात्मकतया ब्रह्मभूतमात्मस्वरूपं यान्ति साक्षात्कुर्वन्ति ।

முன் சொல்லிய கர்மயோக நிஷ்டர் யாவரும் பஞ்சமஹா யஜ்ஞம் முதலிய நித்யநைமித்திக யஜ்ஞங்களில் நிஷ்டையுடையவர்கள். அதனாலேயே பாபமற்றவர்கள். அம்ருதம் எனப்படும் யஜ்ஞசேஷான்னத்தினால் தேஹதாரணம் செய்பவர்கள். இவர்கள் எல்லோரும் ஜ்ஞானயோகமின்றிக்கே கர்மயோகங்களாலேயே ஆத்மாவலோகனம் பெறுகின்றார்கள். 30½

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

अयज्ञस्य– महायज्ञादिपूर्वकनित्यनैमित्तिवकर्मरहितस्य नायं लोकः– न प्राकृतलोकसम्बन्धी धर्मार्थकामाख्यः पुरुषार्थः । कुत इतोऽन्यो

मोक्षाख्यः पुरुषार्थः। परमपुरुषार्थतया मोक्षस्य प्रस्तुतत्वात् तदितर-पुरुषार्थः 'अयं लोकः' इति निर्दिश्यते। स हि प्राकृतः। 'प्रकृतिपरिणामविशेषरूपत्वात् तत्संसृष्टस्य प्राप्यत्वाच्च प्राकृतत्वोक्तिः।

பஞ்சமஹாயஜ்ஞும் முதலிய நித்ய நைமித்திக கர்மங்களை விட்டவனுக்கு ப்ராக்ருத லோகஸம்பந்தியான தர்மார்த்த காமமாகிய புருஷார்த்தமே ஸித்திப்பதில்லை. மோக்ஷமில்லை என்பதற்குக் கேட்கவேணுமோ! 31

१९४ एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥

एवं कर्मयोगावान्तरभेदानुपदिश्य तत्तद्भेदेऽपि साधारणानां नित्यनैमित्तिकानामवश्यानुष्ठेयत्वं तत्परित्यागे प्रत्यवायश्चाभिहितः ; अस्यैवार्थस्योपसंहारः क्रियते– एवमिति श्लोकेन। ब्रह्मशब्दोऽत्र यथावस्थितात्मविषयः। मुखशब्दश्चोपायविषयः । एवं हि बहुप्रकाराः कर्मयोगाः ब्रह्मणो मुखे– आत्मनः प्राप्त्युपाये कर्मयोगे अवान्तरभेदतया वितताः। तानिति निर्देशः प्रस्तुतसमस्ताकारपरामर्शी, सर्वानिति चाशेषावान्तरभेदसङ्ग्रहः । तान् सर्वान् - उक्तलक्षणान् उक्तभेदान् कर्मयोगान् सर्वान् कर्मजान् विद्धि– अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मजान् विद्धि । एवं ज्ञात्वा यथोक्तप्रकारेणानुष्ठाय मोक्ष्यसे।

இவ்வாறாகப் பலவிதங்களான கர்மயோகங்கள் ஆத்மாவை ஸாக்ஷாத்காரம் செய்வதற்கு உபாயங்களான கர்மயோகங்களின் உட்பிரிவுகளாக வளர்ந்திருக்கின்றன. அந்தக் கர்மயோகங்கள் எல்லாம் நித்யநைமித்திக கர்மாநுஷ்டானத்தினுல் உண்டாகுமவை. இவ்வாறு தெளிந்து அநுஷ்டானம்செய்து மோக்ஷம் பெறுவாயாக. 32

१९५ श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

अन्तर्गतज्ञानतया कर्मणो ज्ञानाकारत्वमुक्तम् । तत्रान्तर्गतज्ञाने कर्मणि ज्ञानांशस्यैव प्राधान्यमुच्यते श्रेयानित्यादिनाऽध्यायपरिसमाप्त्यन्तेन प्रघट्टकेन । अवान्तरभेदप्रतिपादनरूपात्रान्तरप्रकरणात्प्राचीनेन कर्मणो ज्ञानाकारत्वप्रतिपादकप्रघट्टकेनास्य साक्षात्सङ्गतिः । 'श्रेयान् द्रव्यमया-द्यज्ञात्' इत्यत्र तावत् ज्ञानप्राधान्यमात्रान्न ज्ञानयोगविवक्षा वक्तुमुचिता, 'कर्म ज्यायो ह्यकर्मणः' इत्यादिषु सर्वत्र तद्विपरीतकर्मप्राधान्यस्यैव प्रपञ्चि-तत्वात् । अतोऽत्र ज्ञानयज्ञशब्दः कर्मयोगांशविषयः । द्रव्यज्ञानोभयाकारे कर्मणि द्रव्यमयादंशात् ज्ञानमयोंशश्श्रेयान् । यज्ञशब्दोऽत्र यज्ञांशविषयः । सर्वं कर्म- तदितरदखिलं साधनं च कर्मान्तर्भूते ज्ञाने परिसमाप्यते । परिसमाप्तिः-सम्पूर्णता - सफलता साक्षात्कारलक्षणसाध्यदशेति यावत् । हे परन्तप, उक्तसाध्यदशाविरोधिनिवर्तकस्त्वम् । पार्थ, पृथापुत्रः खलु भवान् ।

*ஆத்மஜ்ஞாநமும் கர்மாவுமான இரண்டு அம்சங்களில் த்ரவ்யமயமான கர்மாம்சத்திலும் ஜ்ஞாநாம்சமே சிறந்தது. குந்திபுத்ரனும் ஜிதேந்த்ரியனுமான ஓ அர்ஜுன! கர்மயோகம் மற்றுள்ள ஸாதநம் எல்லாம் ஆத்மஸாக்ஷாத்காரபர்யந்தமான ஜ்ஞாநத்தைக் கொடுத்து பரிஸமாப்தி பெறுகின்றது (முடிகின்றது).* 33

१९६ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

तत्— 'अविनाशि' इत्यादिना मयोपदिष्टमात्मविषयं ज्ञानं, प्रणि-पातपरिप्रश्नसेवाभिः इतरेतरसमुच्चितैः विशदाकारं ज्ञानिभ्यो विद्धि । प्रकर्षेण नीचैः पतनं प्रणिपातः प्रश्नपूर्वाङ्गभूतः प्रणामोपसङ्ग्रहादिः । परिप्रश्नः— स्वबुद्धिमत्तातिरेकगूहनेनाजानत इव साक्षात्प्रष्टव्यानभि-धानेन तदनुबन्धिविषयः प्रश्नः । सेवा तु भक्तिश्चिरानुवर्तनं वा । साक्षात्कृतात्मस्वरूपास्तु ज्ञानिनः ते ज्ञानमुपदेक्ष्यन्ति । * 'तस्मै स विद्वानुपसन्नाय सम्यक्... प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' इति हि श्रूयते । प्रोवाच — प्रब्रूयादित्यर्थः ।

* मु. १ - २ - १३

நான் உபதேசித்துள்ள ஆத்மஜ்ஞானத்தை மேன்மேலும் ஞானிகள்பக்கல் ப்ரணாமம்பண்ணி சுச்ரூஷை செய்து கேட்டுத் தெளிவாயாக. ஆத்மதத்வ ஸாக்ஷாத்காரம் பெற்றுள்ள ஞானிகள் உனக்கு ஞானத்தை உபதேசம் செய்வார்கள். 34

१९७ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥ ३५॥

आत्मयाथात्म्यविषयस्य ज्ञानस्य साक्षात्कारावस्थस्य चिह्नं शृणु—यत् ज्ञानं ज्ञात्वा पुनरेवं–देहाद्यात्माभिमानरूपं तत्कृतं ममताद्यास्पदं च मोहं न यास्यसि, येन च ज्ञानेन अशेषेण— देवमनुष्याद्याकारेणानुसंहितानि भूतानि स्वात्मन्येव द्रक्ष्यसि। भूतशब्देनाचित्संसृष्टक्षेत्रज्ञा विवक्षिताः। प्रकृतिसंसर्गेण विषयतया प्रतिपन्नानि भूतानि परिशुद्धतया ज्ञाते स्वात्मनि निदर्शनभूते स्थालीपुलाकादिन्यायेन द्रक्ष्यसि, यतस्तवान्येषां च भूतानां प्रकृतिवियुक्तानां ज्ञानैकाकारतया साम्यम्। अथो मयि सर्वभूतान्यशेषेण द्रक्ष्यसि, मत्स्वरूपसाम्यात् परिशुद्धस्यात्मवस्तुनः। प्रकृतिविनिर्मुक्तं सर्वमात्मवस्तु परस्परं समं सर्वेश्वरेण च समम्। इदमेव ज्ञानं तस्य साक्षात्कारावस्थायाश्चिह्नम्। यत्–येन, इत्यनयोः तद्विद्धीति पूर्वश्लोकस्थः तच्छब्दः प्रतिनिर्देशरूपः। तदेकवाक्यत्वमस्य श्लोकस्येत्यनुसन्धेयम्।

நான் உபதேசம்செய்து ஞானிகள் பக்கல் தெளியும்படி முன்சொல்லியதான ஞானத்தின் ஸாக்ஷாத்கார ரூபமான நிலைக்கு அடையாளம் யாதெனில்—அந்நிலையில் மறுபடி உனக்கு இவ்வாறான அஹங்காரமமகாரரூபமான மோஹம் ஏற்படாது. தேவன் மனுஷ்யன் என்றுப்போலுள்ள வேற்றுமை இயற்கையில் ஆத்மாவிற்கு இல்லை. உன்னுடைய பரிசுத்தாத்ம ஸ்வரூபத்தையும் என்னையும் உதாஹரணமாகக்கொண்டு 'எல்லா ஆத்மவஸ்துவும் பரஸ்பரம் ஸமானமானது. ஸர்வேச்வரனோடும் ஸமானமானது' என்று பார்ப்பாய். இதுவே ஆத்ம ஞானத்தின் ஸாக்ஷாத்காரநிலைக்கு அடையாளம். 35

१९८ अपि चेदसि पापेभ्यस्सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥

अपिचेत्— यद्यपि, सर्वेभ्यः पापविशिष्टपुरुषेभ्यः पापकृत्तमोऽसि, सर्वं वृजिनरूपं समुद्रं कर्म योगान्तर्गतात्मज्ञानरूपप्लवेनैव सन्तरिष्यसि। इत्थं विरोधिनिवर्तकत्वरूपमाहात्म्यवदपीदं ज्ञानम् ।

*பாவிகளான அனைவரிலும் சிறந்த பாவியாக இருந்த போதிலும் இந்த ஆத்மஜ்ஞானமாகிற ஓடத்தினால் பாவமனைத்தையும் கடந்துவிடுவாய்.* 36

१९९ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ३७ ॥

*'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इत्यादिवचनात् पापस्वरूपनिवर्तकत्वं ज्ञानस्यानुपपन्नमिति चेत्, वचनमिदं अन्यपरम्, अन्यथा प्रायश्चित्तशास्त्राणि कुप्येयुः । सम्यक्प्रवृद्धोऽग्निरिन्धनसंचयमिवात्मयाथात्म्यज्ञानरूपोऽग्निर्जीवात्मगतमनादिकालप्रवृत्तानन्तकर्मसंचयं भस्मीकरोति। पूर्वश्लोकोक्तस्समुद्रतरणदृष्टान्तः पुनः प्रवेशाविरोधी। काष्ठभस्मसात्करणदृष्टान्तेन तु पुनःकार्यकरत्वप्रसङ्गोऽपि प्रतिषिद्धः । भस्मसात्कुरुते - भस्मीभूतानि कुरुते, अकार्यकराणि कुरुते।

*அதிகமான அக்னியானது விரகுகளை சாம்பலாகச் செய்கின்றாப்போலே ஜ்ஞாநமாகிற அக்நியும் அநாதி பாபகர்மங்களனைத்தையும் போக்கும்.* 37

२०० न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

---

* ब्रह्मवैवर्ते प्रकृतिखण्डे २६-७०

लोकदृष्टान्तेन पूर्वश्लोके दर्शितोऽर्थो वह्नेः पदार्थान्तरादृष्टदाहकत्ववत् पवित्रतमस्वभावत्वेनोपपाद्यते पूर्वार्धेन । हि— यस्मात्कारणात्, आत्मज्ञानेन सदृशं शुद्धिकरमिह जगति वस्त्वन्तरं ज्ञानरहितकर्मपुण्यस्थानादिकं न विद्यते, अतो ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते । ईश्वरज्ञानादर्वाचीनेषु परिशुद्धात्मज्ञानतुल्यं पावनं नास्ति । तत् - तथाविधं, विपाकावस्थं ज्ञानं ज्ञानाकारकर्मयोगसंसिद्धः— पक्वकषायत्वलक्षणयोग्यतापन्नः, स्वयं तदानीमुपदेशनिरपेक्षं, कालेन आत्मनि— स्वात्मसाक्षिकं, विन्दति— लभते ।

பரிசுத்திசெய்யுமதில் ஆத்மஜ்ஞானத்திற்கு நிகரானது மற்றொன்றில்லை. ஆகையால் ஜ்ஞானாக்நியானது ஸர்வ பாபங்களையும் பஸ்மமாகச் செய்யும். கர்மயோகத்தினால் பாபங்களை வாசனையோடு களைந்து ஸித்திபெற்றவன் நாளடைவில் அவ்வாறான ஜ்ஞானத்தை தன் அந்தராத்மஸாக்ஷிகமாய் அடைகிறான்.

२०१ श्रद्धावान् लभते ज्ञानं तत्परस्संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ ३९ ॥

पूर्वश्लोकार्धयोरेतच्छ्लोकार्धे व्युत्क्रमेण विवरणरूपे । श्रद्धावान्— उपदिष्टज्ञानवृद्धौ त्वरमाणः, तत्परः— तदेव परं - उपादेयतयाऽभिसन्ध्यास्पदं यस्य स तत्परः— तादृशज्ञानलाभ एव नियतमनाः, तदितरविषयात्संयतेन्द्रियः, अचिरेण कालेनोक्तलक्षणविपाकदशापन्नं ज्ञानं लभते । पूर्वं 'कालेन' इति पदं द्वित्रदिनादिव्यवच्छेदार्थम् । 'अचिरेण' इति तु ज्ञानयोगदेहान्तरादिविलम्बनिषेधार्थमित्यविरोधः । तथाविधं ज्ञानं लब्ध्वा परां संसारनिवृत्तिलक्षणां शान्तिमचिरेणाप्नोति । द्वितीयाध्यायान्तिमश्लोकत्रयेऽपि— 'स शान्तिमाप्नोति न कामकामी' 'स शान्तिमधिगच्छति' 'ब्रह्मनिर्वाणमृच्छति' इति फलदशाविषयौ शान्तिनिर्वाणशब्दौ प्रयुक्तौ । तत्र मध्यमश्लोकस्थं 'शान्तिमधिगच्छति' इत्येतदत्रापि प्रत्यभिज्ञातम् ।

ஆத்மஜ்ஞானோபதேசம்பெற்று ஜ்ஞானத்தை மேலும் வளரச்செய்வதில் த்வரையும், அந்த ஜ்ஞானத்திலே ஊக்கமும்

மற்றதிலிருந்து இந்த்ரியங்களைக் கட்டுப்படுத்துவதுமான நிலையுள்ளவன் சீக்ரத்தில் ஸாக்ஷாத்காரபர்யந்தமான ஆத்மஜ்ஞானத்தைப் பெறுகிறான். அவ்வாறான ஸ்வாத்மஸாக்ஷாத்காரம் பெற்றதும் சீக்ரத்தில் ஸம்ஸாரநிவ்ருத்தியையடைகிறான். 39

२०२ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥

उक्त एवार्थो व्यतिरेकेण स्थाप्यते । अज्ञः— एवमुपदेशलब्धज्ञानरहितः उपदिष्टज्ञानवृद्ध्युपाये चाश्रद्दधानः— अत्वरमाणः उपदिष्टे च ज्ञाने संशयात्मा — संशये आत्मा - मना यस्य स संशयात्मा विनश्यति— नष्टो भवति । विनश्यतीत्यस्य विवरणमुत्तरार्धम् । उपदिष्टे आत्मयाथात्म्यज्ञाने संशयात्मनः पुरुषस्य अयं लोकः— प्राकृतो लोको नास्ति । लोकशब्दः पुरुषार्थपरः । धर्मार्थकामरूपपुरुषार्थाश्च न सिद्ध्यन्ति, न परः कुतो मोक्षः । शास्त्रीयकर्मसिद्धिरूपत्वात्सर्वेषां पुरुषार्थानां, शास्त्रीयकर्मजन्यसिद्धेश्च देहातिरिक्तात्मनिश्चयपूर्वकत्वात् । अतो न सुखं— सुखलवोऽपि संशयात्मनो नास्ति ।

உபதேசத்தினால் ஆத்மஜ்ஞானத்தைப் பெறாதவனும் பெற்ற ஜ்ஞானத்தை விருத்திசெய்வதில் த்வரையில்லாதவனும் மனக்கலக்கமுடையவனுமான மனிதன் யாதொரு புருஷார்த்தமும் பெறாமல் நஷ்டனாகிறான். ஆத்மஸ்வரூப விஷயத்தில் ஸந்தேஹமுடையவனுக்கு தர்மம் அர்த்தம் காமம் ஆகிய சிறிய புருஷார்த்தமே ஸித்திப்பதில்லை. மோக்ஷத்தைப்பற்றி கேட்க வேணுமோ? ஆகவே யாதொரு ஸுகமும் அவனுக்கு இல்லை. எல்லா புருஷார்த்தமும் ஆத்மதத்வஜ்ஞானம் பெற்றவனுக்கே ஸித்திக்கும். 40

२०३ योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥ ४१ ॥

अध्यायप्रधानार्थ उपसंह्रियते । योगोऽत्र— 'कर्मण्यकर्म यः पश्येत्' इत्यादिनोपदिष्टबुद्धियोगः । ज्ञानाकारतापत्त्या कर्माकारत्वतिर-

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 3

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५६ मन्मथ - वृश्चिक [सं ३

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

NOVEMBER 1955

For the rate of subscription please see inside

# UDYANA PATRIKA.

---

Annual Subscription **Rs. Two only.**

Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्ध-सञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

---

## विषयाः ॥

---

1 शृङ्गारनारदीयम्।
2 वरदाभ्युदयचम्पूः।
3 मुकुन्दमाला।
4 संस्कृतम्।
5 वैदिका विशेषाः।
6 वीरलब्धं पारितोषिकम्।
7 वृद्धभाषितम्।
8 प्रकृतिभेदः।
9 पुस्तकपरामर्शः।

---

१९
२३

(ततः प्रविशति यथा निर्दिष्टं गन्धर्वमिथुनम् )

गन्धर्वयुवा— सुन्दरि, अलं प्रद्रवणेन,

यथाऽनिलैस्ते परिधानवासः
पटत्पटत्फट्फडिति प्रधूतम् ।
तथा मनोजन्मपताकिकां त्वां
पश्यामि मत्तो व्यपनीयमानाम् ॥ १ ॥

ताम्रत्विषा धातुरजःकणाना-
मङ्गुष्ठवेधोच्छ्रयिणा चयेन ।
पश्चात्प्रवृत्तां रुधिरोरुधारां
प्रवेपते मे हृदयं विशङ्क्य ॥ २ ॥

आलोलमूलं कबरीभरं ते
संयम्य पादावतिलोहितान्तौ ।
संवाहयन्नङ्कशयामुपांशु
त्वां वासु विश्रामयितुं समीहे ॥ ३ ॥

अहो विचित्रा मदनस्य माया
धनुर्लता त्वं श्लथकैशिकज्यम् ।
विधूयसे विभ्रमताऽनिलेन
विध्यन्ति मर्माणि तु सायकौघाः ॥ ४ ॥

धम्मिल्लवेल्लन्नवपारिजात-
स्रजा पुरः शृङ्खलयेव बद्ध्वा ।
दृष्टिं विकर्षन्त्यनुधावनेषु
कायं ममायासिनमुद्धिभर्षि ॥ ५ ॥

प्रियेऽवसन्नः पतितोऽहमत्र
पश्योपलोद्वर्तनविप्लुताङ्घ्रिः ।
करावलम्बं कठिने प्रदेहि
स्मरिष्यसीदं निरनुग्रहत्वम् ॥ ६ ॥

तिष्ठत्वपेक्षा मयि मानवत्याः
किमेवमात्मन्यपि निर्घृणाऽसि।
अद्रेर्नितम्बेषु नितम्बवत्याः
कष्टं समारोहणमर्दयेत् त्वाम्॥ ७॥

अयि, प्रिये, प्रतिपालय माम्।

अहो परिक्लेशजडीकृतायाः
स्वेदाम्बुसंभिन्नशुभाननायाः।
धूलीकरालीकृतकुन्तलायाः
सेवावकाशः श्लथवाससस्ते॥ ८॥

हन्त, हन्त, अदर्शनं गता भामिनी। कथंपुनरन्वेषयिष्ये दीर्घरोषाम्। मम खल्विदानीम्,

यस्याः सुदूरेऽप्युपलक्षितायाः
श्रमाय नाभूदनुसारलीला।
तस्यां दृशोर्गोचरदूरितायां
मुञ्चन्ति सन्धारणमङ्गकानि॥ ९॥

(सखेदं निषद्य निःश्वस्य परितोऽवलोकयन्)

असौ पुरो मे सिकतोपलानां
दिग्व्यापिनः सानुमतः प्रबन्धः।
विडम्बयत्यङ्कुरमात्रवर्जं
वितत्य रूढं हृदि मे विमोहम्॥ १०॥

(स्मृत्वा सहसोत्थाय सविकासम्) भवतु, सुन्दरीसरस्तीरं गता भवेत्। तत्र खलु कन्दरो नः शश्वत् सङ्केतस्थानं भुक्तचरम्। तच्चेदानीमारात्। तेन हि झटित्यासादयिष्ये प्रियतमाम्।

(इति सत्वरं परिक्रम्य निष्क्रान्तः)

( ततः प्रविशति गगनादवतरन् नारदः )

नारदः— अद्य खलु मया—

सर्वर्चानां सदसि वदनैर्यः प्रवक्ता चतुर्भिः
स्त्रीणां मध्ये मम स जनकः पेशलं भाषमाणः।
प्रातःसेवा समुचितविधिव्यूढवीणेन दूरा-
दानम्यैव स्वमपवहता तन्मयत्वे विसृष्टः॥ ११॥

वस्तुतस्त्वेषु दिवसेषु,

मेनाऽरिष्टा मुनिरथ दितिश्चारुकेशी घृताची
मोचा रम्भा धरणिररणिर्दामिनी धूमिनीति।
निर्दुर्वासस्तदिदमसकृद्व्यस्तवाचस्पति द्रा-
गास्ते दुःस्थप्रथमतनयं सद्म पद्मासनस्य॥ १२

तदनु, प्राप्तोऽस्मि असंभाव्यसौमनस्यभङ्गं हिमवदुत्सङ्गम्। (उपरि प्लवमानः अधोऽवलोक्य) अहो आश्चर्यरूपमिदं सरः अविज्ञातपूर्वं सर्वतोमुखसञ्चारस्यापि मे नारदस्य। तथा हि—

हरिनीलशिलाफलकाप्रकीर्णशारप्रियाकाराः।
अस्मिंस्तिमितमषीमयतोये कल्हारकुमुदकादम्बाः॥ १३॥

अपि च,

प्रान्तोन्नमज्जरठदुर्गदृषच्चतुष्क-
प्रत्युप्रदर्पणदशामवलम्बमाने।
अस्मिंस्तुषारभरवेष्टितशृङ्गशोभा-
मालोकयन्निव विभाति हिमालयोऽयम्॥ १४॥

उद्देशेऽस्मिन्नवतीर्य विश्रमविनोदमाप्नवानि। (इत्यवतरति) अहो, निश्च्योतत इव प्रशान्तरसं समन्तात् अचलसन्निवेशः निर्भरनिबिडैकान्त्यपीडापिण्डिताभोगनिर्यासनिरतिशयम्। अथवा,

सुचरितपरिपाकादीदृशोद्देशसेवी
विगतचकितभावो निस्तरङ्गान्तरङ्गः।

अमृतरसदुघां तामात्मभूमानुभूतिं
रतिचटुपटुकान्तां गाहते गूहते वा ॥ १५ ॥

अथवा, विविक्तस्वैररसं खलु संगीतकम् । तदिह क्वापि सुखोपविष्टः समाहितहृत्कन्दरोपनिकेतितं भगवन्तं नारायणमुपवीणयामि । यतः,

विवर्णयति स्वं बहुकण्टकत्वं व्यासङ्गिनामङ्गुलिपाटनेन ।
गान्धर्वमामोदविविक्तचित्तैः संगृह्यते संसृतिकैतकेऽस्मिन् ॥ १६ ॥

न खलु निर्वितानने स्थलीसंस्थाने शोभते संगीतकम् । विशेषतस्तन्त्रीसमुत्थम् । (विलोक्य)

नारादिह पर्णकुटी मसृणशिलाप्रायपर्वताभोगे ।

तत्कोऽत्र विधिः ।

अम्भस्तटीं किमभितो ग्राव्णां नैकोऽपवरकः स्यात् ॥ १७ ॥

(इति परिक्रामति) अये, कठोरयत्यातपं प्रभाकरः । आरूढः किलासौ प्रकृष्टमन्तरं दिवः । इदानीमत्र सन्निवेशमहिम्ना—

हिमस्रुतिपरम्परारजतशृङ्खलादामभि-
र्विलम्बिमणिमञ्चकप्रचुरदर्शनीयं सरः ।
निविश्य निजबिम्बसंमितमनोज्ञवर्ष्मा रविः
शयालुरवलोक्यते करविराजिताम्भोरुहः ॥ १८ ॥

तदुचितमस्य स्वापनकमनुष्ठातुम् । (विलोक्य) दिष्ट्या चात्र समीहितसन्निवेशचारु कन्दरामुखम् । यावत्प्रविशामि ।

(प्रवेक्ष्यन् निरीक्ष्य सोद्वेगम्) अये किमत्र । धिक् धिक् । नारायण, नारायण । एतत् खलु—

(ततः प्रविशति गुहाभ्यन्तरात् सरभसं निष्क्रामत् अवलुलितवेषं ससाध्वससम्भ्रमं पलायनपरं गन्धर्वमिथुनम्)

( निष्क्रान्तं मिथुनम् )

नारदः— अहो दुर्निमित्तम् । अथवा, (विहस्य) अनयोरहमेव दुर्निमित्तं संवृत्तः ।

शरणवरणविद्यालम्बनं सात्त्विकानां
चरणनलिनयुग्मं चक्रहस्त त्वदीयम् ।
जननमरणरोगक्षुत्पिपासाजरादि-
व्यसनहरणहेतोर्विश्वसेतो प्रपद्ये ॥ ६४ ॥

एवं स्तवनपूर्वकमग्रतः प्रणिपातविधातारं विधातारं करुणापरिणाह-गुरुणा कटाक्षपूरेण स्नपयन्मुकुन्दः परमानन्दकन्दलितमन्दहासरसादर-मेवमुदीरयामास ।

उत्तिष्ठ वत्स कमलासन तावकीनै-
राराधनैरहमिहास्मि भृशं प्रसन्नः ।
कल्याणमस्तु ननु कांक्षितमस्ति यत्ते
तत्त्वं वृणीष्व तरसा प्रतिपादयामि ॥ ६५ ॥

एवं भगवता सादरमुक्तः पितामहः कृताञ्जलिस्सविनयमेवं व्यजि-ज्ञपत् ।

न जातु श्रीजाने नरकितसुरस्थानविभवात्
भवत्साक्षात्कारात्फलमपरमाकाङ्क्षति मनः ।
निदाघादित्यांशुव्यतिकरविषण्णं कुवलयं
निशाकान्तालोकाद्वद किमितरस्मै स्पृहयते ॥ ६६ ॥

यदि च भगवन्मयि भवतो भवति भूयाननुग्रहस्तदा तु ।

ननु वरद नमस्ते नागशैलस्य मस्ते
कुरु कुशलनिदानं सन्ततं सन्निधानम् ।
परमपद इव त्वं भक्तहृत्कपारणात्मा
प्रकटय निरपायां प्राज्यसाम्राज्यलक्ष्मीम् ॥ ६७ ॥

इदं तु पैतामहमभ्यर्थनमभ्युपगम्य सम्यगेवं भगवानवादीत् ।

भुवनानि पातुमवनावपि स्वयं कलभाचलेऽत्र सुलभावलोकनः ।
निवसानि सर्वदिवसानि सेन्दिरो वरदोऽहमुग्रतरदोषशोषकः ॥ ६८ ॥

इमामुक्तिं रमाभर्तुर्निशम्य तदनुज्ञया ।
क्रतौ चतुर्मुखश्शेषं कर्तव्यं निरवर्तयत् ॥ ६९ ॥

तदानीं तु—

जाग्रतो मधुरिपोरथाग्रतो नाभिभूस्सदसि [1]दुर्जनाभिभूः ।
ऋत्विजां बत गणाय [2]दक्षिणामुत्तरामपि ददावुदारधीः ॥ ७० ॥

अथाश्वमेधावभृथाय वेधास्सुधामयं वारि दधानमच्छम् ।
धन्यस्स मुन्यग्रथसमावृतोऽगात् फण्यग्रगण्यस्य सरो गभीरम् ॥ ७१ ॥

वृष्णा सममर्त्यैश्च सिष्णासति चतुर्मुखे ।
आगात्त्रिपथगा वेगादनन्तसरसीं तदा ॥ ७२ ॥

[3]अग्राहि यस्य चरणादनघेन येन
साहि स्वयं किमु रमारमणं तमिष्टम् ।
तं चेष्टवन्तमवलोकयितुं विरिञ्चं
तत्राहिराजसरसीं द्युनदी जगाहे ॥ ७३ ॥

ततश्च—

[4]विधुपादानुषङ्गेण विशुद्धिमति के स्वके ।
नदीं सौमनसीं बिभ्रन्नागराजसरो बभौ ॥ ७४ ॥

---

1 दुर्जनान् अभिभवति - तिरस्करोतीति दुर्जनाभिभूः ।

2 दक्षिणां दिशं, उत्तरां दिशमपीति । उत्तरां श्रेष्ठां दक्षिणामपि ऋत्विगानतिकरं देयद्रव्यमपीति चार्थः ।

3 यस्य- विष्णोः । येन-चतुर्मुखेन । इष्टं-यागोद्दिष्टं-भगवन्तम् । इष्टवन्तं तं च— यागं कृतवन्तं ब्रह्माणं च ।

4 विधोः चन्द्रस्य विष्णोश्च, पादः— किरणश्चरणश्च, तदनुषङ्गेण सम्बन्धेन, विशुद्धिरस्यास्तीति- विशुद्धिमत् , तस्मिन् स्वके स्वीये के— जले, सौमनसीं नदीं— सुमनस्सम्बन्धिनीं नदीं गङ्गां, बिभ्रत् नागराजसरः- अनन्तसरः, बभौ - चकाशे ।

तदा तु—

> [1]हंसवाहमुपासीना हंसास्सरसि निस्पृहाः ।
> ते हि पद्मिन्युपस्पर्शाद्दधुश्शुद्धिं परामहो ॥ ७५ ॥

अथ च,

> ध्यात्वा देवमिभाद्रिवासरसिकं स्नात्वा सरस्यौरगे
> भूत्वा पद्मभवः प्रसन्नवदनो धूत्वा तमश्चान्तरम् ।
> कृत्वा नाकसदां तदा बहुमतिं दत्वा द्विजेभ्यो धनं
> स्वस्थानं प्रति मानपूर्वमखिलान् प्रस्थापयामास तान् ॥ ७६ ॥

इति श्रीवेङ्कटाचार्ययज्वविरचिते वरदाभ्युदये चम्पूप्रबन्धे

तृतीयो विलासः ।

---

1 हंसवाहं— ब्रह्माणं उपासीना-उपाश्रिता ये हंसाः मरालाः, सरसि निस्पृहाः प्रवेशानिच्छवोऽभवन् । ते हि पद्मिनीनां-कमललतानां उपस्पर्शात् संपर्कात् परां उत्कृष्टां शुद्धिं दधुः । अहो इत्याश्चर्ये । मरालानां साक्षात् सरःप्रवेशाभावेऽपि तदुत्पन्नकमललतासम्बन्धमात्रेण परा शुद्धिः जाता । किमुत साक्षात् सरः प्रविश्य स्नाने इति सरोमाहात्म्यं आश्चर्यकरमिति भावः । अत्र हंसपद्मिन्यादिशब्दमहिम्ना— हंसः- सूर्यः वाहः धारकः यस्य तं परमात्मानं सूर्यमण्डलान्तर्वर्तिनं, उपासीनाः ध्यायन्तः हंसाः यतिविशेषाः, ये निस्पृहाः इच्छारहिता आसन् ; ते हि पद्मिन्युपस्पर्शात् पद्मिनीजातिस्त्रीसङ्गं प्राप्यापि । ल्यब्लोपे पञ्चमी । सरसि-अनन्तसरसि परां शुद्धिं दधुः । अहो आश्चर्यम् । परमात्मोपासकानां निस्पृहाणां यतिश्रेष्ठाणामपि कदाचित् पद्मिनीजातिस्त्रीसङ्गात् पातित्यप्राप्तावपि अनन्तसरःस्नानमहिम्ना परा शुद्धिर्भवतीति एतत्सरोमाहात्म्यमाश्चर्यकरमित्यपि कश्चिद्भावः प्रतीयते ।

## अथ चतुर्थविलासः ।

प्रस्थाप्य नाकममरान स मरालवाहो
नागाद्रिमूर्ध्नि वरदं शरदम्बुजाक्षम् ।
भक्त्या नतः परमया रमया समेतं
सेवाविरत्यसहया महायांबभूव ॥ १ ॥

अकृतयुगान्तं दिव्यैरुपलारैराराधयन्तं आनन्दतुन्दिलस्वान्तं शारदा-
कान्तं वरदो निजगाद ।

प्रसन्नोऽस्मि प्रजानाथ वृणीष्व वरमीप्सितम् ।
लब्ध्वा वरं प्रतिष्ठस्व लोकं स्वकमनाकुलः ॥ २ ॥

एवमादिशन्तं देवदेवं तमादरातिशयेन राजीव जन्म । श्रुतिसङ्ख्ये-
राननैः श्रुतिमधुरमिदमुदैरयत् ।

[1]नाथ ते नाथ ते नाथ ते नाथ ते
दर्शनाद्दर्शनाद्दर्शनाद्दर्शनात् ।
नापरं नापरं नापरं नापरं
प्रार्थये प्रार्थये प्रार्थये प्रार्थये ॥ ३ ॥

मुरारे मुरारे मुरारे मुरारे तावहं तवाहं तवाहं तवाहम् ।
समीपे समीपे समीपे समीपे वसेयं वसेयं वसेयं वसेयम् । ४ ॥

एतां पैतामहीमुक्तिं मुक्तिदाता न मन्यते ।
दामोदरस्समाकर्ण्य सामोदमिदमब्रवीत् ॥ ५ ॥

[2]मत्प्रीतिः क्रमते न तेषु महता मोहो न यैः शाश्वतीं
मर्यादामतिलङ्घ्य मद्विरचितां कैङ्कर्यमाचर्यते ।

---

1 "हे नाथ ! ते दर्शनादपरं न प्रार्थये" इति वेदसंख्यैः चतुर्भि-
र्मुखैरपि चतुर्वारं उक्तिरादरातिशयात् । एवमुत्तरश्लोकेऽपि ।

2 तेषु विषये मत्प्रीतिः न क्रमते– प्रतिबद्ध्यते इत्यर्थः । सीमादिरक्षणे
राज्ञा नियुक्ता अधिकारिणः 'तत्कार्यं परित्यज्य राज्ञः पादसंवाहनं
कुर्वन्तोऽपि तस्य तोषकरा यथा न भवन्ति । तद्वदिति भावः ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २९] कलि ५०५६ मन्मथ · वृश्चिक साधारण [सं ३


# मुकुन्दमाला ॥

—o—

राजा कुलशेखरः योगेन भगवन्तमनुभवन्नास्त । अतिरमणीयेन आसेचनकेन परमसौन्दर्यनिधिना रूपेण भगवान् तदीयध्यानचक्षुषः पुरस्तादाविर्भूय अवातिष्ठत । परं तु कस्मिंश्चित् काले अतीते तदीयं मनस्ततो न्यवर्तत । अविज्ञेयेन केनापि कारणेन तत् स्वप्रकृतिसिद्धं चाञ्चल्यं प्रदर्शयामास । भगवत्स्वरूपध्याने प्रतिष्ठां न लेभे । तेन कुलशेखरस्य शोकोऽभवत् । अविधेयं स्वकीयं मनः अनुनेतुमैच्छत् । तस्मात् तत् सम्बोध्य इदमाह—

सरसिजनयने सशङ्खचक्रे
मुरभिदि मा विरमस्व चित्तरन्तुम् ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥ १० ॥

हे चित्त, हे मदीय मनः, मुरभिदि मुरारौ भगवति ; रन्तुं रमणात् तदनुध्यानजनितात् आनन्दानुभवात् ; मा विरमस्व विरतिं विश्रान्तिं मा गमः । भगवान् कथं वर्तते, कीदृशो दृश्यते, इति सम्यङ् निरूपय । अत्यद्भुतं हि इदमस्य रूपम् । सरसिजनयने । यथा सरसिजं रविकरविकसितं पुण्डरीकं तथाऽस्य नयनम् । अतिसुन्दराभ्यां अतिप्रसन्नाभ्यां दयावर्षिभ्यां नेत्राभ्यां मां पश्यन् परममनुग्रहं मयि प्रकाशयति । सशङ्खचक्रे । न परं पुण्डरीकाक्षत्वेन, अपि तु दिव्यशङ्खचक्रधारणेन च स्वकीयं

पारम्यं स्वजनपरिपालनतत्परत्वं च ख्यापयति । शत्रुप्रसङ्गे सति क्रोधताम्रे नेत्रे इव उग्रे भवन्ती अपि अन्यदा सर्वदा आभरणतामेव शङ्खचक्रे भजतः । एवं प्रसन्नशीतलाभ्यां नयनाभ्यां अत्युज्ज्वलाभ्यां शङ्खचक्राभ्यां च विराजमाने भगवति रन्तुं मा विरमस्व ।

"भगवत्स्मरणादपि अतिशयितसुखहेतुभूतं यदि अन्यत् किञ्चिदस्ति, तत्राहं प्रवर्ते, भगवत्स्मरणं विहाय" इति स्वमनसोऽभिप्रायमाशङ्क्य उत्तरमाह— सुखतरमिति । सुखहेतुभूतं वस्तु सुखम् । अतिशयेन सुखं सुखतरम् । भुवनसुन्दरस्य भगवतो हरेः यः अस्माकं शरणभूतः चरणः तस्य स्मरणं लोके सर्वस्मात् सुखतरम् । तेन तुल्यं अपरं सुखतरं अहं जातु न जाने । यदाकदापि मे ज्ञानगोचरतां न गच्छति । सर्वाणि शास्त्राणि आलोडितवानस्मि । आचार्यवर्येभ्यः अन्येभ्यश्च अभिज्ञशिखामणिभ्यः वहु श्रुतवानस्मि । स्वबुद्धया च चिरं अन्विष्टवानस्मि । न च तादृशं किञ्चिदस्तीति ज्ञायते । अथ स्वानुभवग्रहणे वस्त्वन्तरस्य यस्य कस्यापि स्मरणं न मे अल्पायापि सुखाय कल्पते । दूरे अतिशयितं सुखम् । अतः हे मदीय चित्त, मा विरमस्व । त्वं मदीयमसि । मम यदनुकूलं तत् त्वया कर्तव्यम्, न तु स्वतन्त्रतया किमपि । विरमस्वेति आत्मनेपदं व्याकरणान्तरानुरोधादिति वाच्यम् । "स्व' इति पृथक्कृत्य 'हे मम स्वभूत धनभूत चित्त" इत्यनुनयनार्थमुपलालनमिति वा ।

---

# संस्कृतम् ॥

—::—

[ अतीते मार्च्-मासे अस्माभिर्विलिख्य प्रेषितो लेखविशेषोऽयमधस्तान्मुद्रितः ।]

संस्कृतसेवाधुरन्धराः श्रीमन्तः,

अखिलभारतीय-संस्कृत-साहित्य-सम्मेलनीय-द्वाविंशाधिवेशनसम्बन्धि आह्वानं कृपया प्रेषितं प्राप्य सन्तुष्टोऽस्मि । अधिवेशनस्य सर्वप्रकारशोभनां निर्वृत्तिं भगवति श्रीनिवासे प्रार्थये । बहुभिः कारणैः महता समारोहेण

प्रवर्तमाने तस्मिन् सन्निधातुं न शक्यत इति तु खिद्ये । अथापि संस्कृत-विद्यासम्बन्धिनः केचन उपक्षेपाः कर्तव्या मे प्रतिभान्ति । तत्र यदि किमपि अनौचित्यं तत्रभवन्तो न मन्यन्ते, यदि च इमे सम्मेलने परिशीलनार्हा भवन्ति, तर्हि अवश्यं परिशीलनीयाः, यथार्हं निर्धारणीयाश्चेति सानुरोधं प्रार्थये ।

1 संस्कृतप्रणयिनः तदभिवृद्धिकामाः तदर्थं प्रयतमानाश्च बहवः संस्कृतविद्याप्रचारहेतोः तादृशं संविधानं उचितमावश्यकं च मन्यन्ते, यदनुरोधेन लब्धशिक्षाणां पुंसां अन्येषामिव राजकीयकार्यालयेषु अन्यत्र च उद्योगः सुलभो भवेत् । अत्र मे महती विप्रतिपत्तिः । संस्कृतेतर-विद्याशालाः सम्प्रति दिने दिने अतीव वर्धन्ते । प्रतिवत्सरं परीक्षासु उत्तरतां सङ्ख्या वर्धते । सर्वेषां तेषां उद्योगो दुर्लभो भवति । तेन 'अनुद्योगप्रश्नः' उत्थितः क्षणे क्षणे तीव्रतरीभवन् सर्वानाकुलयति । यदस्मदीयाः सर्वेषु विषयेषु कार्त्स्न्येन पाश्चात्यप्रक्रियानुसारिणो भवन्ति तत्फलभूतेषु सङ्कटेषु इदमन्यतमम् । यथाऽयं प्रश्नो नैवोत्तिष्ठेत् तथा विद्याप्रचारपद्धतिः अस्माभिः पर्यालोच्य निर्धारणीया । सर्वे जनाः आरम्भात् प्रभृति उद्योगार्थमेव यदि विद्यामभ्यस्येयुः सर्वेषां तेषां उद्देशपरिपूरणं कथं शक्यम् । तस्मात् बुद्धिसंस्कारार्थं, विवेकसम्पत्त्यर्थं आत्मगुणसिद्ध्यर्थं, लौकिकदैनन्दिनिकव्यवहारव्युत्पत्तिनिष्पत्त्यर्थं च सर्वजनसाधारणी विद्या प्रौढैर्विद्वद्भिः निर्धारितया रीत्या प्रचारयितव्या । उद्योगोद्देशोऽत्र सर्वथा न कर्तव्यः । राज्यकार्यनिर्वाहार्थं तु यावन्तोऽपेक्षिताः तावन्तः तदर्हाः उद्धृत्य अपेक्षितशिक्षाविशेषं दत्वा नियोक्तव्याः । 'कार्यनिर्वाहस्तत्र प्रधानम् । न तूद्योगलाभः' इति मतिर्यथा सर्वेषां प्रतिष्ठिता स्यात्, क्वापि क्वापि स्पर्धा न जायेत, तथा तत्र व्यवस्था कार्या ।

2 सौराज्यस्य लक्षणं अस्तैन्यं जनानां निरातङ्कता च । उभयमिदानीं न वर्तते । विपरीतं तु प्रत्यहं वर्धते । संस्कृतग्रन्थेषु अनुशिष्टस्य राज्य-शासनप्रकारस्य अज्ञातत्वात् अत्यन्तमुपेक्षितत्वाच्च अस्मिन् विषये कस्यापि दृष्टिर्न पतति ।

3 धनिनां दरिद्राणां च, क्षेत्रिणां कृषीवलानां च, स्वामिनां कर्म-कराणां च एवमन्येषां अन्येषां च विप्रतिपत्तिः घोरा पदेपदे भवति । तत्र शासनानि कुर्वन्ति । न तु तृप्तिकरी शान्तिर्जायते ।

4 आसां दुरवस्थानां परिहाराय सर्वेषामेव जनानामविशेषेण मनोनैर्मल्यं, धर्मपरत्वं, सर्वलोकहितैषित्वं च तत्वोपदेशेन अस्मत्प्राचीनचरित्रनिदर्शनेन च सम्पाद्यम् ।

5 अत्र संस्कृतविद्याया भूयिष्ठ उपयोगः ।

6 वेदं शास्त्राणि चाधीत्य स्वधर्मानुष्ठायिनः सन्तो ये स्वस्वस्थाने स्थित्वा स्वानुष्ठानोपदेशाभ्यां जनानां सत्पथावस्थानश्रद्धां जनयेयुः, तेषां देहयात्राचिन्ता यथा न स्यात् तथा संविधानं कार्यम् ।

7 तेषां सकाशे अधीत्य ये तत्र तत्र गत्वा जनेषु आस्तिक्यबुद्धिजननोपयोगितया उपदेशान् कर्तुं प्रगल्भाः, तेषां तस्मिन् व्यापारे नियोगं कृत्वा उचिता वृत्तिर्देया ।

8 कोटिशः धनमर्जयित्वा एतदर्थं निधिः स्थाप्यः । संस्कृतमधीत्य कश्चित् सीदतीति स्थितिः सर्वथा परिहार्या ।

9 संस्कृतविदः पण्डिता अपि लोकक्षेमार्थमेव वयं स्वकार्यं कुर्मः । 'न तु केवलमुदरम्भरितये'ति यथा बुध्येरन् तथा प्रतिबोधनीयाः ।

10 नवीनरीत्या संस्कृतविश्वविद्यालयस्थापनादपि उक्तरीत्या सद्यः संस्कृतशास्त्राध्यायिनां उत्साहकरणं श्रेयः । तत् न परं संस्कृताभिवृद्धये अपि तु जनानां आत्मगुणवृद्धये च कल्पमानं श्लाघ्यबहुफलं भवेत् ।

11 वित्तस्योपरि लुठन्तोऽपि पाश्चात्याः अध्यात्मव्युत्पत्तिविरहात् अलब्धशान्तयः शोचन्ति । अस्मद्देशमुदीक्षन्ते च । इत्थं तैः क्रियमाणाया अपेक्षायाः पूरणं असंस्कृतविद्भिर्दुष्करम् । तत्रापि अनधीतवेदवेदान्तैर्दुष्करम् ।

12 सर्वैरपि जनैः संस्कृतशिक्षणे क्रियमाण एव तदभिवृद्धिर्भवेदिति मन्यमानाः केचित् संस्कृतं लघयितुं विपर्यसितुं च उद्यमं कुर्वन्ति । इदमस्मभ्यं न रोचते । त्रुटितसंस्कृतपदानि कानिचित् कतिपये यद्युच्चारयन्ति तावता का संस्कृतस्य रक्षा कृता भवेत् ? का च वृद्धिः ? प्रोत्साहने सति परस्सहस्रा उत्तमोत्तमपण्डिताः प्रादुर्भविष्यन्ति । संस्कृतं कठिनमिति तत्रोपेक्षा नैव भविष्यति । संस्कृतविदां गौरवे जाते सामान्यजनाः यथाशक्ति संस्कृतभाषां शिक्षमाणाः रामायणादिपठनक्षमाः स्युरिति आनुषङ्गिकमिदं भविष्यति । संस्कृतरक्षा वा वृद्धिर्वा दिग्गजकल्पेषु वेदतदङ्गोपाङ्ग-

निपुणेषु सत्स्वेव, न त्वन्यथा । तेऽपि लोकोपकारदत्तदृष्टयश्चेत् सुरक्षितो लोको भवेत् ।

अभिज्ञाः, चिरपर्यालोचनेन अस्मद्बुद्ध्यारूढमिदं किञ्चित् भवतां पुरस्तादुपक्षिप्तम् । तत्र यदुचितं तद्भवन्तः कर्तुमर्हन्ति । यदि एतेन भवतामसौकर्यं किमपि क्लेशो वा कश्चन जातो भवेत् तस्य कृते अहं क्षन्तव्य इति प्रार्थये । एतत्प्राप्तिं दयया सूचयन्त्विति च ।

---

# वैदिका विशेषाः ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—:o:—

## तस्य वा एतस्य यज्ञस्येत्याद्यनुवाकार्थः ।

सह वै देवानामित्यादिके तैत्तिरीयारण्यकद्वितीयप्रपाठके स्वाध्यायः प्राधान्येन विधीयते । अतः स स्वाध्यायब्राह्मणमिति समाख्यायते । तत्र 'तस्य वा एतस्य यज्ञस्य ... ... एता एव देवताः प्रीणाति' इति पञ्चदशोऽनुवाकोऽस्ति । तस्य सायनाचार्यभाषितोऽर्थ एवं सङ्क्षिप्यते । उक्तस्य ब्रह्मयज्ञस्य द्वावनध्यायौ विद्येते । ब्रह्मयज्ञस्य कर्ता स्वयमशुचिर्यदा भवति तदानीमेकोऽनध्यायः । देशो वा मूत्रपुरीषादिभिरशुचिर्भवति । स द्वितीयोऽनध्यायः । न तु कश्चित्तृतीयोऽनध्यायहेतुरस्ति । अस्मिन् ब्रह्मयज्ञे सामग्री दैवतान्येव । न तु बाह्यसाधनं किञ्चिदपेक्षितमस्ति । ब्रह्मयज्ञेन तुष्टेषु दैवतेषु फलं भवत्येव । अस्य यज्ञस्य निमित्तद्वयव्यतिरेकेणानध्यायकारणं नास्ति सामग्री च न प्रयाससाध्या वर्तत इत्येवं विद्वान् यः पुमान् कालविषये आसनादिनियमविषये देशविषये च श्रद्धाजाड्यं परित्यज्य यावद्बलं स्वशाखामधीते स स्वापेक्षितान् सर्वान् लोकान् जयति । तत्र तत्र लोके पुरुषान्तरवदृणयुक्तो न भवति । किन्तु अनृण एव सञ्चरति । तत् अनृणस्यानुसञ्चरणमभिमुखीकृत्य 'अनृणा अस्मिन् ... ... अनृणा आक्षीयेम' इत्येषा ऋगध्येतृभिरुक्ता । अस्या अयमर्थः— 'भूलोकेऽन्तरिक्षे द्युलोके च ब्रह्मयज्ञबलादनृणास्स्याम । अपाकृतप्रतिबन्धकऋणा

वयं ये देवयानाः पितृयाणाश्च पन्थानस्तान् सर्वानपि मार्गान् सर्वतः प्राप्नुयाम' इति । ऋषीणामृणं ब्रह्मयज्ञेनापोह्यत इति तावत् सर्वेषां सम्मतम् । देवपितृकार्ययोरसमर्थस्य तदुभयविषयमृणमनेनैवापोह्यते । अत एव स्मर्यते- 'जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥' इति । योऽयमग्निरसृष्ट्यादावुत्पन्नस्तमुत्पन्नमात्रमेव सर्वः पाप्मा जग्राह । अग्निर्हि पापिनां पापशोधनाय समुत्पन्नः । अत एव स्मृतिकारा भाण्डादीनां पुनः पाकेन शुद्धिं ब्रुवते । यथा लोकेऽत्यन्तमलिनं वस्त्रमल्पजलेन यदा प्रक्षाल्यते तदानीं वस्त्रमालिन्यं सर्वं जले प्रविशति तथा शोधनीयवस्तुगतः पाप्मा शोधकेऽग्नौ प्रविष्टः । देवास्तमग्निगतं पाप्मानमाहुतिभिराहुतीनामघं यज्ञेन यज्ञस्य वृजिनं दक्षिणाभिर्दक्षिणानां दुष्कृतं प्रतिग्रहीत्रा ब्राह्मणेन ब्राह्मणस्य दुरितं तत्तन्मन्त्रगतैर्गायत्र्यादिछन्दोभिश्छन्दसामेनस्स्वकीयशाखारूपेण स्वाध्यायेनापाघ्नन् । स्वाध्यायस्तु निवर्तनीयपापस्पर्शशून्यः यस्मात् स्वाध्यायस्वरूप देवानामपि शोधकम् । देवा हि पूर्वस्मिन् जन्मनि मनुष्या भूत्वा स्वाध्यायमधीत्य तदर्थमनुष्ठाय शुद्धास्सन्तो देवत्वमविन्दन । ईदृशं तं स्वाध्यायं यः पुरुषः प्रारभ्य पश्चात्त्यजति स पुमान् वाङ्मात्रनिष्पाद्यत्वेन प्रयासरहितायां महाफलहेतुभूतायां स्वाध्यायाध्ययनरूपायां वाच्यपि भाग्यहीनो भवति । महाप्रयासनिष्पाद्यज्योतिष्टोमादिसाध्ये स्वर्गे भागधेयशून्यो भवतीति किमु वक्तव्यम् । भाग्यविकलेन पाणिलब्धचिन्तामणेरग्निमध्ये प्रक्षेपेण सदृशं तेन तत् स्वाध्यायपरित्यजनमभिमुखीकृत्य 'यस्तित्याज ... सुकृतस्य पन्थाम्' इत्येषा ऋगध्येतृभिरुक्ता । एतस्या अयमर्थः- यः पुमान् वेदस्य वाङ्मात्रनिष्पाद्यमध्ययनं करोति तं पुरुषं वेदस्समस्तपापक्षयद्वारेण मोक्षपर्यन्तोत्तमगतिप्रदानेन प्रियं सखायमिवातिस्नेहेन पालयति । तस्मादध्येतारं सखायं वेत्तीति सखिवित् स्वाध्यायः । स्वयं च तस्य पुरुषस्य सखा अत्यन्तस्नेहेन कदाचिदप्यनपायात । न हि निरन्तराध्यायिनं स्वाध्यायः कदाचिदपि परित्यजति किन्तु दिने दिनेऽतिशयेन तस्याधीनो भवति । ईदृशं स्वाध्यायं यस्तत्याज तस्यायासरहिते महाफले पाठेऽपि भाग्यं नास्ति, किमु वक्तव्यं महाप्रयाससाध्येऽनुष्ठाने तत्फले वा । यद्यपि स्वाध्यायत्यागी कदाचिद्विद्वत्सभायामुपविश्य काव्यनाटकालङ्कारादिग्रन्थान् शास्त्राणि च शृणोति तथाऽपि तदानीमलीकमेव शृणोति

यस्मादयं पुण्यानुष्ठानमार्गं न प्रजानाति । अस्यामुष्मिकमार्गप्रमाणवेदव्यतिरिक्तश्रवणेन कण्ठशोषो वृथाऽऽयुःक्षयश्च भवति । पुरुषार्थो न कोऽपि सिध्यति । दुरितं च महत्सम्पद्यते । अत एव मनुना स्मर्यते—

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ इति ।

स्वाध्यायव्यतिरेकेण सुकृतमार्गानवगमात् स्वाध्यायोऽध्येतव्यः—ब्रह्मयज्ञाध्ययनं ग्रहणाध्ययनं च कर्तव्यम् । एतच्चोभयं परमपुरुषार्थसाधनमिति तैत्तिरीयोपनिषदि बहूनाम् ऋषीणां मतभेदोपन्यासप्रसङ्गेन विस्पष्टमाम्नातम्, 'स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः ।' इति । सत्यवदनमेव परमपुरुषार्थसाधनमिति राथीतरस्य मतम् । कृच्छ्चान्द्रायणादिरूपं तप एव तत्साधनमिति पौरुशिष्टेर्मतम् । मौद्गल्यस्त्वत्यन्तरहस्यदर्शी रहस्यार्थत्वात् स्वाध्यायप्रवचने परमपुरुषार्थसाधने उवाच । तत्र स्वाध्यायो ग्रहणार्थमध्ययनम् । गृहीतस्य वेदस्य प्रकर्षेण प्रतिदिनं ब्रह्मयज्ञरूपेण वचनं प्रवचनम् । उभे एवोक्तमे पुरुषार्थसाधने । सत्यमत्रार्थसिद्धं भवति । यो हि निरन्तरं स्वाध्यायं पठति तस्यानृतवदनेकः प्रसङ्गः । तपोऽप्यत्रार्थसिद्धम् । निषिद्धविषयप्रवणानामिन्द्रियाणां बलक्षयद्वारेणोद्धतत्वं वारयितुं कृच्छ्चान्द्रायणादिना शरीरशोषरूपं तपः क्रियते । स्वाध्यायपरस्य तु विषयमात्रचिन्तैव नास्ति । कुतो दुष्टविषयेषु प्रवृत्तिः । योगशास्त्रोक्तयोगफलभूता विषयध्याननिवृत्तिरस्याप्रयासेनैव सिध्यति । तत्र किमनेन कृच्छ्चान्द्रायणादिना तपसा योगशास्त्रेण वा । एतत्सर्वमभिप्रेत्य मौद्गल्यः 'तद्धि तपस्तद्धि तपः' इति प्रसिद्धिवाचकेन हिशब्देन वीप्सया च स्वाध्यायप्रवचनयोरत्यादरं दर्शयति । अयमध्येता अग्निष्टोमवाजपेयराजसूयाश्वमेधादीनां मध्ये यस्य यस्य क्रतोः प्रतिपादकं वेदभागमधीते तत्तत्क्रतुप्रतिपादकवेदभागाध्ययनेनैवास्य तत्तद्यागानुष्ठानफलं भवति । त्रिविधो हि यागः कायिको वाचिको मानसिकश्चेति । तत्राध्येतुर्वाचिकस्य निष्पत्तौ नास्त्येव विवादः । यद्यध्येतार्थमपि जानाति तदाऽध्ययनकाले तदनुसन्धानान्मानसोऽपि निष्पद्यते । कायिकश्चेन्नास्ति मास्तु नाम द्रव्यार्जनरहितस्याधिकाराभावात् । यस्य त्वधिकारः कायिकमप्यसौ करोति । इतरस्य तु वाचिकेनैव तत्फलं लभ्यते । तस्मादयमध्येता

अग्नेर्वायोरादित्यस्य सायुज्यं गच्छति। तत् वेदविदो माहात्म्यमभिमुखीकृत्य 'ये अर्वाङ् ... .... ह्‌सम्' इत्येषा ऋगध्येतृभिरुक्ता। अस्या अयमर्थः– इदानीन्तनमनुष्यमध्येतृरूपमथवा पुरातनं व्यासवसिष्ठादिरूपं पाठादर्थाच्च वेदतत्वाभिज्ञं महात्मानं ये मूर्खास्तत्र तत्र निन्दन्ति ते मूर्खास्सर्वेऽप्या-दित्यमेव परिवदन्ति। ततो द्वितीयमग्निं तृतीयं गमनशीलं वायुं च निन्दन्तीति। अस्य वेदविदोऽग्निवाय्वादित्यसायुज्ययोग्यत्वादेतस्मिन्नेव निन्दा तेषां निन्देत्यनेनैव ये अर्वाङिति मन्त्रेणादित्यादिरूपत्वलक्षणं वेदविन्माहात्म्यं दर्शितम्। अस्य मन्त्रस्य तात्पर्यमेवम्— 'अग्निरवमो देवतानां विष्णुः परमः' इत्युक्तत्वादग्निप्रभृतयो विष्णुपर्यन्ता यावत्यो देवतास्सन्ति तास्सर्वाः पाठतोऽर्थतश्च वेदविदि ब्राह्मणे वसन्ति। एकैक-स्मिन्मन्त्रे एको देवः प्रतिपाद्यते। ते च मन्त्रास्सर्वेऽध्येतुर्वाच्यध्येतुर्मनसि च वर्तन्ते। अतो वेदविदां ब्राह्मणानां सर्वदेवतात्मकत्वात् तेभ्यः प्रतिदिनं नमस्कुर्यात्। तदीयमशुभं किमपि विद्यमानमविद्यमानं वा न कीर्तयेत्। एतेन वेदविदो ब्राह्मणस्य सत्कारेण सर्वा अप्येता देवताः परितोषयतीति।

कस्याञ्चिद्विद्वत्सभायां कश्चित्परीक्ष्यः सर्वपाप्मोदितत्वमपहतपाप्म-त्वमेवेति सिद्धान्तं मनसिकृत्य आदित्याक्ष्यन्तर्वर्ती पुरुषः परमात्मैव अप-हतपाप्मत्वादित्यवदत्। तदा कश्चित्परीक्षकः, तस्य वा एतस्येत्यनुवाके 'अपहतपाप्मा स्वाध्यायः' इति श्रूयते। ततश्च भवदुक्तहेतुः स्वाध्यायेऽपि विद्यत इति साधारणो भवतीत्याक्षिपत्। तदिदानीं स्मृतिपथमारोहति।

---

# वीरलब्धं पारितोषिकम्॥

[ R. Ramamurti, M. A. ]

अनुवृत्तम्

प्रसन्नधियां वाचः फलं अपरिमेयं हि प्रसुवते। प्रथममन्त्रिणो वाक्यानि हितानि मनोहारीणि चेति मेने महीपतिः। शासितृशासनमनु-सृत्य विजयं कारायां प्राक्षिपन् राजकिङ्कराः।

विधेः वाल्लभ्यं विदितवतः कुटिलस्य अन्तर्गूढघनव्यथस्य हृदयं पुटपाकप्रतीकाशं अभूत् । 'रिपुर्हि प्राणिति' इति निर्विण्णेन मनसा, कंसः भगवन्तं श्रीकृष्णमिव कोटिशः स्मरन्, शपन् निरयात् ।

कारायां बद्धः विजयः विधेः वामतां विचिन्त्य विव्यथे । रक्षकाः आहूता अपि नाकर्णयन्, पृष्टा अपि न प्रत्यभाषन्त । तं मनुष्य इति न कदाऽपि ते अमन्यन्त । पुच्छविषाणहीनः साक्षात् पशुरित्येव ते तं अगणयन् । 'प्रेतपुरीप्रयाणं प्रतीक्षमाणस्य पञ्जरपतितस्य केवलं मूषिकस्य तुलां आरूढोऽस्मि । अपराधी आराध्यते, अमोघं सुखं च अश्नुते । निरपराधी निन्दितः, अनर्हेण अवमानेन, अनुचितेन दुःखेन च दह्यते । का वेयं नीतिः' इति प्रललाप । यथा यथा तस्य शोकः ऐधत, तथा तथा कुटिलं कपटकीटं जगर्हे । काले आगते प्रतिकर्मकरणेन मरणाधिकां मानहानिं तस्य नरनैर्ऋतस्य जनयितुं निश्चिकाय ।

एवं एकः मासः जगाम । एकदा कारागृहस्य पार्श्वभागे गच्छन्त्यां विशालायां वीथ्यां समरभेरीणां भाङ्काराः जजृम्भिरे । कारणं जिज्ञासुः विजयः कारागृहभित्तिमध्ये विराजमानं वातायनं रन्ध्रनिहितपादः व्याघ्रपादवत् प्राप । क्रमेण प्रसर्पत् चोलचतुरङ्गबलं समरोन्मुखं ददर्श । 'प्रायेण युद्धकामुकं पाण्ड्यभूपतिं सङ्गरे उन्मूलयितुं महती इयं चमूः चलति । तृणीकृतसुखभोगानां, देशरक्षाबद्धकक्षाणां, यशसे विजिगीषूणां, अमीषां मानधनानां मध्ये अगच्छन्तं मां धिक्' इति भृशं आत्मानं शुशोच । निखातस्थाणुवत् तिष्ठन् सः कतिपयविनाडिकानन्तरं कुटिलं एकाकिनं वाजिरूढमप्यचलन्तं, चिन्ताकुलं आलोकयत् । मन्दरमथितः क्षीरार्णव इव तस्य हृदयं संक्षुभितं अभूत् । येन केनापि कारणेन सर्वान् प्रदेशान् परितः स्थितान् अपाङ्गवीक्षणेन परीक्षमाणः सः, कारागृहमपि यदृच्छया अद्राक्षीत् । तत्र शोकसङ्घातमूर्तिं, कारागृहकदर्थितगात्रं विजयं वीक्ष्य, क्षणं छिन्नधैर्यः, तडिल्लताताडित इव तस्थौ । ततः मनस्समाधाय मर्मच्छेदिनं मन्दहासं क्रकचनिकाशं कृत्वा द्रुततरं पिशाचग्रस्त इव अधावत् । तदा सः न बुबुधे हस्तात् स्विन्नात् च्युतं पत्रखण्डम् । विस्मृतनिमेषेण चक्षुषा कुटिलमेव वीक्षमाणः विजयः पतितं तल्लेखं अवाप्तुकामः, मार्गेण दैववशात् गच्छन्तं बालकं उच्चैः आजुहाव, ययाचे च तं तत् पत्रं दयया प्रक्षेप्तुम् । सोऽपि अर्भकः अश्मखण्डेन तल्लेखं संयुज्य

बध्वा, वातायनं प्रति चिक्षेप । यन्त्रोन्मुक्तः शिलीमुख इव स लेखः लक्ष्यात् अस्खलन् विजयसमीपे पपात । पत्रे वाक्यानि इमान्यासन्—

"कुटिल,

तव अभिप्रायं सन्तुष्टेन मनसा अङ्गीकुर्महे, अनुमोदामहे च । चोलतुरङ्गसेनां त्रालिपर्वतमार्गेण आनय । तत्र अस्मदीयाः *नलिककण्ठीरवाः प्रच्छन्नाः स्थापिताः । प्रतिज्ञापालने त्वया अप्रमत्तेन भाव्यम् । अवशिष्टं कर्म आस्माकीनाः सेनापतयः यथोचितं करिष्यन्ति । जये प्राप्ते, ध्रुवं त्वं चोलराज्ये पाण्ड्यराजप्रतिनिधिः भविष्यसि । अस्याः प्रतिज्ञायाः मत्कुलदेवता श्रीमीनाक्षी साक्षिणी । ... ... पाण्ड्यमहाराजः" इति ।

पत्रोपरि विलसन्ती पाण्ड्यमहीपालमुद्रा कुटिलकर्तृकस्य राजद्रोहनवनाटकस्य प्रस्तावनेव प्राकाशत । विजयः, "विजये मयि जीवति, चोलवाजिवाहिन्याः एषा आपद् नैव आपतिष्यति" इति दन्तान् कटकटाप्य हस्तौ पिष्ट्वा, स्तिमितोग्रतारः शपथं चक्रे ।

विजयस्य शरीरमेव कारागृहे इतस्ततः अचरत्, मनस्तु चोलसेनां पाण्ड्यदर्पदलनप्रस्थितां अधावत् । क्षणे क्षणे तस्य मनोव्यथा अक्षमा च ऐधेताम् । "चोलदेशजयाय अधुना त्वं विजयी विजयः" इति चोलसाम्राज्यश्रीः तं अनुरागेण आहूय कर्तव्यकरणाय अनुगृह्णाति इति तस्य मनसि कापि नूतना दैवी उत्साहशक्तिः उदियाय ।

तस्यां निशायां कारागृहपालकः एक एव आसीत्, यतः अन्ये युद्धयुक्ताः सेनायां पदातयः सञ्जाताः । अदृष्टवशात् स च अनागतपूर्वश्च । तं क्षीणभूयिष्ठेन स्वरेण विजयः आहूय, "अयि, अनलकल्पेन ज्वरेण मम शरीरं कम्पते । स्थातुमपि मे शक्तिः नास्ति । भित्तिसमीपस्थितं पर्यङ्कं मां कृपया नय । ममेदं हस्तं सुदृढं गृह्णीष्व । कारागृहवास्यपि अहं अधुना अव्याजकरुणार्हः" इति सदैन्यं ऊचे । ग्रावापि तस्य स्वरकम्पं, दौर्बल्यं च दृष्ट्वा रुद्यात्, किमुत मनुजः स्वभावतः परदुःखदुःखी । यदा सः कारागृहरक्षकः कवाटमुद्घाट्य अन्तः प्राविशत्, तदा विजयः तं अधः निपात्य, आस्यबिलं वस्त्रखण्डेन पिधाय, पर्यङ्कपादे तं सुदृढं बध्वा द्रुततरं निर्जगाम ।

निर्गतस्सः, यो मार्गः तस्य पुरतः अभवत् तेन अधावत् ।

---

* Big guns

किञ्चिद्दूरं यात्वा सः अजानात् स पन्थाः तं कारायाः बहिर्न नेष्यतीति । अन्यं पन्थानमाश्रित्य पलायमानस्सः अभिमुखं आयान्तीं धातुः आद्यां सृष्टिमिव शोभमानां तरुणीं कांचन ददर्श । सा क्रीच्कारकरणेन अन्यान् आनाय्य, तं पुनरपि बन्धनगृहे क्षिपेत् इति सः भयेन चकम्पे । परन्तु सा सुवर्णमुखी आनन्दपरवशाङ्गी विस्मितस्य तस्य पादौ ववन्दे । "भद्रे, का त्वम् ? केन कारणेन अभाग्यवन्तं अवन्द्यं मां वन्दसे" इति विजयः अप्राक्षीत् । लज्जाताम्रवदना सा पादाङ्गुष्ठार्पितकमललोचना श्रुतिमनोहरा वीणेव क्वणति स्म, "स्वामिन्, पवित्रेऽस्मिन् मम हृदयालये त्वां प्रतिष्ठाप्य प्रतिदिनं पूजयामि यौवनवसन्तसुरभितैः प्रेमकुसुमैः । सार्वभौमस्य जन्मदिवसमहोत्सवे आर्यं मद्भाग्योपचयात् अपश्यम्, अनुरागवती अभूवम्, मनस्सङ्कल्पेन पूज्यस्य पत्नी च आसम् । चिरकाल-परिचयादिव भवन्तं दृष्ट्वा अङ्गनासुलभा लज्जा मम नैव जायते । दुःखसंवेदनायैव मयि विधिना चैतन्यमाहितं मन्ये । मन्दभाग्यां मां प्रसूय जननी लोकान्तरमगमत् । व्यापाराय द्वीपान्तरगामिनं पितरमनु-गच्छन्ती, समुद्रमध्ये पोतभङ्गेन निमग्ना दैववशात् मत्स्योपजीविभिः रक्षिता । तदा वारिधितीरे क्रीडायै आगता सार्वभौमस्य महिषी मां दृष्ट्वा, उचितां चिकित्सां कारयित्वा, राजभवनं आनाययामास । शशिलेखानाम्नीं मां वात्सल्येन प्रथमसखीं चकार । न जाने मम पिता मदायत्तप्राणः, जीवति वा न वेति । तं स्मृत्वा चिरं मुक्तकण्ठं रोदितुमपि इह अवकाशः, स्वातन्त्र्यं च न भवतः । राजभवने यत् सुखमिति अन्ये प्रजल्पन्ति तदस्त्येव । किन्तु स्वातन्त्र्यं शशविषाणायते । स्वातन्त्र्यात् परं सुखं किम् ? प्रभो, मन्नाथ, मां त्वयि सतृष्णां गणय । कारागृहतुल्यात् अस्मात् राजगृहात् मां नय । इदं मम दुःखदुःखितं जन्म त्वया पूतं विभूषितं च भवतु" इति ।

यदेवोपनतं दुःखात् सुखं तद्रसवत्तरं हि । अस्वतन्त्रतायाः परां व्यथां विदितवतः विजयस्य, तां प्रति करुणा नैसर्गिकी अस्यन्दत । तस्याः सर्वातिशायि सौन्दर्यं, वचनचातुर्यं, बुद्धिकौशलं, प्रेमपौष्कल्यं च तं सम्मोहयामासुः । को वा युवा प्रकृतिगम्भीरोऽपि, धीरधिषणोऽपि सुन्दरीं, अनुरागवतीं, प्रार्थयन्तीं उपेक्षेत ? यौवनं हि 'अनासवाख्यं करणं मदस्य' ।

अयःकान्तेन लोह इव तस्याः लावण्यातिशयेन अपहृतचेताः सः क्षणमेव चाञ्चल्यं भेजे । ततः प्रशान्तेन कार्यगौरवनिवेदिना ध्वनिना बभाषे—"प्रिये, त्वया प्रार्थितः अहं कथं दुर्लभः स्याम् ? 'न रत्नमन्विष्यति मृग्यते हि तत् ।' तथाऽपि अधुना कालः नानुकूलः । आवयोः प्राणेभ्योऽपि प्रधानस्य अस्मद्देशस्य अधुना आपतिष्यन्तीं आपदं त्वं न जानासि । स्वातन्त्र्यं खलु तव अतिप्रियम् । कथं स्वतन्त्रा स्याः देशे पाण्ड्यराजहस्तगते ? अतः क्षमां वह । क्षमावती क्षेमवती भविष्यसि । अनुजानीहि मां गमनाय । कृपया मार्गं आदेशय । भवः भव्याय भवतु भवत्यै" इति ।

कारणं जानती सा कार्योपरोधिनी नाभवत् । रहस्येन सुरङ्गपथेन अनतिदीर्घेण तं अश्वालयं अनयत् । तत्र मनसः वेगसब्रह्मचारिणमिव विराजमानं वाजिरत्नं निर्दिश्य तं आरोढुं अयाचत । आरूढः सः मूर्तिमत्या चोलसाम्राज्यदेवतयेव प्रियतमया निर्दिश्यमानमार्गः निर्गत्य धावति स्म ।

रजन्यां प्रस्थिता चोलचमूः त्रिशिरःपुर्यां विश्रामहेतोः तस्थौ । तदा प्रभातप्राया आसीत् निशा । प्रधाने पट्टवस्त्रनिर्मिते विशाले मण्डपे राजराजचोलः मन्त्रिणा अनिरुद्धेन साङ्ग्रामिकान् विषयान् उन्नतभ्रूलतं पर्यालोचयन् अवर्तत । तुरगसेनानीः कुटिलोऽपि तत्र आसीत् । 'सर्वज्ञस्यापि एकाकिनः निर्णयः दोषाय' इति नीतिं स्मरन्निव, 'कुटिल, केन मार्गेण उपधानपुरी* सुप्रापा । अधुना आगतः चारः निवेदयति पाण्ड्यभूपालः उपधानपुरीप्रान्तपर्वते निगूढः अस्मान् प्रतिपालयति महता बलेन इति । इदं चोलपाण्ड्यदेशचित्रं निपुणैः पत्रार्पितं पश्य । त्रालिपर्वतमार्गाश्रयणे द्वौ अनुकूलौ मम भातः । प्रथमः, सेनायाः दीर्घयात्राश्रमपरिहारः । अपरं च मुख्यतरं शृणु । पाण्ड्यः चोलसेना अभिमुखं आपतिष्यतीति वासन्तिकं स्वप्नसुखं अनुभवति । अयं पन्थाः अस्मान् पाण्ड्यसेनायाः पृष्ठभागं नयेत् । सङ्गरे एषा स्थितिः कियदनुकूलकारिणी इति त्वमेव वेत्सि । मया अभिहितं सर्वं मनसि निधाय, त्वमपि सुनिपुणं विचिन्त्य, चित्रं च पुनः परीक्ष्य प्रत्युत्तरं ब्रूहि' इत्यशात् । (अनुवर्ति)

* Dindigul

# वृद्धभाषितम् ॥ (16)

—:o:—

आचार्यः— इयदवधि अस्मत्तः यत् श्रुतं तन्मन्ये भवद्भिः सम्यक् मतम्, बुद्धौ स्थिरं स्थापितं च।

केशवार्यः— एवम्।

रामकृष्णौ— अयं विषयः पूर्वोक्तरीत्या इदम्प्रथमं आवाभ्यां श्रुतः। तस्मात् आवाभ्यां अद्य कृतं मननं न पर्याप्तम्। इतःपरमपि बहु कर्तव्यमिति भाति। अथापि विषयो गृहीत एव। आचार्यपादाः उपरि वक्तव्यं वक्तुमर्हन्ति।

आचार्यः— सम्यगाहतुर्भवन्तौ। वेदाभ्यासस्य तद्विहितकर्मानुष्ठानस्य च तथा दीर्घः सार्वत्रिकश्च विच्छेदः समजनि, यथा तत्सम्बन्धि सर्वं अत्यन्तमभिनवमिव, अतिदुर्ग्रहमिव च भाति। यावदपेक्षं मननं भवद्भिः क्रियताम्। संशये जाते निश्शङ्कं प्रश्नः क्रियताम्। यथाबुद्धिबलं समाधास्यामः। अथाद्य अन्यत् किमपि वदामः, श्रूयताम्।

लोकयात्रायाः सम्यङ् निर्वाहस्य वेदाध्ययनं तत्प्रतिपाद्यकर्मानुष्ठानं च मूलकारणमिति सविस्तरं प्रत्यपादि। तदुभयं केन कर्तव्यम्? कस्तत्र अधिकारी? किं मनुष्यः सर्वोऽधिकारी? अथवा नियतः कश्चिदेव? इत्येवं विमर्शे जाते कथं निर्णयः।

रामकृष्णौ— यो य इच्छति स सर्वः कर्तुमर्हतीत्येव वक्तव्यम्। मनुष्याः सर्वे मनुष्यत्वेन समाः। तत्र एक इदं कर्तुमर्हति अपरो नेति वैषम्यस्य शङ्काया अपि को नामावकाशः?

आचार्यः— अनधीतशास्त्रस्य सर्वेषु कार्येषु स्वबुद्धिमात्रसचिवस्य लोकस्य अद्य या दृष्टिः सेयं सम्यगुपक्षिप्ता। अत्र यद् वक्तव्यं तदुच्यते। शृणुत। वेदाध्ययनं कार्यमिति, तत्प्रतिपाद्यो यज्ञः सर्वफलप्रद इति च शास्त्रादेव वयं विद्मः। न प्रत्यक्षेण, नानुमानेन। तेन वेदाध्ययनं यज्ञानुष्ठानं च शास्त्रसिद्धो धर्मः। न लौकिकः गमनागमनादितुल्यः सामान्यः क्रियाविशेषः।

रामकृष्णौ— ततः किम्?

आचार्यः— इदं ततः। तयोः कर्तव्यताबोधकं शास्त्रं तत्र यं कर्तारमाह तेनैव ते कर्तव्ये, नान्येन केनापि।

रामकृष्णौ— किं नाम शास्त्रमेव कर्तारं नियमयति?

आचार्यः— आम्। नियमयति।

रामकृष्णौ— कथम्?

आचार्यः— द्विजेन कर्तव्यं नेतरेणेति।

रामकृष्णौ — कथमयं पक्षपातः ?

आचार्यः— सावधानं पर्यालोचयत, कोऽत्र पक्षपाती ? किं द्विजः आहोस्वित् शास्त्रम् ? न तावत् द्विजः। सोऽपि हि शास्त्रपरवशः यथाऽन्ये। न हि सः स्वयं स्वेच्छया 'अहमध्येष्ये यक्ष्ये च। अन्ये अन्यत् कर्म कुर्वन्तु' इति व्यवस्थां चकार। 'भवताऽध्येतव्यं यष्टव्यं च। अन्यथा महत् ते पापं भविष्यति' इति शास्त्रेण शिष्टः तत्परतन्त्रः सर्वं क्लेशं सहमानः करोति। न खलु वेदाध्ययनं यजनं च नाम पायसभोजनवत् सुकरं सुखमयं च कर्म। अपि तु यथा भारवहनं कर्षणं काष्ठदलनं अन्यद्वा ईदृशं कर्म तथा ततोऽधिकतरं वा क्लिष्टं कर्मैव। अतो विधिपरतन्त्रतया निर्बन्धादेव द्विजोऽध्यैष्ट अयष्टच। अत एव हि सम्प्रति प्रायः सर्वो द्विजः ते कर्मणी परित्यज्य तूष्णीमास्ते। शास्त्रगौरवस्य प्रक्षीणत्वात् अत एव निर्बन्धविरहाच्च। यदि स्वयं ते प्रिये कथमेवं तत्परित्यागो भवेत्। तस्मात् तत्र कर्तृनियमे केवलं शास्त्रं प्रमाणम्। न तु मनुष्यः कश्चित् तत्र व्यवस्थाकारी।

अथ शास्त्रमेव किं पक्षपातीति पश्येम। न तदपि तथा। शास्त्रं सूर्यवत्सर्वसाधारणम्। मातापितृवच्च पुत्राणाम्। द्विजस्य अध्ययनयजने विदधानं सत् अद्विजस्य तदपेक्षितसर्वसाहाय्यकरणं कर्तव्यं बिदधाति। एवं द्विजाद्विजभेदेन भिद्यमानेषु मनुष्येषु कैश्चिदध्ययनादि कार्यं अन्यैः तत्साहाय्यं कार्यम्, इति लोकयात्राप्रवृत्तिसामीचीन्याय शास्त्रेण कर्मविभागे क्रियमाणे को नाम विवेकी तत्र पक्षपातमारोपयेत् ?

रामकृष्णौ— अद्विजा अधीयतां यजन्तं च। द्विजास्तेषां शुश्रूषां कुर्वन्तु। ततः किं भवेत् ?

आचार्यः— प्रमाणभूतस्य शास्त्रस्यातिलङ्घनात् प्रथमं उभयेषां पापं तावदनिवार्यम्। ततःपरं उक्तरीत्या लोके योगक्षेमनिर्वाहमूलकारणभूतयो वेदाध्ययनयजनयोः शास्त्रोक्तरीत्या अननुष्ठानात् जनानां सर्वविधानि सङ्कटानि भवेयुः। महान् क्षोभो भवेत्।

'यो य इच्छति स सर्वः कर्तुमर्हति' इति यद् भवद्भ्यामुक्तं तत्र इदमवधातव्यम्। यदि इच्छायां सत्यां कर्तव्यमिति भवेत् तर्हि इच्छाविरहे न कर्तव्यमित्यपि भवेत्। तत्तु शास्त्रं न सहते। लोकक्षेमौपयिकतया अवश्यकर्तव्यं तन्मनुते। केन कर्तव्यमित्याकांक्षायां द्विजेन कर्तव्यमित्याह। अन्यथा अभिमताय फलाय न कल्पेत, विपरीतफलाय च कल्पेतेत्यभिप्रायः।

# प्रकृतिभेदः ॥

माता— त्वरस्व, अम्ब। कल्याणमिति हि आह्वयन्ति स्म। ताम्बूलग्रहणाय गन्तव्यम्। यावद्वधूवरौ पीठे उपविष्टौ स्तः, तावद् गन्तुमुचितम्। उत्तिष्ठ, मा विलम्बिष्ठाः।

पुत्री— नाहं तत्र गमिष्यामि।

माता— कस्मात्?

पुत्री— न नवीनं चेलमस्ति। न नवीनं कञ्चुकमस्ति। किं धृत्वा गच्छेयम्? न च मुखचूर्णोऽस्ति। किमालिप्य गच्छेयम्? 'सर्वं क्रीत्वा दास्यामि, क्रीत्वा दास्यामि' इति वदन्नास्ते पिता, न तु क्रीणाति।

माता— किं पितरमुक्त्वा। रूप्ये आगते सर्वं क्रेष्यत्येव। अनेनैव चेलेन याहि। इदमपि समीचीनमेवास्ति। अथवा यादृशतादृशमस्तु नाम ते चेलम्। किं त्वामेव तत्र सर्वे द्रक्ष्यन्ति?

II

पुत्री— अम्ब, अनन्तरगृहवासिनी कल्याणे ताम्बूलग्रहणाय गच्छति। अहमपि तया सह गत्वा आगमिष्यामि।

माता— तथा नाम कुरु। किन्तु मुखं क्षालयित्वा परिमृज्य अभिनवं तिलकं कुरु। नवीनं चेलं कञ्चुकं च धारय। ततो गच्छ।

पुत्री— नाहं तत् सर्वं कुर्याम्। यथाऽहमिदानीमस्मि तथैव गमिष्यामि।

माता— कस्मात्?

पुत्री— उद्दामवेषां मां सर्वे तत्पराः पश्येयुः। दुर्भरा लज्जा मां बाधेत।

माता— सम्यक् तावदस्ति। किन्नाम त्वादृशी अपरा स्त्री लोके अद्य वर्तेत?

# पुस्तकपरामर्शः ॥

घनवृत्तम्। श्री कोराड रामचन्द्रकविप्रणीतम्।
Sri Ramakrishnaiya, 33. Singarachari Street, Triplicane, Madras. —अस्मात् लभ्यम्। एकरूप्यमूल्यकम्

महादेवशास्त्रीति महापुरुषः कश्चिदासीत्, सः श्रीशैलपर्वते तपस्तप्त्वा भ्रमराम्बिकां साक्षात्कृत्य

"विद्यां विधेहि दययाऽमृतसारवत्या
ह्यासप्तमान्मम कुलोद्भवपूरुषाणाम्।"

इति प्रार्थ्य 'तथाऽस्तु' इति तस्या अनुग्रहेण वरं लेभे। तस्मान्मूलपुरुषात् दशमोऽयं रामचन्द्रकविरिति वदन्ति। प्राच्यगोदावरीमण्डलान्तर्गतनडवपल्लीग्रामे आङ्गल १८१६ तमे वत्सरे जातः १९०० तमे कीर्तिशेषो बभूव।

आन्ध्रयां संस्कृते च विशिष्टमस्य पाण्डित्यं कवित्वं च। भाषाद्वयेऽपि बहुग्रन्थकारः। प्रस्तुतं घनवृत्तं सर्गद्वयात्मकम्। अवसाने अल्पं भागं विनाऽन्यत्र सर्वत्र मन्दाक्रान्तावृत्तमयम्। कालिदासस्य मेघदूतकाव्यं यक्षसन्देशमात्रं विस्तरेण वर्णयित्वा विरमति। सन्देशग्रहणात्परं घनेन इदं कृतमिति किमपि वृत्तं प्रतिभाविशेषेण परिकल्प्य तदयं रामचन्द्रकविः अत्र वर्णयति। अलकायां यक्षकान्तायाः सविधं गतो मेघः तस्याः प्रत्ययार्थं यक्षमापादचूडं वर्णयित्वा ततः परं अनुरागदार्ढ्यप्रत्यायनाय, यक्षस्य तीव्रतपोनिष्ठत्वशङ्किना इन्द्रेण तत्समाधिभङ्गाय तत्सविधे अप्सरःप्रेषणं, तत्कृतानां प्रलोभनानां नैष्फल्यं च उपवर्ण्य प्रथमं सर्गं समाप्य, अनन्तरे सर्गे, मेघं प्रति विरहदशायां यक्षकान्तया कृतं श्रीदेवीपूजनतदनुग्रहादिकं सखीमुखेन निवेद्य तदनन्तरं साक्षात्तयैव निवेदितानि स्वकान्तस्य स्वस्य च रहोवृत्तानि बहूनि निबध्य, ततस्तदनुमतस्य मेघस्य यक्षसमीपागमनं, यक्षस्य काले प्राप्ते अलकागमनं, कान्तासंयोगं, कुबेरानुग्रहं च प्रतिपाद्य काव्यमुपसंहरति कविः।

अस्य कवेः पौत्रः श्री के. रामकृष्णय्य M. A., महाशयः आन्ध्रीनिष्णातः उदारहृदयः सोत्साहं इमामन्याश्च स्वपूर्वपुरुषकृतीः मुद्रयित्वा प्रकाशयतीति सहृदयानामतीव सन्तोषस्थानमेतत्।

SANSKRIT ... VIDYAPEETHA TIRUPATI

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५६ मन्मथ - धनुः [ सं ४

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

DECEMBER 1955

For the rate of subscription please see inside

# UDYANA PATRIKA

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखा ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* **D.T. Tatacharya Siromani, M. O. L.**
TIRUPATI.

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः—श्रीगीतार्थदीपः १४५—१५२

T. 32

स्कारोऽत्र संन्यासः । यथोपदिष्टयोगेन ज्ञानाकारतापन्नकर्माणं, आत्मज्ञानेनात्मनि सञ्छिन्नसंशयं आत्मवन्तं - उपदिष्टार्थे दृढावस्थितमनसं बन्धहेतुभूतप्राचीनकर्माणि न निबध्नन्ति—अनिष्टादिरूपं फलं नारभन्ते हे धनञ्जय ।

ஓ அர்ஜுனா !

ஆத்மதத்வஜ்ஞானம் சேருவதினால் தானே கர்த்தா என்பது போன்ற புத்தியை த்யாகம் செய்து கர்மாவை அநுஷ்டிப்பவனும் ஆத்மவிவேகத்தினால் ஆத்மாவைப்பற்றிய ஸந்தேஹமற்றவனும், உபதேசிக்கப் பெற்ற பொருளில் பிறரால் அசைக்க வொண்ணாத மனவலிமையுடையவனுமான புருஷனுக்கு அவன் அநுஷ்டிக்கும் கர்மாக்கள் பந்தகங்களாக மாட்டா. 41

२०४ तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥

ओं तत् सत्

इति

श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम
चतुर्थोऽध्यायः ।

---

एवं विस्तरेणोपपाद्योपसंहृतोऽर्थोऽर्जुनं प्रति कर्तव्यतया निगम्यते । यस्मात् संशयात्मा विनश्यति, यस्माच्च ज्ञानसञ्छिन्नसंशयं न कर्माणि निबध्नन्ति, तस्मात् विशेषाग्रहरूपाज्ञानहेतुकं हृत्स्थं - आन्तरं, एनं - आत्मविषयं, संशयं, आत्मनः ज्ञानासिना - आत्मविषयकज्ञानरूपासिना, छित्वा मयोपदिष्टं कर्मयोगमातिष्ठ । तदर्थमुत्तिष्ठ । भारत । महायोगिभरतकुलसम्भूतस्य तव स्वधर्मभूतयुद्धार्थमुत्थानमेव कर्मयोगार्थमुत्थानम् ।

ஆத்ம விஷயத்தில் ஸந்தேஹமுடையவன் நஷ்டனாய் விடுகையாலும் ஆத்மஜ்ஞாநிக்கு கர்மாக்கள் பந்தகங்களல்லாமையாலும் அஜ்ஞாந மூலகமான ஸந்தேஹத்தை ஆத்மவிவேகமாகிற தெளிவாளால் போக்கி இந்த கர்மயோகத்தை அநுஷ்டாநம் செய்யவேண்டும். பரதவம்சத்திலே பிறந்த நீ யுத்தமாகிற கர்மாவை அநுஷ்டாநம் செய்தற்காக எழுந்திருப்பாயாக.

इति श्रीगीतार्थदीपे चतुर्थोऽध्यायः ।

---

## अथ पञ्चमोऽध्यायः ।

---

अर्जुन उवाच—

२०५ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

तृतीयचतुर्थयोरध्याययोः सुकरत्वज्ञानाकारत्वादिकं कर्मयोगस्योक्तम् । इदानीं तस्यात्मप्राप्तिसाधनत्वे ज्ञानयोगापेक्षया शैघ्र्यं तदितिकर्तव्यतारूपोऽकर्तृत्वानुसन्धानप्रकारः तन्मूलकस्समदर्शनरूपो ज्ञानविपाकश्चोच्यते । "अथ 'तद्विद्धि प्रणिपातेन' इत्येतदनुसन्दधानोऽनुक्तमपेक्षितमंशं सञ्जिज्ञासुरुक्तमेवार्थं परिपृच्छन्नर्जुन उवाच—" हे कृष्ण ! कर्मणां सन्न्यासं - ज्ञानयोगं, पुनः कर्मयोगं च शंससि । तथा हि—'कषायनिवृत्त्यर्थः कर्मयोगः, तन्निवृत्तौ कर्मयोगं परित्यज्य ज्ञानयोग उपादेयः । अतो ज्ञानयोग एवात्मदर्शने साक्षात्साधनमिति द्वितीये प्रतिपादितम् । पुनस्तृतीयचतुर्थयोः 'कर्मनिष्ठैव ज्यायसी, सैव ज्ञाननिष्ठानिरपेक्षा आत्मप्राप्तौ साधन'मिति कर्मनिष्ठां प्रशंससि । मृदितकषायस्य कर्मयोगस्त्याज्यश्चेत् कथमुपादेयः, ज्ञानयोगस्य दर्शनसाधनत्वे कथमन्य-

त्वधानेन कर्मयोगमात्रेणात्मदर्शनसम्भवः।' कर्मणामित्येतत् सन्न्यास-योगशब्दयोरुभयोरप्यन्वेति । तत्र—द्वयोरव्यवहितसाधनत्वे विवक्षिते, एकमिति श्रेयश्शब्दविशेषणम् । अतो नपुंसकम् । एतयोः ज्ञानयोग-कर्मयोगयोः, आत्मप्राप्तिसाधनभावे यदेकं सौकर्यात् शैघ्र्याच्च श्रेयस्सुनि-श्चितं · श्रेष्ठत्वेन सुनिश्चितं तन्मे ब्रूहि ।

அர்ஜுனன் சொன்னான்—

ஓ க்ருஷ்ண ! ஜ்ஞாநயோகமே ஆத்ம தர்சநத்திற்கு ஸாக்ஷாத்தாக ஸாதநம் என்றீர். மறுபடியும் ஜ்ஞாநயோகமின்றிக்கே கர்மயோகமே அதற்குக் காரணமென்று கர்மயோகத்தைப் புகழ்கின்றீர். இவ்விரண்டிற்குள் சீக்ரமாக ஆத்மாவலோகநம் செய்விப்பதிலும், ஸௌகர்யத்திலும் எது சிறந்ததாக தேவரீருடைய தீர்மானத்திலுள்ளதோ அதை எனக்குச் சொல்லவேணும்.

श्री भगवानुवाच—

२०६ संन्यासः कर्मयोगश्च निश्श्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥ २ ॥

पृथक्स्वातन्त्र्यगर्भस्समुच्चयोऽत्र चकारार्थः । सन्न्यासः - ज्ञान-योगः, कर्मयोगश्च ज्ञानयोगशक्तस्याप्युभौ निरपेक्षौ निश्श्रेयसकरौ । सद्वारकत्वाभिधानं तु अधिकारिविशेषनियतम् । निश्श्रेयसहेत्वोस्तयोर्मध्ये ज्ञानयोगमपेक्ष्य कर्मयोगो विशिष्यते । द्वावप्यनियमेन यथेच्छमुपा-देयौ इति शङ्काव्युदासाय तुशब्दः ।

ஸ்ரீ பகவான் சொன்னார்—

ஜ்ஞாநயோகமும் கர்மயோகமும் தனித்தனியே மோக்ஷ ஸாதநங்கள். அவற்றுள் ஜ்ஞாநயோகத்திலும் கர்மயோகமே சிறந்தது. 2

२०७ ज्ञेयस्स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥ ३ ॥

कुत इति चेत्— यः - कर्मयोगी तदन्तर्गतात्मानुभवतृप्तः तद्व्यतिरिक्तं किमपि न काङ्क्षति, अन्यनिरपेक्षत्वादेव किमपि न द्वेष्टि। काङ्क्षा हि प्रतिहन्यमाना द्वेषहेतुः। तत एव निर्द्वन्द्वः - द्वन्द्वसहश्च, सः नित्यज्ञाननिष्ठ इति ज्ञेयः। हिशब्दो नित्यसंन्यासित्वे हेतुपरः। यस्मात्कारणात् सुकरकर्मयोगनिष्ठतया सुखं बन्धात् प्रमुच्यते। ततस्स नित्यसन्न्यासी ज्ञेयः।

கர்மயோகநிஷ்டனான யாவனொருவன் அதிலடங்கிய ஆத்மாநுபவமாத்திரத்தினாலே த்ருப்தி பெற்று மற்றவற்றில் விருப்பு வெறுப்புகளின்றி ஸுகதுக்கங்களை ஸஹித்து வருகின்றான்; அவன் எளிதில் ஸம்ஸாரபந்தத்தில்நின்று விடுதலையடைகிறான். ஆதலால் அவன் நித்யஜ்ஞாநநிஷ்டன் என்று அறியவும். 3

२०८ साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितस्सम्यगुभयोर्विन्दते फलम् ॥ ४ ॥

'निःश्रेयसकरावुभौ' इत्यभिप्रेतं विवृणोति— सङ्ख्यया - बुद्ध्या अवधारणीयमात्मतत्त्वं साङ्ख्यम्। तदवधारणरूपं साङ्ख्यम्। योगश्चात्र कर्मयोगः। ज्ञानयोगकर्मयोगौ फलभेदात् पृथग्भूतौ ये प्रवदन्ति, ते बालाः - अनिष्पन्नज्ञानाः, न पण्डिताः - अकृत्स्नविदः। कर्मयोगो ज्ञानयोगमेव साधयति ; ज्ञानयोग एवात्मावलोकनं साधयतीति तयोः फलभेदेन पृथक्त्वं वदन्तो न पण्डिताः। अपक्वलौकिकज्ञानाः बालाः। सदाचार्यप्रसादैकगम्यार्थविषयं 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य' इत्यादिप्रसिद्धं ज्ञानमिह पाण्डित्यम्। अतो 'बालाः' 'न पण्डिताः' इत्यनयोर्न पुनरुक्तिः। उभयोरिति निर्धारणे षष्ठी ; एकशब्दश्चान्यतरपर्यायः उभयोर्मध्ये अन्यतरं कर्मयोगं ज्ञानयोगं वा आस्थितोऽपि सम्यगात्मावलोकनरूपं फलं लभते।

ஜ்ஞாநயோக கர்மயோகங்களுக்கு பலம் வெவ்வேறு என்பவர்கள் லௌகிகஜ்ஞாநமும் ஆசார்யோபதேச மூலமான தெளிவும் இல்லாதவர்கள். இவ்விரண்டு யோகங்களிலொன்றை அநுஷ்டித்தலாலேயே ஆத்மஸாக்ஷாத்காரமாகிற பலத்தைப் பெறுகிறான். 4

२०९ यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ ५ ॥

भिन्नफलत्वेन पृथक्त्वाभिधायिनां निन्दा कृता ; अथैकफलत्वेनैक्याभिधायिनां प्रशंसनं क्रियते—"स्थानशब्दोऽत्र 'विन्दते फलम्' इत्यादिवत् फलविषयः, न तु देशविशेषविषयः, ज्ञानयोगादिमात्रप्राप्यदेशविशेषाभावात् । तच्च फलं पूर्वोत्तरानुवृत्तमात्मावलोकनम् ।" साङ्ख्यैः - ज्ञाननिष्ठैः, यत् आत्मावलोकनरूपं फलं प्राप्यते ; तदेव कर्मयोगनिष्ठैरपि प्राप्यते । एकम् - एकफलत्वेनैकम्, वैकल्पिकं साङ्ख्यं योगं च यः पश्यति स पश्यति - स पण्डितः । अङ्गाङ्गिभावेतरेतरयोगरहितयोरुपाययोरेकफलत्वलक्षणं ह्यैक्यमनुष्ठाने विकल्पाय स्यात् । 'स पश्यति' इत्येतत् 'न पण्डिताः' इत्येतत्प्रतिरूपम् ।

ஜ்ஞாநயோகநிஷ்டர் பெறும் ஆத்மஸாக்ஷாத்காரமாகிற பலமே கர்மயோக நிஷ்டராலும் அடையப்படுகின்றது. இவ்வாறு இரண்டிற்கும் பலமொன்றேயாகையால் ஸாங்க்யம் யோகம் இரண்டையும் ஒன்றாக யாவனொருவன் அறிகின்றானோ அவனே பண்டிதன். 5

२१० सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥

सौकर्यशैघ्र्याभ्यां 'कर्मयोगो विशिष्यते' इति पूर्वोक्तं वैशिष्ट्यम् । फलस्यात्यन्ततुल्यतया च 'साङ्ख्ययोगौ पृथग्बालाः' इत्यादिनोक्तः विकल्पः । अधिकारिभेदप्रतिनियतत्वाच्च न दुष्करविलम्बितोपायनैरर्थक्यम्, इत्यभिप्रायेण वैषम्यमुच्यते—महाबाहो - युद्धाख्यकर्मयोगानुष्ठानौपयिकबाहुबलशालिन् । तुशब्दोऽन्योन्यवैषम्यपरः । सन्न्यासः - ज्ञानयोगस्तु, अयोगतः - कर्मयोगादृते, आप्तुं दुःखम् - प्राप्तुमशक्यः । 'शक्यमरविन्दसुरभिः ... आलिङ्गितुं पवनः' इत्यादिव दुःखशब्दस्यात्र नपुंसकत्वम् । योगयुक्तः स्वयमेव मुनिः - आत्ममननशीलः, सुखेन कर्मयोगं साधयित्वा नचिरेण - अल्पेनैव कालेन, ब्रह्माधिगच्छति - स्वात्मानं साक्षात्करोति । नगनैकादिवत नचिरेणेति समस्तप्रयोगः ।

*ஜ்ஞாநயோகத்தை கர்மயோகமில்லாமல் அடையமுடியாது. ஆத்மஜ்ஞாநத்துடன் கர்மயோகத்தை அநுஷ்டிப்பவன் சீக்கிரத்திலேயே ஆத்மஸாக்ஷாத்காரம் பெறுகிறுன்.* 6

२११ योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

कर्मयोगस्य सुखसाध्यत्वे शीघ्रफलाधिगमे च हेतुरुच्यते— पूर्वात्मशब्दौ मनोविषयौ, जितेन्द्रियपदसमभिव्याहारात् । कर्मयोगयुक्तः विशुद्धात्मा - रजस्तमस्तन्मूलकरागद्वेषादिकषायनिवृत्तमनाः, विजितात्मा स्वाभ्यस्ते कर्मणि व्यापृतमनस्त्वेन सुखेन विजितमनाः, जितेन्द्रियः - सर्वेन्द्रियकूटस्थस्य मनसो जयात् विजितबाह्येन्द्रियः, सर्वभूतात्मभूतात्मा सर्वेषां भूतानां देवादीनां आत्मभूत आत्मा यस्यासौ । स्वस्य देवादीनां चैकाकार आत्मा । यथा सर्वस्मिन् गृहे वर्तमानो व्रीहिरयमेवेत्युक्ते तज्जातीयत्वमुक्तं भवति ; तद्वदत्रापि सर्वस्मिन् देहे वर्तमानोऽयमेवात्मेति प्रयोगेऽपि देहान्तरवर्तिनामस्य चात्मनस्समानत्वमुक्तं भवति । स एवंभूतः कर्म कुर्वन्नपि न लिप्यते - अनात्मनि आत्माभिमानेन आत्मसाक्षात्काराख्यफलविरोधिना न सम्बध्यते ।

*கர்மயோகாநுஷ்டாநம் செய்பவன் அதனுல் மனத்தூய்மை பெற்று மனத்தையும் மற்ற விந்திரியங்களையும் வென்று எல்லா ஆத்மாக்களும் ஞாநாகாரங்களென்று தெளிவு பெற்றவன். ஆகலால் கர்மாவை அநுஷ்டித்தாலும் ஆத்மஸாக்ஷாத்கார விரோதியான யாதொன்றுேடும் ஸம்பந்தம் பெறமாட்டான்.* 7

२१२ नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्छृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपञ्छ्वसन् ॥

२१३ प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

सौकर्याच्छैघ्र्याच्च कर्मयोग एव श्रेयानित्युक्तम् । तदपेक्षितविशेष उच्यते— युक्तोऽत्र योगनिष्ठः ; तत्त्ववित् - तदन्तर्गतात्मतत्त्वविज्ञान-

वान्, दर्शनश्रवणस्पर्शनघ्राणाशनात्मकान् ज्ञानेन्द्रियव्यापारान्, गमन-प्रलपनविसर्गग्रहणात्मकान् कर्मेन्द्रियव्यापारान्, स्वापश्वासोन्मेषनिमेषात्मकान् प्राणव्यापारांश्च कुर्वन्, ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि प्राणाश्च स्वविषयेषु वर्तन्त इति अनुसन्दधानो नाहं किञ्चित्करोमीति मन्येत - ज्ञानैकस्वभावस्य मम कर्ममूलेन्द्रियप्राणसम्बन्धकृतमीदृशं कर्तृत्वं न स्वरूपप्रयुक्तमिति मन्येत।

கர்மயோக நிஷ்டனுப் ஆத்மஜ்ஞாநம் பெற்றவன் பார்வை முதலிய ஜ்ஞாநேந்திரிய வ்யாபாரங்களையும் நடை முதலிய கர்மேந்திரிய வ்யாபாரங்களையும் தூக்கம் முதலிய ப்ராண வ்யாபாரங்களையும் செய்துகொண்டிருக்கச் செய்தே அவ்வவ் விந்திரியங்களும் ப்ராணங்களும் தங்கள் தங்கள் விஷயங்களிலே நிற்கின்றன வென்று எண்ணக்கடவன். நான் யாதொரு வ்யாபாரமும் செய்கிறேனல்லேன், கர்மமூலமாக இந்திரியங்களோடும் ப்ராணங்களோடும் ஸம்பந்தம் பெற்றதனுல் இந்த வ்யாபாரம் எனக்கு ஏற்பட்டது. இயற்கையாக வந்ததன்று என்று நினைத்தல் வேண்டும். 8–9

२१४ ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

उक्तरीत्याऽनुसन्धानेऽपि प्रकृतिसंसर्ग एवैनं देहात्मभ्रमे निमज्जयेदिति शङ्का निराक्रियते— ब्रह्मशब्देन प्रकृतिरिहोच्यते। 'मम योनिर्महद्ब्रह्म' इति हि वक्ष्यते। इन्द्रियाकारेणावस्थितायां प्रकृतौ पश्यञ्छृण्वन्नित्यादिना पूर्वोक्तानि कर्माणि आधाय - निक्षिप्य, फलसङ्गं त्यक्त्वा नैव किञ्चित्करोमीति यः कर्माणि करोति, सः पद्मपत्रमम्भसा संसृष्टमपि यथा न सम्बध्यते, तथा प्रकृत्यात्माभिमानरूपेण बन्धहेतुना पापेन न सम्बध्यते।

முன்கூறிய இந்திரிய வ்யாபாரங்களை ப்ரக்ருதியின் கார்யங்களாக எண்ணி பலங்களில் பற்றுதலின்றிக்கே யாவனொருவன் கர்மாக்களைச் செய்கிருனே அவனிடம் தாமரை இலையில் ஜலம்போல் பாபமானது ஸம்பந்தம் பெறுவதில்லை. 10

[ उद्यानपत्रिका XXIX-4

२१५ कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ॥ ११ ॥

एवमुक्तार्थदृढीकरणाय शिष्टाचारसिद्धतोच्यते— बुद्धिरत्र कृत्यध्यवसायः । 'केवलैः' इति कर्तृत्वाभिमानत्यागो विवक्षितः । कायमनोबुद्धिकेवलेन्द्रियैस्साध्यं कर्म स्वर्गादिफलसङ्गं त्यक्त्वा योगिनः आत्मगतप्राचीनकर्मबन्धविनाशरूपात्मविशुद्ध्यर्थं कुर्वन्ति ।

உடல், மனது, எண்ணம், இந்திரியங்கள், ஆகிய இவற்றால் உண்டாகும் கர்மாவை, பலத்தில் பற்றுதலில்லாமல் ஆத்மாவின் கர்மபந்தம் விலகுவதற்காக யோகிகள் செய்துவருகிறார்கள். 11

२१६ युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥

एकस्यैव कर्मणो बन्धहेतुत्वं मोक्षहेतुत्वं च फलसङ्गतदभावादिरूपसहकारिविशेषाद्युज्यते, इतीममर्थं विशदयति—अत्र युक्तशब्देन समाहितचेतस्त्वमुच्यते, तच्चात्र फलान्तरविरक्तिपूर्वकमात्मप्रावण्यमेव । युक्तः आत्मव्यतिरिक्तफलेष्वचपलः आत्मैकप्रवणः, कर्मफलं त्यक्त्वा केवलमात्मशुद्धये कर्मानुष्ठाय नैष्ठिकीं शान्तिमाप्नोति-स्थिरामात्मानुभवरूपां निर्वृतिमाप्नोति । निष्ठायां भवतीति नैष्ठिकी । अयुक्तः - आत्मव्यतिरिक्तफलेषु चपलः, कामकारेण - कामकर्तृकप्रेरणेन, फले सक्तः कर्माणि कुर्वन् निबध्यते - नितरां बध्यते, नित्यसंसारी भवति ।

ஆத்மஸாக்ஷாத்காரத்திலேயே ஊற்றமுடையவனாய் கர்ம பலன்களில் நோக்கமின்றிக்கே கர்மானுஷ்டானம் செய்யுமவன் ஸ்திரமான ஆத்மானுபவஸௌக்கியத்தைப் பெறுகிறான். அதில் ஊற்றமின்றிக்கே கர்மத்தினால் தூண்டப்பெற்று பலன்களில் நோக்கத்துடன் கர்மானுஷ்டானம் செய்பவன் நித்ய ஸம்ஸாரியாகின்றான். 12

SANSKRIT VIDYA... TIRUPATI

२१७ सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 5

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५६ मन्मथ - मकर [सं ५

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

JANUARY 1956

For the rate of subscription please see inside

# UDYANA PATRIKA


Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।



निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.

TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,

*Proprietor,* The Srinivasa Press,

Thiruvaiyaru P. O., Tanjore Dt.


# विषयाः ॥


1 शृङ्गारनारदीयम्।

2 वरदाभ्युदयचम्पूः।

3 मुकुन्दमाला।

4 संस्कृतपुनरुद्धारणम्।

5 नृगोपाख्यानम्।

6 वृद्धभाषितम्।

7 वीरलब्धं पारितोषिकम्।

8 प्रकृतिभेदः।

9 पुस्तकपरामर्शः।

३७
४७
T.RUPATI

(शिरस्यङ्गुल्या अभिघ्नन्) कष्टम्, कष्टम् । इदमपि प्रेक्षितव्यमासीन्नारदस्य । कीदृशमद्य प्रभातम् । अनयोः खलु मया क्षणमात्रं मोहनागारसौविदल्लत्वमध्यवोढ । मूहूर्तादध्यकारिष्यत च मयाऽनयोर्युवदम्पत्योः कवाटोद्घाटनमाङ्गलिकवन्दित्वम् । (सानुशयम्) अहो बत मन्मथविहारसरःकोकयोरनयोरन्तरा नैशाकरकरविभीपिकायितं दुर्विदग्धेन मया । दुःखं खलु परविस्रम्भपरिपन्थितया प्रक्रमणम् । विशेषतो रतिनर्मनिर्मथनम् । पाप्मना परिलिप्तमिवात्मानं पश्यामि । (शिरो धून्वन्) शान्तम् पापम् । प्रतिहतममङ्गलम् । स्वस्त्यस्त्वनयोरखण्डितोद्दामस्मरविस्रम्भरसयोः गन्धर्वदम्पत्योः कुत्राप्यन्यस्मिन् निर्मक्षिके पर्वतोद्देशे । न पुनरेवं नारदेनान्तरायेण भवितव्यम् । भवतु अघमर्षणस्नानं कृत्वा पाप्मानमपनोत्स्ये । नारायण, नारायण, (इति वीणां तीरे निधाय सरोऽवतरति)

ततः प्रविशति

ऋक्षरजाः—

आसं प्रसूरर्कमहेन्द्ररेतः—
सन्धारिणी वानरलोकभर्त्रोः ।
तयोस्ततः पोषयिता पिता च
या स्त्री पुमानृक्षरजाः स एकः ॥

स्त्रीत्वे पुंभोगसौख्यं मे प्रसादादिन्द्रसूर्ययोः ।
पुंस्त्वे पुनरभूदेवं (निश्वस्य) हन्त भो नैष्ठिकव्रतम् ॥

(निमित्तं सूचयित्वा सोच्छ्वासम्) अथवा,

अपरिमितमिहासं वर्तयन् कालचक्रं
ह्रदमिममभिकांक्षंस्तत्स्मरन् तातवाक्यम् ।
सपदि कथयतीव प्रस्फुरन् दक्षबाहुः
परिणतमपि कालादद्य मे पुण्यराशिम् ॥

यदि निमित्तेन न वञ्चनीयोऽस्मि,

अद्योदेष्यति सरसः प्रमदा मम दारतारताभिमता ।
पद्मा दुग्धनिधेरिव तूर्णं दुर्ब्रह्मचर्यचौरी मे ॥

(विलोक्य सहर्षम्) ही हि भोः । स्वयं तटस्थोऽप्ययं वीणादण्डः मेऽद्य पूर्णपात्रमपहरति । (विमृश्य) किं नारी वा नरो वा सरोऽवगाढः । अथ वा, उभयथाऽपि प्रियं नः ।

पुमान् रूपवती नारी नारी स्याद् गाढयौवना ।
सुन्दरीसरसि स्नात्वा यस्या ऋक्षरजाः पतिः ॥

तत् त्वरयिष्याम्युन्मङ्क्ष्यमाणाम् । (इति वीणादण्डमादाय वादयति)

नारदः— (शनैः स्नानादुन्मज्जन्) अहह, अतिदुर्विषहशैत्यमहिम्ना उद्वेजितसर्वशरीरधातुना अमुना वारिणा विक्षुद्य तुषारमयीमिवान्यां घनीभूतां मूर्तिमुपलम्भितोऽस्मि । (विलोक्य) कोऽपि वानरो महतीं विलोडयति (सनिर्भर्त्सनम्) हुं भोः अपेहि, अपेहि, क्षुद्रवानर, अपेहि । हुम् (इति सरभसं तीरमुपासीदति ।)

ऋक्षरजाः— (सवीणावादनं नृत्यन् गायति)

उपेहि ललने, मदीयदयिते ।
अपाङ्गवलने, कृपाऽस्तु मयि ते ॥

विभीहि मा मे प्रियस्तवाहम् ।
विधातृसृष्टं, वृणीष्व रुष्टे ॥

प्रसीद वामे, निषीद पार्श्वे ।
चिरेण भज मां, वरेण वपुषा ॥

यदर्थमेवं, सरस्समुदिता ।
रमेव सिन्धो – रुपेन्द्रदयिता ॥

ममाद्य पाकोन्मुखं हि सुकृतम् ।
मृगेक्षणा त्वं यदाविरासीः ॥

तन्मे मनश्चौरि चकोरनेत्रे
कुचोपपीडं परिरभ्य गात्रम् ।

अप्राप्तिशंकाज्वरदीप्यमानं
चिरेण निर्वाणमिदं विधेहि ॥

(इत्युपसर्तुमिच्छति)

नारदः—(सक्रोधम्)

हा क्षुद्र वानर (अपवार्य) हहा वनिता किमासं,
हा नारदः क्नु गतः (प्रकाशम्) किमरे हताश ।
वीणां विलोडयसि मे महतीं (अपवार्य) कथं भो
धिक् कुत्सितं युवतिवर्ष्म ममाविरासीत् ।

ऋक्षरजाः— (वीणामधोनिधाय सानुरोधं हस्तौ प्रसारयन्) अयि, मन्मनःप्रमाथविद्ये, सौन्दर्यसारनिषद्ये, अनवद्ये, प्रसन्नेन चक्षुषा पश्य मां त्रुटिमात्रं त्वन्मुखारविन्दमिलिन्दायितं ते दयितम् ।

कान्ते नितम्बिनि शुभाननचन्द्रशोभे
बर्हातिभारकबरीभरितांसदेशे ।
मत्तेभकुम्भपरिणाहिपयोधराढ्य-
वेल्लत्तलोदरतनो भज मां प्रसीद ॥

नारदः— आः पापिष्ठ, मर्कटपाश, नारदोऽहं ब्रह्मणः प्रथमः पुत्रः । किं मुधा चापलं व्रजसि । शप्तोऽसि यदि परिस्पन्दसे ।

ऋक्षरजाः— (सोपहासम्) हुम् नारदः । नारदः । कुतोऽद्य नारदः ।

नारदो रदना जातो देवर्षियोषिदुत्तमा ।
ब्रह्मणः प्रथमः पुत्रस्तस्यैवानुत्तमा स्नुषा ॥

अयि मुग्धे,

विद्धि मां ब्रह्मणो जातं यदृच्छालोचनाश्रुणा ।
कल्पिता तेन जाया मे सरसोऽस्मात् त्वमुत्थिता ॥

तदलं मां परिहृत्य,

> अम्भोरुहाक्षि हरिणीचपलाक्षि मन्द-
> मन्दाक्षमीलितमनोहरकुड्मलाक्षि ।
> मामाशु भावय मनोभवसायकौघ-
> शाणायितायतसिताञ्चलकुञ्चिताक्षि ॥

नारदः— (सक्रोधाटोपम्) अरे कामुकपशो, किं मे हठात् प्रधर्षण-मिच्छसि । ध्वस्तोऽसि यद्यविनयं न रक्षसि ।

ऋक्षरजाः— (सातङ्कं निवृत्य) अयि, निरनुरोधे, दयस्व मयि । इदानीं खलु,

> आघूर्णतेऽतिचकितैस्तव लोचनान्तै-
> र्धूमायते त्वदलकैर्घनराजिनीलैः ।
> क्षुभ्यत्यकाण्डरचितोत्कटभङ्गतुङ्ग-
> भ्रूविभ्रमेण तव मुखेन च मानसं मे ॥

(इति हस्तौ निष्पिंषन् सचकितदैन्यानुरोधविलक्षमुखो दूरत-स्तिष्ठति)

नारदः— (स्वगतम्) अये महदिदं प्रहसनं संवृत्तम् । लोकोपहासव्यस-निनो नारदस्येदं वृद्धिपरिगुणितं निर्यातनम् । सत्यमेव,

> नारदो रदना जातो महर्षिर्योषिदुत्तमा ।
> ब्रह्मणः प्रथमः पुत्रस्तस्यैवानुत्तमा स्नुषा ॥

किं मे पितुरिदमखिलमभिमतम् । अहो शाठ्यं लोकपितामहस्य । इदानीं मर्कटहस्ते पतितः निष्प्रभावो नारदः । अनेन किल मया गार्हस्थ्य-मनुष्ठातव्यम् । मुग्धा खल्वहम् । चपलाक्षी खल्वहम् । मन्दाक्षमनोहरा खलु । निरनुरोधा खलु । एनं स्वगात्रैरनङ्गतप्तं निर्वापयामि खलु । (सनिः-श्वासम्) अहो नु खलु भोः कीदृशमद्य मे प्रभातम्, यत् परिस्खलना-नारदस्खलनान्तरमहमुपनीये । (सविमर्शम्) को नु खलु मामीदृगवस्थं परिभवगमिष्यति । यत्सत्यं सर्वात्मना स्त्रीभूतः खल्वस्मि । मम हि,

रक्षायां विषयस्य ये नियमिता राज्ञा विहायैव तां
सन्तुष्ट्यै न भवन्ति तस्य चरणौ संवाहयन्तोऽपि ते ॥ ६ ॥

ततश्च मया सत्याधिकारे स्थापितस्य भवतो मदन्तिक एवावतिष्ठासा सांप्रतं न रोचते मह्यम् । अतस्सत्यलोकमधिगत्य मामनुस्मरन्नेव मया नियोजितो रक्षितुमर्हसि । मद्वियोगतश्च तव माभूद्विषादः । यतः—

गळत्कळङ्के गतसर्वशङ्के चित्ते भवादृक्सुधियाममत्ते ।
विधे सदा सन्निदधे यथेभधरे[1] स्थिरे वा नगरे मदीये ॥ ७ ॥

इदञ्चावधेयम् ।

अर्चामाद्ययुगे मम त्वमकृथा हस्ती द्वितीये युगे
जीवो द्वापरके कलौ भुजगराडित्यर्चका निश्चिताः ।
चैत्रे मासि परं पितामहचतुर्दश्यामिहागत्य मां
राकायां प्रतिवत्सरं बहुतरान्वारान् समाराधय ॥ ८ ॥

इति वचनमुदारं वारणक्ष्माभृदिन्दो-
स्स हि शिरसि दधानस्सर्गकारी प्रजानाम् ।
विहितबहुनमस्यो वीतरागैश्च साकं
व्यपगतभयशोकं व्यानशे सत्यलोकम् ॥ ९ ॥

[2]मराळयानो वरदं समाश्रितामरालयानोकहमेव चिन्तयन् ।
स भारतीनायक उज्जगाम सत्सभारतीनादरतो मुनीनवन् ॥१०॥

तत्रापि—

अथ सत्यव्रतात्सत्यलोकं गतवति पितामहे, महेन्द्रे च दैवतैयौंवतैर्विद्याधरादिभिश्च साकं नाकं प्रतिष्ठमाने, वसिष्ठप्रमुखेषु विष्टरश्रवः-

1 मदीये स्थिरे नगरे - वैकुण्ठे इत्यर्थः ।

2 मरालवाहनः - हंसवाहनः, भारतीनायकः - वाणीपतिः, सः - ब्रह्मा, समाश्रितानां - स्वभक्तानां, अमरालयानोकहं - कल्पवृक्षभूतं, वरदमेव चिन्तयन् सन्, सतां - सज्जनानां, सभायां - सङ्घे, रतिः - इच्छा येषां तान् मुनीन् आदरतः - विश्वासात्, अवन् रक्षन् सन्, उज्जगाम - प्रतस्थे ।

प्रणामहर्षिषु महर्षिषु स्वं स्वमाश्रमपदमाश्रितेषु, प्रसिद्धेषु च पार्थिवेषु निजनगरीमपगतेषु, अन्येषु च धन्येषु राजन्येषु स्वस्वागारविगाहिषु दिव्या एव शेषशेषाशनसुपर्णाद्यः सूर्यप्रगण्याः [1] कर्यहार्यवर्यधुर्यहर्यङ्घ्रिकैङ्कर्यमर्यादानुगुणसपर्याचर्यापर्याप्ताश्चर्यप्राचुर्यनिर्यापितसकलकालाः कर्मवश्यादृश्यास्तत इतः काञ्च्यां स ञ्चेरुः । कालक्रमेण काञ्चीनगरी काननीबभूव। युक्तं चैतत्—

वेगवत्यात्मना जातां वोढुं नित्यं सरस्वतीम्।
योग्यतासिद्धये नूनं काञ्ची [2] काननतां गता ॥ ११ ॥

तत्र च,

देवोऽथ भावोचितकेळिभाजा देव्या सहाव्याजदयापयोधिः।
नानोन्नतानोकहशोभमाने तेने वनेऽनेकविधान् विहारान् ॥ १२ ॥

तदा किल मदाकुलकोकिलशुकप्रमुखनिखिलद्विजकुलगळगळत्कलकलसुगमनिगमपारायणं, भृङ्गीध्वनिभिरङ्गीकृतसङ्गीतभङ्गीकं, मलयनिलयतरुणपवनभरताचार्यप्रेर्यमाण चारुवीरुद्गणगाणिक्यनिर्वर्त्यमाननर्तनशोभमानवर्तनीकं, विहगमिथुनविहृतिवेळादोलायमानबालरसालकिङ्करकरसङ्गृहीततनुतरद्राघीयश्शाखावेल्लसन्ताड्यमान निबिडनमदुरुतरुपुरुषपरिषदुपरिभवदरुणकिसलयरुचिपटलपटलसद्वितानकं, सान्द्रतरपर्णसंपन्नबहुलतररसपरिपूर्णपृथुलफलनिवहवहनाळिकेरबृन्दसन्दर्शित भगवदवलुलोकयिषावशागतविपुलगगनपथभ्रमदमरश्रमहरणार्थ विनिहित बृहदुदककलशकुलशीतलच्छायप्रपारीतिकं, विविधविकचकुसुमविसृमरमकरन्दधारापराकृतपरागविहारमार्गं, प्रांशुकिंशुकविटपिविटपदण्डदृढघटितप्रसूननिकरकरप्रदीपपरम्पराविराजमानं, पवनचलनसमयतरळताळविलसद-

1 कर्यहार्यवर्यस्य - हस्त्याख्यगिरिश्रेष्ठस्य, धुर्यो - धुरीणो यो हरिः, तदङ्घ्रिकैङ्कर्ये, मर्यादायाः - नियमस्य, अनुगुणा या सपर्या - पूजा, तस्याश्चर्यायामाचरणे, पर्याप्त यदाश्चर्यप्राचुर्यं - विस्मयाधिकयं, तेन निर्यापितः - अतिवाहितः - सकलः कालो यैस्ते । कर्मवश्यादृश्याः बद्धैरदृश्याः ।

2 कस्य - ब्रह्मणः, आननं - वदनं, तस्य भावः तत्ता, तामित्यर्थः

विरलमर्मरनिर्मिततूर्यचातुर्यप्रदर्शनं चञ्चरीकप्रपञ्चसञ्चरणवेल्लितमल्लीमतल्लीनिष्पतत्पुष्पतत्युपदर्शितयुवतिजनहर्षविहितलाजवर्षलीलं, नित्यसूरिनेत्रासेचनकं यात्रामहोत्सवं प्रवर्तयन्वने तत इतस्सञ्चरन्तं, दन्तावळशिखरिसन्तानमिन्दिराकान्तं वसन्तस्सन्तोपयामास ।

वरदश्च तदानीं वसन्ताश्लेषधन्यां वन्यामवलोकयन्ननन्यामर्णवराजन्यकन्यां निर्वर्ण्य [1]वारितेतरोदन्याममृतधुन्या सदृशीं वाचमिमामुपन्यास्थत् ।

पश्य दयिते ! परमियं वनी[2] नूनमधुनाऽनूनमधुना मधुना समाश्लिष्टा । यतः—

आगस्त्याद्रितटीपटीरविहरद्व्यालीभिराचुम्बित-
श्चोलीभिर्मिलितः कवेरदुहितुर्वीचीभिरालिङ्गितः ।
सोयं वर्त्मनि पद्मिनीरनुभव[3]न्नाभिर्मधु प्राशितो
मन्दं मन्दमुपैति दक्षिणमरुन्मन्ये मदेनालसः ॥ १३ ॥

किं च—

मधुरमधुरसाञ्चन्मञ्जरीपुञ्जलीन-
भ्रमरसमरकेलीप्रोत्थधूलीवहानाम् ।
वकुलमुकुलपालीवासनाभाजनानां
चलयति हृदयं मे चारुता मारुतानाम् ॥ १४ ॥

इतस्तु दृश्यताम्—

शाखावेल्लदफुल्लपल्लवशिखोल्लीढात्परागोल्लस-
द्गर्भात्पुष्पत उत्पतन् सनिनदं पान्थेषु पुष्पंधयः ।
धत्ते चूर्णविशेषपूर्णवदनावष्टब्धतेजः कण-
प्रस्पष्टायुधभेदगर्भविगलत्सध्वन्ययःपिण्डताम् ॥ १५ ॥

---

1 वारिता - निवारिता, इतरेषु - वस्त्वन्तरेषु, उदन्या - इच्छा । उन्दयाशब्दस्य प्रकरणवशात् अपेक्षामात्रे सङ्कोचः ।

2 अनूनं - अधिकं, मधु - मकरन्दः यस्मिन् तेन, मधुना - चैत्रमासेन अधुना इदानीं नूनं - निश्चितं इयं वनी समाश्लिष्टा ।

3 आभिः पूर्वोक्ताभिः स्त्रीभिः ।

इतश्चावलोकय—

[1]शाखाशिरस्येव सदा निविष्टोऽप्यामोदमृच्छन्नपि माधवाप्त्या ।
पतत्यधस्तान्मधुपाङ्गनानां पादोपघातात्सुमनोगणोऽयम् ॥ १६ ॥

इतश्चायं विनोदो वीक्ष्यताम्—

[2]सतूर्यघोषे विरुतैर्वसन्त ऋतूत्सवे नर्तयति द्रुमल्लान् ।
जतूरुभृङ्गाङ्कितपञ्चशाखान् कुतूहली कोऽपि मरुत्कुमारः ॥ १७ ॥

इतश्च निशाम्यताम्—

वने वसन्तक्षितिभृत्सभान्तरे कुतूहलात्कोकिल ऐन्द्रजालिकः ।
विरावदम्भाद्विहितस्तवो नवप्रवालवह्निं निगिरन् प्रनृत्यति ॥१८॥

कण्ठमण्डनरतोचितध्वनिः पूर्णकाममदघूर्णदीक्षणः ।
कौतुकेन परिचुम्ब्य मोदते कोकिलः किल कुहूमुखीं सखीम् ॥

इतश्च जलधिकन्ये तन्यतामब्जिन्यामक्षिविन्यासः—

त्वन्मुखे शशिसखे सति कान्ते तोयजं पुनरसर्जि वृथेति ।
मण्डलीभवदलिव्यपदेशात्कुण्डलीकृतमिदं द्रुहिणेन ॥ २० ॥

इदं पुनरवधीयताम्—

दन्तैः कुड्मलशालिनी किसलयोपेता च तद्वासा
वक्षोजद्वितयेन च स्तबकिनी वाचा च माध्वीकिनी ।

---

1 शाखाशिरसि - वेदान्ते वृक्षाग्रे च, आमोदं - सन्तोषं परिमलं च, माधवः - विष्णुः वैशाखमासश्च, मधुपाः - मधुपायिनः भ्रमराश्च, सुमनसः - विद्वांसः पुष्पाणि च ।

2 मरुत्कुमारः - मन्दमारुतः, वीनां - पक्षीणां, रुतैः - शब्दैः, सतूर्यघोषे - वाद्यशब्दयुते वसन्तऋतूत्सवे, जतु - लाक्षेव उरु - अधिकं यद्भृङ्गं - लेपनद्रव्यम् , तेन अङ्किताः पञ्चाः विस्तृताः शाखा एव पञ्चशाखाः - हस्ताः येषां तान् , द्रवः वृक्षा एव मल्लाः तान् , कुतूहली सन् नर्तयति ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २९] कलि ५०५६ मन्मथ - मकर साधारण [सं ५

# मुकुन्दमाला ॥

——:o:——

मनः अन्तरिन्द्रियम् । चक्षुरादीनि बहिरिन्द्रियाणि । इमानि सर्वाणि अस्माकं अभिमततत्तत्कार्यसाधनोपयुक्तानि करणानि । एषां पृथक् चैतन्यं नास्ति । अथापि अस्मद्वशवर्तीनि न भवन्ति । यत्र वयमिच्छामः तत्र न प्रवर्तन्ते । यत्र तु नेच्छामः तत्र स्वयं प्रवर्तन्ते, अस्मानपि तत्र कर्षन्ति ।"

"बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ।,,

"सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥"

इति सुप्रसिद्धमेतत् । यदैवं एतानि अनभिमतानुचितविषयसङ्गीनि भवन्तः तदा तानि नियमयितुं प्रवर्तमाना विवेकिनः, दुष्करत्वात् तन्नियमनस्य, कञ्चन क्लेशमनुभवन्ति । तस्मिन् अवसरे पुत्रो वा, शिष्यो वा, अन्यो वा कोऽपि स्वजनः स्वाभिप्रायप्रतीपमाचरन् यथा अविधेयो भवेत् तथा इमानीति काचन भावना तेषां भवति । तेन अचेतनान्यपि तानि चेतनानीव कृत्वा व्यवहर्तुमारभन्ते । इयं दशा कुलशेखरस्य उपस्थिता । तस्मात् पूर्वश्लोके स्वकीयं मनः सम्बोध्य "मुरभिदि मा विरमस्व चित्त रन्तुम्" इति सानुनयं प्रार्थयाञ्चक्रे । अस्याः प्रार्थनाया अनन्तरं तस्य एवं काचन प्रतिभा अजनि—

अतिमात्रभयावसन्नं किल तदीयं मनः तमेवमुवाच; "भगवद्ध्यानात् नोपरन्तव्यमिति मां त्वं ब्रवीषि । कथमिदं मे शक्यम्? अस्मिन्

शरीरे पतिते सति नरकफलं किञ्चित् पूर्वकर्म परिपक्वं सत् नरकलोकं त्वां मां च यदि नयेत्, हा हन्त कियत्यः कीदृश्यस्तत्र यातनाः अनुभाव्या भवेयुः । तच्चिन्ता मामद्य परिलुम्पति । भगवद्भक्तिनिष्ठस्य नरकयातना न भविष्यतीति इयं स्थितिरद्य नास्ति । न हि नरकदुःखपरिहारः भक्तिफलतया भवता इष्यते । स्वयम्प्रयोजनतयैव भक्तेः प्रार्थनात् । 'कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ।' 'नरके वा नरकान्तक प्रकामम्' इति नरकप्राप्तेः सम्भवन्त्या अनुमतत्वात् । एवं दुर्भरभयभरावसन्नमहं कथं निरन्तरं भगवन्तं स्मर्तुं शक्नुयाम् ।" इति ।

अत्र प्रतिवदन्नाह राजा कुलशेखरः—

मा भैर्मन्द मनो विचिन्त्य बहुधा यामीश्चिरं यातना
नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ ११ ॥

बहुप्रकाराः चिरकालानुभाव्याः यमसम्बन्धिनीः तीव्रवेदनाः विशेषतश्चिन्तयित्वा मा भैषीः, हे मन्द समुचितविवेकरहित मनः । कथमहं मन्दम्, अवोचं हि भयहेतुम् ; इति चेत् न तत् तथा ; शृणु । पापानां पापिजनानां रिपवः दण्डनकारिणः अमी यमप्रभृतयः नः अस्माकं न प्रभवन्ति ; अस्मान् वा अस्मादृशान् अन्यान् वा स्वलोकं नीत्वा पीडयितुं न शक्नुवन्ति । कुत इति चेत् – स्वामी ननु श्रीधरः । अस्माकं कः स्वामी । साक्षात् श्रियःपतिः पुरुषोत्तमः खलु । तस्य स्वभूता वयम् । किं नाम तं सर्वेश्वरं स्वामिनमतिक्रम्य तस्य स्वभूतान् अस्मान् यमोऽपि आस्कन्दितुमीष्टे ? प्रसिद्धा चेयं पाराशरी परमार्थोक्तिः–

निजभटमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम् ॥

इति । तस्मात् आलस्यं ध्याने मन्थरप्रवृत्तितां परित्यज्य नारायणं भगवन्तं ध्यायस्व । स हि भक्तिसुलभः प्रीतिपूर्वकध्यानरूपया भक्त्या सुप्रापः । भक्त्या प्रीतः यावज्जीवमस्मिन् लोके अस्मान् सुखं वासयित्वा

ततः परं स्वलोकं नीत्वा नित्यनिरतिशयानन्दभाजः करिष्यति । न तु कदाचित् नरकगामिनः कृत्वा उपेक्षिष्यते । तस्य स्वभावमिममवधारय । ततस्ते आश्वासो भविष्यति । स हि लोकस्य व्यसनापनोदनकरः । लोके जातस्य यस्य कस्यापि व्यसनापनोदनशीलः । 'सर्वलोकशरण्याय' 'विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् । आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ॥' इति हि तदीयस्य तस्य च वचनं प्रथितम् । एवमपरिचितपूर्वस्य, आर्द्रापराधिनोऽपि वा पालयिता सः किं दासमस्मादृशं न पालयिष्यति । तस्मात् निश्शङ्कं निश्चिन्तं च तं ध्यायस्व । 'भैषीः' इत्यस्य स्थाने 'भैः' इति व्याकरणान्तरानुसारि रूपम् । 'मा भीः' इति पाठे क्रिययोर्भिन्नकर्तृकत्वम् । अनुप्रासस्तु शोभनतरः । पूर्वार्धे एकधाऽनुप्रासः उत्तरार्धे एकधेति विभाव्यम् ।

---

# संस्कृतपुनरुज्जीवनम् ॥ (2)

(R. Rajagopalan,-M. A., Bangalore)

—o—

* पूर्वलेखविषयीभूतस्य 'संस्कृतस्य पुनरुज्जीवन'मित्यस्य क्रियमाणमिदं विमर्शान्तरमपि पण्डितानां संस्कृताभिमानिनां चावगाहनपदवीमारोहत्विति आशास्महे । पाश्चात्यानां राज्यनिर्वाहकाले संस्कृतवाणी यावतीं प्रकाशपदवीमारूढा ततोऽपि इदानीं स्वतन्त्रे भारते निहीनतामापादितेति सविषादं ब्रूमः । संस्कृतभाषायाः यथायोग्यं स्थानं नाद्यापि दत्तम् । यद्यपि अद्यतने राज्यतन्त्रे मुख्यतया विद्यमानानां भारतीयचतुर्दशभाषाणां मध्ये संस्कृतस्यापि परिगणनं कृतं, अस्याः भाषायाः दुरवगाहतया बहुपरिकरसापेक्षतया च लोकव्यवहारपथावतरणाशक्तत्वात् तदध्येतॄणां चातिविरलत्वात् संस्कृतस्यानुरूपस्थानवितरणं वा तत्प्रसारक्रिया वा न सम्यगाचर्येत इति वक्तुं पार्यते । विविधभाषामातृभूतायाः

---

* एतत्पूर्वलेखः अतीतवृषभ (मे मास)सञ्चिकायां प्रकाशितः ।

अस्याः प्रसारविषये राज्यशासकैर्यदि प्रयत्नो न क्रियते तदा इमां भाषां प्रति तन्महिम्नेरपि तैः वैमात्रेयवृत्तिरेवानुष्ठीयत इत्यत्र न कोऽपि संशयः। सर्वासां भारतीयभाषाणां पुष्टिदायिन्याः, विशेषतः राष्ट्रभाषात्वेन स्वीकृतायाः हिन्दीभाषाया अपि पुष्टीकरणयोग्यायाः संस्कृतभाषायाः पुनरुज्जीवनविषये यद्यश्रद्धा क्रियते तदा न केवलं अल्पसंख्याकानां संस्कृतज्ञानां विषये कर्तव्यलोपदोषयुता भवन्ति शासकाः, अपि तु भारतस्योन्नतिकारणभूतायाः भारतीयसंस्कृतेरपि न्यूनतापादका भवन्ति । हिन्दीभाषाया अचिरेण पुष्टिमपेक्षमाणास्ते संस्कृतस्योपरि अवज्ञां वा अश्रद्धां वा कर्तुं नार्हन्ति । हिन्दी भाषायाः संस्कृतमातृकत्वात् , तत्प्राचुर्याच्च ।

इमां भाषां यथा पाश्चात्या बहुमन्यते न तथाऽद्यतनभारतनायकश्रेष्ठा इति लज्जावहमेव । प्रपञ्चे मुख्यस्थानारूढेषु पाश्चात्यराष्ट्रेषु एतद्भाषाशिक्षणगवेषणप्रकारेषु अत्यधिकतया विद्यमानेषु, तज्जन्मभूमौ अस्मद्देशे तस्या अनादरणमिति परं विषादस्थानम् । न केवलं तेषां संस्कृतसाहित्यग्रन्थराशौ अभिनिवेशः, किन्तु अस्मत्पवित्रग्रन्थेषु वेदेषु पुराणादिषु तैः कृतं गवेषणादिकं अस्मद् विस्मयावहमित्येव मन्यामहे । यद्यपि तैः प्रकाशितेषु अस्मद्ग्रन्थविषयकगवेषणादिषु साध्वसाधुविचारोऽत्रासांप्रतं, तथापि गीर्वाणभाषाभिवृद्धौ अस्माभिः क्रियमाणः प्रोत्साहः तदपेक्षया "यदन्तरं स्यन्दनिकासमुद्रयोः" इति न्यायग्रस्त इत्येव वक्तव्यम् ।

अस्मद्देशनायकमणीनां भारतस्वातन्त्र्यशिल्पिनां गान्धीमहाशयानां हितवचनानि 'बधिरस्य पुरः वीणावादनानीव' संजातानि । तैरभिहितं स्वग्रन्थे– "भारतीय विद्यार्थिभिः सर्वैः एतद्भाषाध्ययनमवश्यं कर्तव्यमिति, अस्मत्पवित्रग्रन्थानां सर्वेषां एतद्भाषामयत्वात् अस्मत्संस्कृत्यवगमः एतद्भाषापरिचयाभावे दुश्शक एवेति, अस्मदीयपवित्रग्रन्थमध्ये सरलशैल्या सुखाववोधकरूपेण विद्यमानानां रामायणगीतादीनां सुप्रसिद्धग्रन्थानां पठनापेक्षयापि सर्वैरवश्यं गैर्वाण्यध्येतव्या" इति च । इतरे अस्मद्देशनायकाः पण्डिताश्च तमेवार्थं पदे पदे उक्तवन्तश्च । अस्मन्नायकशिरोमणयः सर्वे इमं विषयं सम्यग् जानन्त्येव । संस्कृतभाषाभिमानिन एव ते इत्यत्र संशयलेशोऽपि नास्ति । किन्तु तस्याः सार्वजनीनत्वे विद्यमानान् क्लेशान् जानन्तस्ते पदे पदे चलितासु वार्षिकोत्सवादिसभासु

तन्माहात्म्योद्घोषणेन स्वपाण्डित्यप्रदर्शनेन च तृप्तिमुपयान्तीति मन्यामहे ।

सुरभारत्याः सार्वजनीनत्वकरणे क्रियमाणाः प्रयत्नाः सफला न भवेयुरिति अस्माकं मतम् । यतः पूर्वलेखोक्तभाषाध्ययनकठिनता, व्याकरणाभ्यसनक्लेशाः, जीविकादौर्लभ्यमित्यादयः अस्याः सार्वजनीनत्वस्य परिपन्थिनः । एवं स्थिते असकृच्छ्रूयमाणाः संस्कृतविश्वपरिषदिति, गवेषणणालयस्थापनमिति, संस्कृतस्य राष्ट्रभाषात्वकरणमिति च ध्वनयः एतद्भाषाभिवृद्धिकरणे जनानां मनोरथमात्रपर्यवसायिनः । किमेतावता एतद्भाषासेवाधुरंधरत्वं पर्याप्तम् ? जगद्वन्द्यायाः भारतीयपवित्रधर्मग्रन्थरूपायाः गैर्वाण्याः रक्षणमभिवर्धनं चासत्क्षेमायावश्यं कर्तव्यम् । मूलस्य सेचनेनैव वृक्षस्य शाखोपशाखान्वितत्वं फलपुष्पादिना शोभमानत्वं उपयोगित्वं च भवेत् ।

इतरभाषाभिवर्धनस्य संस्कृताभिवर्धनस्य च महत् तारतम्यं वर्तते । यतः इतरभाषासु तत्तद्भाषाव्यवहारिणो बहवः सन्ति तत्र तत्र । संस्कृतभाषाध्येतारः व्यवहारिणश्च सर्वत्रापि दृश्यन्ते ; किंतु बह्वल्पसंख्याकत्वेन पण्डितसभासु विद्यालयेषु मठादिषु च । तस्मात् एतद्भाषाभिवृद्धिकर्मणि जनतायाः आदरणं वा बहुसंख्याबलं वा नापेक्षितुं युक्तम् । किं चास्या अध्ययनकाठिन्येन वा, 'मृतभाषेति' केषांचिदविवेकिनां मतानुसारेण वा अस्या अनादरः किं युज्यते ? पूर्वलेखोक्तरीत्या सरलग्रन्थरचनया अस्याः कठिनता सुपरिहरा । अस्यां भाषायां नवीनग्रन्थकर्तृणां प्रोत्साहः तत्र तत्र संस्कृतकेन्द्रस्थलेषु एतद्भाषासेवाधुरंधरैः, विशेषतः राष्ट्राध्यक्षैः करणीयः । मृतभाषेति जल्पतां अनात्मज्ञानां वादेन न वयमनुत्साहिनो भवितुमर्हामः । प्रचारकाणामभावेन वा कालमहिम्ना वा क्षये जाते कथं भाषायाः निर्जीवतापत्तिः ? न कापि भाषा म्रियते । जनताया अनादरणेन भाषा म्रियत इति अहो तेषां मतिविभ्रमः ! इदानीमपि संस्कृताभिज्ञेषु मध्ये शास्त्रविचारः परस्परसंभाषणादिकं पत्रप्रेषणादि च गैर्वाण्यैव प्रचलन्तीति तद्भाषाभिज्ञानामभिमानिता प्रशंसनीया प्रोत्साहनीया च । एतेनास्या मृतभाषात्ववादः दूरापास्त एव ।

अस्याः सर्वजनोपयोगाभावात् महता प्रयत्नेन अल्पसंख्याकानां संस्कृताध्यायिनां प्रोत्साहनं नातीव श्लाघनीयमिति च न मन्तव्यम् । सर्वेषु कालेषु सर्वत्रापि गीर्वाणभाषाव्यवहारिणः न बहव इति विदांकुर्वन्तु

सर्वे । यतः प्राचीनभारतभूमावपि उत्तमपात्रैरेव गैर्वाण्या संभाषणादिकं समजनीति, इतरैर्मध्यमाधमपात्रैः प्राकृतभाषयैव व्यवाह्रियतेति च संस्कृतनाटकेभ्यः सुव्यक्तं भवति । राष्ट्रभाषात्वेन स्वीकृता हिन्दीभाषापि प्राकृतभाषासु अन्यतमैव । तस्याः राष्ट्रभाषात्वकरणं सार्वजनीनदृष्ट्या युक्तमेव । संस्कृतस्य राष्ट्रभाषात्वकरणे पूर्वोक्तकारणैः साधुत्वं न पश्यामः । किं तु तस्याः युक्तस्थानवितरण एवास्माकं अभिलाषः प्रयत्नश्च । तत्र राष्ट्रशासकैः विद्याधिकारिभिर्वा दत्तमित्येवास्माकं विषादः ।

पूर्वं हिन्दूराष्ट्रपतिभिः संस्कृतस्य प्रोत्साहः सम्यक् कृत इति, स एव कालः 'सुवर्णयुग'तया परिगणित इति इतिहासाज्जानीमः । यद्यपि मध्यकाले महामदादीनामन्येषां चाक्रमणेन संस्कृतस्य प्रोत्साहो न्यूनतां गतः, तथापि स्वतन्त्रे भारते तस्याः प्रोत्साहनमवश्यं करणीयमित्यत्र न कोऽपि विसंवादः स्यात् । यदि एतदर्थं पाठशालासु संस्कृतभाषाभ्यसननियमः सम्यक् प्रचाल्येत, तत्पुनरुज्जीवने बद्धकङ्कणाः विद्वांस समाजाश्च वीतमत्सराः अविषमाः तत्कर्मनिरता भवेयुः, तेषामर्थे राष्ट्रनायकाश्च धनसाह्यादिद्वारा एतद्भाषाभिमानयाथार्थ्यं प्रकाशयेयुः, तदैव संस्कृतस्य पुनरुज्जीवनं सम्पन्नं भवेत् ।

---

# नृगोपाख्यानम् ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—:o:—

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो †जयमुदीरयेत् ॥

अनुशासनपर्वान्तर्भूतदानधर्मपर्वान्तर्गतं नृगोपाख्यानं निगद्यते ।

† अत्र श्रीमहाभारतमङ्गलश्लोके जयः श्रीमहाभारतमिति,
'चतुर्वर्गसाधनत्वाच्च जयो भारतमुच्यते ।
चतुर्णां पुरुषार्थानामपि हेतुर्जयो ह्ययम् ॥'
इति विष्णुधर्मवचनादवसीयते ।

भीष्म उवाच— कुरूद्वह, सन्तो, ब्राह्मणस्वापहारेण सुमहत्कष्टं भवतीति निरूपयितुं तेन यत्सुमहत्कष्टं नृगेणावाप्तं तन्निदर्शनतया कीर्तयन्ति । पार्थ, पुरा द्वारकायां प्रादुर्भवन्त्यां तृणवीरुत्समावृतः कश्चन महाकूपोऽदृश्यतेति श्रूयते । जलाभिलाषिणस्तस्माज्जलमाहर्तुमतिवेलमुद्युञ्जाना अपि नापारयन् । ते सुसंवृते तस्य तोयेऽवस्थितं महाकायं कश्चन कृकलासमीक्षाञ्चक्रिरे । पर्वतोपमं तं रज्जुभिश्चर्मपट्टैश्च बध्नन्तोऽपि ततस्तं समुद्धर्तुं नाशक्नुवन् । तदनु ते कृष्णमासाद्य तस्मिन् 'उदपानस्यावकाशमाच्छाद्य, महान् कृकलासो वर्तते । तस्य समुद्धर्ता नास्ति' इति न्यवेदयन् । स वासुदेवेन समुद्धृतः कामान् पृष्टश्च सन् आत्मानं नृगनामान राजानं पुरातनं यज्ञसहस्रयाजिनं चाकथयत् । माधवस्तथा ब्रुवाणं तं प्रति 'हे नरेन्द्र, त्वया शुभं कर्मैव कृतं, न पापम् । कथं त्वमीदृशीं दुर्गतिं प्राप्तः । पुरा शतं, सहस्राणि, पुनश्शतमष्टशतानि, दशलक्षाणि च गावो द्विजेभ्यो दत्ता इति शुश्रुम । तव तत्पुण्यं क्व गतं वद' इत्याह स्म ।

ततो नृगस्तमेवमभणत्— 'अग्निहोत्रिणः प्रोषितस्य विप्रस्यैका गौः प्रमादान्ममगोसङ्घं प्राविशत् । सा मम गवां सहस्रे मत्पशुपालैरन्यतमतयाऽगण्यत । सा परलोके फलमभिकाङ्क्षता मया कस्मैचिद्ब्राह्मणाय व्यतीर्यत । अग्निहोत्री द्विजस्तां गामन्विच्छन् परगृहे विलोक्य ममेयमित्युवाच । तावुभौ भृशमनस्तापौ विवदमानौ मामविन्दताम् । अथ तौ भवान् दाता, भवान् हर्तेति व्याहरताञ्च । गवामयुतं दास्यामि । दत्तपूर्वां गां देहीति प्रतिग्रहीतारमयाचे । स तु मामेवमभाषत— 'सा गौश्शोभने देशे काले च लब्धा शान्ताऽतिवत्सला दोग्ध्री स्वादुक्षीरप्रदा भाग्यशालिनी ; स्तन्यपानाभावात्कार्श्यमापन्नं मम पुत्रं नित्यं भरते च । अतो न सा शक्या मया दातुम्' इति । एवमुक्त्वा स जगाम ।

ततस्तमग्निहोत्रिणं विप्रं, 'सा गौर्मह्यं विश्राण्यताम् । तत्कृते गवां शतसहस्रं विनिमयेन स्वीक्रियताम्' इत्ययाचिषि । स ब्राह्मण इत्थमलपत्— 'राज्ञां स्वं न प्रतिगृह्णामि । याचकाय धनं दातुमहं शक्तः । सैव मम गौश्शीघ्रं दीयताम्' इति । तदा रुक्ममश्वान् रजतस्यन्दनांश्च तस्याददाम् । स तु तानि न जग्राह ययौ च । एतस्मिन्नेव काले कालधर्मेण चोदितः पितृलोकमवाप्य धर्मराजमासादयम् । यमस्तु मां पूजयित्वैव

मुदैरयत्— 'हे राजन्, तव पुण्यस्य कर्मणोऽन्तो न सङ्ख्यायते। त्वया किञ्चित्पापमज्ञानात्कृतमस्ति। यथेच्छं पश्चाद्वा पूर्वं वा तत्फलमनुभव। रक्षितास्मीति त्वया प्रत्यज्ञायत। सा प्रतिज्ञाऽनृताऽभवत्। ब्राह्मणस्वम-गृह्यत च। अतस्तव द्विविधो व्यतिक्रमस्संवृत्तः' इति।

प्रभो, अहं पूर्वं पापं पश्चात्सुकृतं चानुभविष्यामीति धर्मराजं प्रति-ब्रुवन् अनेन रूपेण महीतले पतितोऽस्मि। पतितोऽहं 'वासुदेवस्ते समु-द्धर्ता भविता। वर्षसहस्रे पूर्णे दुष्कृते कर्मणि क्षीणे स्वेनैव कर्मणा जितान् शाश्वतान् लोकान् प्राप्स्यसि।' इति यमस्योच्चैः प्रभाषणमश्रौषम्। आत्मानमधश्शीर्षं कूपे पतितमपश्यञ्च। तिर्यग्योनिमनुप्राप्तमपि मां पूर्वानुभूतार्थस्मृतिर्नाजहात्। अधुना त्वया सन्तारितोऽस्मि। तपो-बलादन्यद्बलं किमस्ति। हे कृष्ण, अद्य दिवं गच्छेयम्। मामनुजा-नीहि' इति। अरिन्दमस्स जनार्दनेनानुज्ञातस्तं नमस्कृत्य दिव्यं विमान-मास्थाय स्वर्गमियाय।

भरतसत्तम, कुरुनन्दन, तस्मिन् नृगे नाकं गतवति सति वासुदेवः

ब्राह्मणस्वं न हर्तव्यं पुरुषेण विजानता।
ब्राह्मणस्वं हृतं हन्ति नृगं ब्राह्मणगौरिव॥

इति श्लोकं जगाद। 'पार्थ, सतां सद्भिः समागमोऽफलो न विद्यते। साधुसमागमाद्दुःखाद्विमुक्तं नृगं पश्य। युधिष्ठिर, तव गोदानं फलवत्। गवापहारो दुःखहेतुः। तस्माद् गवामपहारं वर्जयेत' इति।

---

# वृद्धभाषितम्॥ (17)

—:o:—

आचार्यः— आयुष्मन्तः, बुद्धौ कालुष्यं विना प्रस्तुतो विषयश्चिन्तनीयः। अस्मिन् काले अस्मिन् विषये मेधाविनामपि महान् मतिविभ्रमो वर्तते। अतः अव्यग्रैः शान्तेन मनसा अत्र परामर्शः कर्तव्यः। ममैव ताव-दद्य कथं युष्माकं अत्यन्तहृदयङ्गमं अनाकुलं असन्दिग्धं च अयमर्थ उपपादनीय इति चिन्तयतः दुर्भरेण महता भारेण अवपीड्यमानस्येव

दुस्थितिः काऽपि भवति। तथापि यथाशक्ति विशदं ब्रवीमि। शृणुत। तदा तदा यत् प्रष्टव्यं भाति तत् अविशङ्कं यथेच्छं पृच्छत।

द्विजैः यजनाध्ययने कर्तव्ये। अकरणे तेषां प्रत्यवायो भवति। अद्विजैः कर्षणादि कर्तव्यम्। नत्वध्ययनयजने। करणे तेषां प्रत्यवायो भवति। इतीदृशीं व्यवस्थां शास्त्रं करोति। एषामुभयेषामपि एवं व्यवस्थितं कर्म सर्वं सर्वसुखमय्या लोकयात्रायाः सम्पत्तिमुद्दिश्यैव विहितम्। अतः अनादेः कालात् अवत्या जनाः सर्वे तां व्यवस्थां परिपालयन्तः स्वस्वकर्म कुर्वाणा अवर्तन्त। अत्र यद्यद् दूषणमुच्यते तत् सर्वमेकैकशः परामृशेम।

रामकृष्णौ— सर्वा व्यवस्था शास्त्रकृतेति शास्त्रमस्माभिः प्रमाणीक्रियते। शास्त्रे बहूनां विश्वासो नास्ति। तान् प्रति किं वक्तव्यम्?

आचार्यः— किं तत् शास्त्रं, यदस्माभिः प्रमाणीक्रियते?

रामकृष्णौ—वेदाः स्मृतयश्च।

आचार्यः— सत्यं तदेव। सम्यगाहतुर्भवन्तौ। किन्तु तत्र कथमविश्वासः?

रामकृष्णौ—कथं विश्वास इति तु इदानीं परामर्शनीयः समाधेयश्च प्रश्नः। न तु 'कथमविश्वासः?' इति। विश्वासे कारणं नास्ति। तस्मादविश्वास इति प्रस्फुटो लघुश्चायं विषयः।

आचार्यः—तथा भवन्तौ मन्येते। वस्तुतस्तु न तथा लघुत्वमत्र वर्तते। वयं बालान् ब्रूमः— मा स्म अलसा भवत। अध्ययनं कुरुध्वम्। सत्यं ब्रूत—इत्यादि। ईदृशेषु अस्मदीयेषु वचनेषु बालानामविश्वासो भवति। तथा आचरितुं नेच्छन्ति। तत् किं युक्तम्? तेषु तथा अविश्वासं कुर्वत्सु किमस्माभिः स्वच्छन्दवृत्तीन् तान् कृत्वा तूष्णीमासितव्यम्?

रामकृष्णौ—बाला अनभिज्ञाः। विवेचनशक्तिर्नास्ति। अनुभवशालिनां हितैषिणां वृद्धानां वचनं तैः श्रद्धातव्यम्। अन्यथा कालान्तरे अनर्थभाजो भवेयुः। तस्माद् बलादपि ते हितं कारयितव्याः।

आचार्यः— तत्त्वं भवन्तौ भाषेते। अयमेव तु न्यायः शास्त्राणि प्रति मनुष्याणां सर्वेषामिति प्रतिपत्तव्यम्। न वयं स्वबुद्ध्या केवलया हिताहिते ज्ञातुं शक्नुमः। किञ्चिदस्माकं हितं भाति। किन्तु महाननर्थः पश्चात् ततो भवति। अस्माकं पदे पदे जायमानाः प्रमादाः भ्रमाश्च

सम्यक् चिन्त्यन्ताम् । कियती नाम अस्माकं बुद्धिशक्तिः ? यद्यपि वयसा वयं वृद्धा भवामः तथाऽपि शास्त्राणि प्रति बाला एव । यथा बालैः वृद्धानां वचनेषु श्रद्धातव्यं तथा वृद्धैरपि शास्त्रकृतेषु उपदेशेषु । यथा बालानां हितार्थमेव पितृप्रभृतयो वृद्धाः तान् शासति तथैव शास्त्राण्यपि अस्मद्धिततत्परतया अस्मान् शासति । तत्र अविश्वासः क्रियमाण नैवोचितः, अन्ते अनर्थपर्यवसायी भवेत् ।

रामकृष्णौ— क्षन्तव्यम् । स्फुटतरप्रतिपत्त्यै पुनः पृच्छावः । वयं वृद्धाः बुद्धिप्रौढिं प्राप्तवन्तः स्मः । शास्त्राणीति मूढप्रतिपत्त्या तदुक्तमर्थं तथैवेत्य- ध्यवसातुं हृदयं न सम्मन्यते । प्रत्यक्षेण वा अनुमानेन वा संवादविरहे कथं कश्चिदर्थो निश्चितो भवेत् ? विमर्शे तदनुसारिणि अवधारणे च किल बुद्धिः प्रवर्तते ।

आचार्यः— को नाम विषयाणां विमर्शं तदनुसारि अवधारणं च प्रतिषेधति ? कामं यथाशक्ति तत्सर्वं क्रियताम् । किन्तु विमर्शेन मार्गगामिना भवितव्यम् । एरण्डतैलं तिक्तम्, शर्करातुमधुरेति सर्वप्रत्यक्षमिदम् । अयं विवेक आबालगोपालं सर्वेषां साधारणः । तेन बालाः औषधमिति कृत्वा दीयमानं एरण्डतैलं पातुं नेच्छन्ति । अथापि वृद्धाः निर्बध्य पाययन्ति । कथमिदं युज्यते ? विवेकिन एव हि बालाः । ते ब्रुवन्ति तिक्तमिदं किमर्थमस्माभिः पातव्यमिति । हितमिदं पश्चादारोग्याय कल्पिष्यत इति यद् वृद्धा वदन्ति तत्र तेषां विश्वासो नास्ति । तत्र किं प्रतिपत्तव्यमिति सावधानं भवन्तौ पर्यालोचयितुमर्हतः ।

# वीरलब्धं पारितोषिकम् ॥

[ R. Ramamurti, M. A. ]

कुटिलः चक्रवर्तिनः युद्धतन्त्रकौशलं वीक्ष्य विसिष्मये । उपधान- पुरीप्रयाणं अनिवेदितवन्तं पाण्ड्यनृपतिं प्रति तदीयं मनः न विशश्वास । तथाऽपि, पतितः पातकी नरः, पुनः पतन् पातालमेव प्रयाति, न कदापि आत्मानं उद्धर्तुं यतते । कृतघ्नः कुटिलः चित्रदर्शनं अभिनयन् अगदत्– 'राजन्, अमुं विषयमधिकृत्य व्यापृतपूर्वं मे प्रज्ञाचक्षुः । दश-

सहस्रसंख्याका वाजिसेना मदधीना त्रालिगिरिमार्गेण गच्छतु । अवशिष्टः भागः दीर्घेण पथा प्रयातु । गगनचारिणं गरुत्मन्तमपि धिक्कुर्वता जवेन चलन्ती मदायत्ता चमूः— दीर्घदर्शिनः भवन्त एव अधुना अब्रुवन्— अवलिप्तस्य आत्मविनिपान्वेषिणः पाण्ड्यस्य सेनां पृष्ठतः अपहन्तु । अनाकलिता इयं आपत् पाण्ड्यभटान् पलायनशरणान् करिष्यति । नैव ते तेषां प्रधानपुरीं मधुरां गन्तुं शक्ताः, यतो वयं मार्गनिरोधका भवेम । तावता कालेन अवशिष्टः सैन्यभागः पूज्यैः भवद्भिः नीयमानः आगतः स्यात् । तदानीं पाण्ड्यसेनायाः द्वौ भागौ उपरुद्धौ भवेताम । 'त्रीन् लोकान् संपरिक्रम्य त्वामेव शरणं गतः' इति नीति स्मरन्निव पाण्ड्यः राजाधिराजं भवन्तमेव शरणं यास्यति । भवच्चरणकमलं विना, अन्यत् किं तं त्रातुं प्रभविष्यति" इति ।

"प्रभो, चोलदेशदयित, श्रुतिमनोहराः एता वाचः, नैव स्नेहार्द्राः, ताः सविषाः मधुनो धाराः । कुटिले मायामारीचकुरङ्गेनैव विश्वासः कार्यः, नैव कार्यः । लेखममुं पाण्ड्यभूपतिमुद्राङ्कितं कुटिलाय अस्मै राजद्रोहिणे प्रेषितं विलम्बं विना भवन्तः पठन्तु" इति उच्चैः आक्रोशन् पटमण्डपस्य अन्तः प्रवेशं विनिवारयन्तं दौवारिकं भटं मुष्टिबलेन भूमौ पातयन्, अविरतदीर्घप्रयाणखिन्नः, धूलिधूसरितगात्रः विजयः भूवल्लभस्य पादौ जग्राह, प्रणनाम, लेखं च ददौ । केसरिणः गोमायुरिव विजयात् कुटिलः विश्वासः बिभाय । पार्श्वलङ्घिन्या छुरिकया विषदिग्धया विजयं हन्तुं तस्य अग्रहस्तः अन्यैः अदृष्टः प्रससार । तथापि, आगामिवृत्तान्तोल्लेखविशारदः प्रथमामात्यः एकेन वेत्रलताप्रहारेण, विक्रान्तविद्युद्वेगेन, वज्रसदृशेन तस्य प्रकोष्ठं शिथिलयामास । वेणुयष्टिप्रहारेण व्रणितशरीरः पन्नग इव, कुटिलः बहुविधं शरीरकौटिल्यं व्यथाधिक्येन कुर्वन् अवन्यां अपतत्, अलुठच्च । सचिवशासनात् आगतौ वीरौ तं बबन्धतुः । लेखपठनेन कालरुद्र इव क्रुद्धः चोलसंराट् अनर्दत्, "अमुं नीचं, मानुषराक्षसं अधुनैव सहस्रशः छित्वा गृध्रेभ्यः किरत" इति ।

समराङ्गणे विजयः एव विक्रमार्जिततुरङ्गसेनानायकः बभूव । पराजितः पाण्ड्यः प्राणभिक्षां ययाचे । विजयासवमत्ता चोलवाहिनी तञ्जापुरीं पुनः प्रतस्थे । भटानां प्रयाणपरिपाटी, "गायन्ति केचित्, प्रहसन्ति केचित्" इत्यादिकवेः वाग्वैभवं प्रतिभाभासुरं पश्यतां स्मारयामास । क्रमशः अतिमहता कोलाहलेन तञ्जापुरीं प्रविवेश विजयलक्ष्मी

सनाथा विश्ववन्दिता चोलचतुरङ्गसेना प्रमुदितपौरजनाभिनन्दिता।

अपरस्मिन् अहनि राजराजचोलः विजयं वात्सल्येन परिष्वज्य, स्तम्भितबाष्पवृत्तिकलुषेण कण्ठेन जगाद— 'प्रियसेनापते, इदं चोल-साम्राज्यं आगतात् अपायात् अधुना त्वयैव सुरक्षितम्। सचिवः, सेनापतिश्च राज्यस्य च किन्न श्वासकोशौ? त्वं राशीभूतानां सामर्थ्यानां सारः। पाण्ड्यदेशे युद्धतन्त्रं त्वं अधीतवान्। भवदीयः मान्यः मातुलः पाण्ड्यसेनापतिः, तव युद्धशास्त्रोपदेशकश्च। एतत्सर्वं को वा अधरीकर्तुं शक्नोति। तस्मादेव तव अव्याजं जन्मभूमिवात्सल्यं, अचञ्चलां राज-भक्तिं च प्रशंसामहे। तव मातुलं स्मरन्तः वयं पाण्ड्याय प्राणभिक्षां अदाम। वाङ्मात्रेण कार्तज्ञ्यनिवेदनं महीपतीनां मालिन्यं प्रक्षाळनाक्षमं प्रसूते। यत् पारितोषिकं तव अभीप्सितं तत् वृणीष्व। विना प्रति-वचनं दातुं सज्जाः स्मः' इति। प्रेमपेशलानि एतानि वचनानि श्रुत्वा विजयः प्रतिबभाषे, "अव्याजभक्तिः अर्थं न ईहते। भवान् मम कल्प-तरुः। राजनि प्रसन्ने, किमिहास्त्यलभ्यम्? तथाऽपि नरेन्द्रस्य वात्सल्य-निष्यन्दिनी आज्ञा अनुल्लङ्घनीया। राजभवने शशिलेखानाम्नी काचन तरुणी अस्ति। तां विवोढुं अनुमतिं अपेक्षे" इति।

"अहेतुः पक्षपातो यः तस्य नास्ति प्रतिक्रिया। स हि स्नेहात्मकस्तन्तुः अन्तर्भूतानि सीव्यति" इति कविवचनं त्रिकालसत्यं मन्ये। गर्भेश्वरी, अभिनवयौवनकोमलाङ्गी, अप्रतिमरूपवती, अप्रतिहतशक्तिमती ललना अस्य चोलसाम्राज्यसेनापतेः सुलभा। अथापि अयं शशिलेखायै स्पृह-यति। अनुरागवते यूने सर्वं तृणायते। वृद्धस्य लोकनिष्णातस्य, यूनः पारस्परिकानुरागपञ्जरशुकस्य च अयमेव शाश्वतिकः महान् विभेदः।" इति मीमांसमानः प्रार्थितं पारितोषिकं प्रादात् पृथ्वीपतिः।

कदाचित् सायङ्काले, कुसुमितसमये, चन्द्रिकायां, तुहिनगिरिधवले अभ्रंलिहाग्रे प्रासादे शशिलेखा भुवनचन्द्रिकेव सञ्चरन्ती आसीत्। उदितं चन्द्रहासं, उन्मिषन्ति तारकाणि निर्मलनीलं निस्सीमं नभश्च वीक्षमाणा, तेषां रामणीयको रममाणो निष्प्रतिद्वन्द्वं रमणं स्मारं स्मारं पुलकिताङ्गी अवर्तत। शब्दं विना दयितायाः समीपमुपसृत्य, हस्ताभ्यां तस्याः कञ्ज-लोचने मृदु पिधाय, विजयः, 'मम प्राणेश्वरी कां चिन्तां लालयति' इति अभणत्। कान्तस्य हस्तौ नयने समर्प्य सा, 'मम प्राणनाथस्य अपारां करुणामनाथायै परिचारिकायै अभिषिक्ताम्' इति प्रेमातिशयेन शारि-

केव सुमधुरमुवाच । 'हृदयन्त्येव जानाति प्रीतियोगं परस्परम् ।' 'कर्णामृतानि मनसश्च रसायनानि ।' तानि वचांसि श्रुत्वा आनन्दपूर्णः विजयः, "प्रिये, चारुस्मिते, चारुदति, अहमेव तव परिचारकः । त्वं हि मम त्रिभुवनालभ्यं अनर्घं पारितोषिकम् । 'अद्यप्रभृत्यवनताङ्गि तवास्मिदासः" इत्यजल्पत् । साऽपि पल्लविता अतिमुक्तलता सहकारमिव, तं परिषस्वजे ।

---

# प्रकृतिभेदः ॥

कनिष्ठः— किमार्य ; को विशेषः ? अतर्कितमागतोऽसि । ब्रूहि कस्य किमापतितम् । मुखं ते कथयति गुरुणा शोकेन अवसन्नहृदयोऽसि । कथं न किञ्चिद् भाषसे । स्तब्धेव ते वाक् । आर्य, चरणौ ते वन्दे । मैवं भूः । धीरो भव । घोरतमा विपत् आपततु । अकलुषशेमुषीकैरस्माभिर्भवितव्यम् । आत्मानं पर्यवस्थापय । ब्रूहि का वार्ता ग्रामे । कच्चिद् गृहे सर्वे कुशलिनः ?

ज्येष्ठः— (कथञ्चित् प्रत्युपस्थितवाक्) आयुष्मन्, ग्रामे अस्मद्गृहमिदानीं रिक्तं वर्तते । अतीतायां रात्रौ चोरैः प्रविश्य सर्वस्वमपहृतम् । शूर्पसम्मार्जन्यादिकमपि नावशेषितम् । सम्मृज्य सर्वं जहुः ।

कनिष्ठः— तथा नु । भवतु । कथं पिता वर्तते ?

ज्येष्ठः— ज्ञातमात्रे वृत्ते स मूर्छितः । प्रज्ञाप्रतिलम्भाय यतमाना वर्तन्ते ।

कनिष्ठः— अथ अम्बा ?

ज्येष्ठः— सा किमपि किमपि वदन्ती रोदिति । सन्ततधारमश्रु वर्तयति । उन्मत्तेव दृश्यते ।

कनिष्ठः— प्रसवाय आगता अग्रजा ?

ज्येष्ठः—सा अतिपरुषाक्षरं अद्यतनीं राज्यशासनपद्धतिं उपालभमाना आविष्टेव उच्चावचं जल्पति ।

कनिष्ठः— आर्य, शिरसा त्वां याचे निस्सङ्गप्रसन्नमना भवान् भवतु । आवामद्यैव प्रतिष्ठेवहि । ग्रामं गच्छेव । पित्रादीन् आश्वासयेव । कोटिरागच्छतु, कोटिर्नश्यतु । आत्मा असङ्गो रक्षणीयः ।

ज्येष्ठः— वेदान्तं त्वं भाषसे । किं सर्वेषामेवं भवितुं शक्यम् ?

कनिष्ठः— न केवलं वेदान्तः, लोकान्तोऽप्ययमेव । रोदनादिना किं भवति ? दुर्बलहृदयानां सा गतिः । एहि याव ।

---

# पुस्तकपरामर्शः ॥

बालचन्द्रोदयः । कोराडा श्रीरामचन्द्रकविप्रणीतः ।
श्री K. Ramakrishnaiya, 33, Singarachari street, Triplicane, Madras. अतो लभ्यः । आणकाष्टकमूल्यः ।

एतत्समानकर्तृकस्य घनवृत्तनाम्नः काव्यस्य परामर्शं कुर्वन्तो वयं अस्य श्री रामचन्द्रकवेः सम्बन्धिनः इदन्तादीन् विषयान् पूर्वसञ्चिकायां उक्तवन्तः स्मः । उक्तिप्रत्युक्तिप्रचुरेऽस्मिन् प्रकृते गद्यप्रबन्धे प्रथमा कला द्वितीया कलेति भागद्वयवति अभ्यागतस्य कस्यचिद् विदुषः केनचित् श्रोत्रियेण विनीतविद्वत्पुत्रसहितेन कृताः प्रेमनिर्भराः स्वागतव्याहारप्रभृतय उपचाराः ललितविशदमनोहरया रीत्या वर्ण्यन्ते । आरामदीर्घिकादिवर्णनं तत्र तत्र कृतं सहृदयाराधनाय अलम् । एतद्ग्रन्थप्रकाशकेन श्रीरामचन्द्रकवेः पौत्रेण कोराड रामकृष्णाख्येन विदुषा एवं उपोद्घाते लिख्यते—

संस्कृतगद्यरूपमेतत् काव्यमल्पे वयसि दिवं गतस्य अधीतसर्वशास्त्रस्य रामकृष्णाख्यस्य द्वितीयकुमारस्य स्मरणार्थं रामचन्द्रकविना विरचितमिति श्रूयते । संस्कृतभाषायां तदभ्यसने च अत्यन्तमाविष्कृतोत्साहे अस्मिन् काले तद्भाषाभ्यासपराणां बालानां चन्द्रोदय इव आह्लादजनको भवेदयं बालचन्द्रोदय इत्याशयेन प्रकटीकृतमेतत् काव्यम् ।

इति ।

TIRUPATI.

---

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५६ मन्मथ - कुम्भ [सं ६

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

FEBRUARY 1956

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः — श्रीगीतार्थदीपः । १५३—१६०

१५३

शरीराश्रितेन्द्रियप्राणेषु कर्तृत्वसन्न्यासमभिधायानन्तरं तदाश्रये शरीर एव कर्तृत्वसन्न्यास उच्यते— आत्मनः 'प्राचीनकर्ममूलदेहसम्बन्धप्रयुक्तमिदं कर्मणां कर्तृत्वम्, न स्वरूपप्रयुक्तमिति विवेकविषयेण मनसा सर्वाणि कर्माणि नवद्वारे पुरे सन्न्यस्य देही स्वयं वशी - अभिमानबलात्काराद्यविषयः, देहाधिष्ठानप्रयत्नमकुर्वन् देहं च नैव कारयन् सुखमास्ते— कर्तृत्वाभिमानप्रयुक्तक्लेशादिरहित आस्ते । मुख्यैस्सप्तभिरर्वाक् द्वाभ्यां चात्र नवद्वारता पुरस्य । 'पुरमिव शरीरं पौरानिवेन्द्रियाणि सार्वभौममिव परमात्मानं भृत्यमिव स्वात्मानं पश्यतो भवति हि स्वास्थ्यम् । देहात्मभ्रमे हि पुरादिष्वासीनोऽहमिति मन्यते, तन्निवृत्तौ च देह एव पुरस्थानीयो भवति ।

கர்மாக்களைப் பற்றிய கர்த்ருத்வமானது தனக்கு இயற்கையன்று. தேஹஸம்பந்தத்தினால் ஏற்பட்டது. ஒரு கார்யத்தைச் செய்தலோ, செய்வித்தலோ தனக்கு ஸ்வாபாவிகமன்று என்று இவ்வாறு தெளிவுள்ள மனதினால் தேகத்தில் அபிமான மற்று இவ்வாத்மா ஸுகமடைகிறான். 13

२१८ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

'एवमौपाधिकस्य स्वरूपस्योपाधिषु संन्यास उक्तः, अथ स्वस्मिन्ननुसन्धेयस्वाभाविकरूपमुच्यते'— लोकस्य - देवतिर्यङ्मनुष्यस्थावरात्मना प्रकृतिसंसर्गेण वर्तमानस्य विचित्रजनस्य, देवाद्यसाधारणं कर्तृत्वं प्रयत्नादिरूपम्, कर्माणि - शरीरेन्द्रियादिचेष्टाः, तत्तत्कर्मजन्यदेवादिफलसंयोगं च अयं प्रभुः - अकर्मवश्यः - स्वाभाविकस्वरूपेणावस्थित आत्मा, न सृजति नोत्पादयति, कस्तर्हि सृजतीति चेत्, स्वभावस्तु प्रवर्तते । स्वभावः - प्रकृतिवासना, वासनाकृतानि कर्तृत्वं कर्माणि कर्मफलसंयोगश्च । कर्तृत्वादिकं सर्वं न स्वरूपप्रयुक्तम् । अत्र हि प्रकरणे 'मयि सर्वाणि' इत्यादिना जीवस्य कर्तृत्वं परमात्मन्यध्यस्यते ; अतोऽत्राकर्तृविषयः प्रभुशब्दः न परविषयः ।

தேவமநுஷ்யாதி ஜாதிக்குரியதான ப்ரயத்னம், கர்மாக்கள், அவற்றின் பல ஸம்பந்தம் ஆகிய எல்லாவற்றும் ப்ரக்ருதி

ஸம்பந்தத்தினாலுண்டான அவ்வாத்மாபிமாந மூலகமான வாஸனையினால் ஏற்பட்டது. கர்மஸம்பந்தமற்றவாத்மஸ்வரூபத்திற்கு இவை கிடையா. 14

२१९ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

आत्मनोऽकर्तृत्वादिकस्य, वासनायाः कर्तृत्वादिकस्य च क्रमेण विवरणं श्लोकस्यास्यार्धद्वयम् । पापसुकृतशब्दाभ्यां तत्कार्यं दुःखं सुखं च लक्ष्यते । कस्यचित् - स्वसम्बन्धितयाऽभिमतस्य पुत्रादेः, पापं - दुःखं, नादत्ते - नापनुदति, कस्यचित् - प्रतिकूलतयाऽभिमतस्य, सुकृतं - सुखं, नादत्ते - नापनुदति, विभुः - तत्तत्कर्मानुकूलसमस्तदेहानुप्रवेशयोग्यः, प्रतिनियतदेशरहितोऽयं चेतनः अत एवानुकूलप्रतिकूलरूपविषयकं दुःखसुखयोरपनयनमौपाधिकम् ; नात्मस्वरूपप्रयुक्तम् । विभुशब्दोऽत्र न परिमाणविशेषविषयः, जीवस्याणुत्वात् । नापि प्रभुत्वपरः, अनुपयुक्तत्वात् ; अतः प्रतिनियतदेशराहित्यपरः । एवं स्वभावस्य स्वभावविरुद्धवासना कथमुत्पद्यत इति चेत् ? अज्ञानेन - ज्ञानविरोधिना पूर्वपूर्वकर्मणा, अस्य ज्ञानं आवृतं - सङ्कुचितम्, तेन ज्ञानावरणरूपेण कर्मणा जन्तवः देवादिदेहेष्वात्माभिमानरूपं मोहं प्राप्नुवन्ति । ततश्च तत्तदात्माभिमानवासना, तदुचितकर्मवासना च ; वासनातो विपरीतात्माभिमानः, कर्मारम्भश्चोपपद्यते ।

இவ்வாத்மாவிற்கு தேவன் என்றும் மனுஷ்யன் என்றுமிவ்வாறாக தேஹநியதி என்பது கிடையாது. எல்லா தேஹங்களையும் கைக்கொள்ளுகிறவன். ஆகவே இயற்கையாக இவனுக்கு அநுகூலன் ப்ரதிகூலன் என்பவன் கிடையாது. யாருடைய சுகத்தையும் துக்கத்தையும் இவன் போக்குவதில்லை. இத்தகைய ஸ்வபாவம் பெற்றிருக்கச் செய்தேயும பூர்வகர்மாவினால் ஜ்ஞாநம் மறைக்கப்பட்டு அதனால் ஜந்துக்கள் தேவாதிதேஹங்களில் ஆத்மாபிமாநமாகிய மோஹத்தை அடைகிறார்கள். அந்த வாஸனையினால் அதற்குரிய கர்மாக்களைச் செய்கின்றார்கள். ஆகலால் வாஸனையென்கிற ஸம்ஸ்காரமே கர்மகர்த்ருத்வத்திற்குக் காரணம். 15

२२० ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥ १६ ॥

एवं तृतीयाध्यायोक्ताकर्तृत्वानुसन्धानस्य प्रकारविशेषाः प्रतिपादिताः; अथ 'सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि' इत्यादिना चतुर्थाध्यायोक्तस्य ज्ञानविशेषस्य विशोधनं क्रियते। आत्मनो ज्ञानेनेत्यन्वयः। तुशब्देन ज्ञानस्य विशेषो द्योत्यते। येषां - आत्मनां, उक्तलक्षणेनात्मयाथात्म्यविषयेण ज्ञानेन तत् - ज्ञानावरणं, अज्ञानं - कर्मसञ्चयरूपं, नाशितं, तेषां तत् स्वाभाविकं, परं - अपरिमितमसङ्कुचितज्ञानम्, आदित्यवत् सर्वं यथावस्थितं प्रकाशयति। आदित्यशब्दोऽत्रादित्यप्रभापरः। 'तेषामादित्यवज्ज्ञानम्' इति व्यतिरेकनिर्देशात् ज्ञानस्य स्वरूपानुबन्धिधर्मत्वमुक्तम्; आदित्यदृष्टान्तेन च ज्ञानज्ञात्रोः प्रभाप्रभावतोरिवावस्थानं च दर्शितम्। तत एव संसारदशायां ज्ञानस्य कर्मणा सङ्कोचो मोक्षदशायां विकासश्चोपपन्नः। 16

எவர்களுக்கு ஆத்மாவைப்பற்றிய தத்வஜ்ஞானத்தினால் ஜ்ஞானவிகாஸவிரோதியான பூர்வகர்மாவானது அழிக்கப்பட்டதோ, அவர்களுக்கு மோக்ஷதசையில் ஏற்படும் ஸ்வாபாவிகமான ஜ்ஞானவிகாஸமானது சூரியனுடைய ஒளிபோல் எல்லாவற்றையும் தெளிவாகக் காண்பிக்கின்றது.

२२१ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

'आत्मानुभवसौधसोपानस्य ज्ञानस्यारोहणक्रमं दर्शयति'– तद्बुद्धयः तथाविधात्मदर्शनाध्यवसायाः, तदात्मानः - तद्विषयमनसः, द्रष्टव्यत्वाध्यवसायानन्तरदर्शनार्थप्रवृत्तियुक्ता इति यावत्। तन्निष्ठाः, निष्ठा - अभिनिवेशः, तात्पर्यम्, तस्मिन्नेवात्मनि निष्ठा येषां ते तन्निष्ठाः - तदभ्यासनिरताः, तत्परायणाः - अयनशब्दोऽत्र कर्मणि ल्युडन्तः प्राप्यपरः; तदेव परमप्रयोजनमिति मन्वानाः, ज्ञाननिर्धूतकल्मषाः - एवमभ्यस्यमानेन ज्ञानेन निर्धूतप्राप्तिप्रतिबन्धककल्मषाः, अपुनरावृत्तिं गच्छन्ति - यदवस्थादात्मनः पुनरावृत्तिर्न विद्यते, स आत्मा अपुनरावृत्तिः; स्वेन रूपेणावस्थितं आत्मानं

गच्छन्ति । औपाधिकसमस्ताकारनिवृत्तिरूपावस्था विनाशकासम्भवात् अनिवर्त्येति भावः ।

ஸ்வாபாவிகாத்மஸ்வரூபத்தை ஸாக்ஷாத்காரம் செய்வதிலேயே ஊக்கமும், ப்ரவ்ருத்தியும், அப்யாஸமும், அதுவே ப்ராப்யம் என்கிற அத்யவஸாயமும் உடையவர்கள் இவ்வாறான யோகாப்யாஸத்தினால் ஆத்மப்ராப்தி ப்ரதிபந்தக கர்மாக்களைப் போக்கி ஸ்வரூபாவிர்பாவம் பெற்ற ஆத்மாவை அநுபவிக்கிறார்கள். 17

२२२ विद्याविनयसम्पन्ने ब्राह्मणे गविहस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ १८ ॥

आत्मसाक्षात्कारस्वरूपं *'येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि' इति प्रागुक्तं व्यनक्ति — प्रथमं सप्तम्यन्तपदद्वयं न समानाधिकरणं, निर्विशेषणसमुदायसहपठितत्वात् । गुणतो विषमे विद्याविनयसंपन्ने केवलब्राह्मणे च, आकारतो विषमे गवि हस्तिनि च, वृत्त्या विषमे शुनि श्वपाके च, पण्डिताः - ऊहापोहक्षमा, धीः पण्डा, तद्वन्तः, आत्मयाथात्म्यविदः, ज्ञानैकाकारतया सर्वत्र समदर्शिनः ; विषमाकारस्तु प्रकृतेः, नात्मनः, आत्मा तु सर्वत्र ज्ञानैकाकारतया सम इति पश्यन्ति ।

வித்யை, விநயம் இவையுள்ளவன், ஜாதி மாத்திர பிராம்ஹணன், மாடு, யானை, நாய், சண்டாளன், ஆகிய வஸ்துக்கள் யாவற்றிலும் ஆத்மாஜ்ஞாநஸ்வரூபனாய் ஸமனாயிருப்பவன். வேற்றுமையானது சரீரத்திற்கேயுள்ளது என்பதாக ஞானிகள் பார்க்கின்றார்கள். 18

२२३ इहैव तैर्जितस्सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ १९ ॥

समदर्शिनां प्रशंसा क्रियते — येषामुक्तरीत्या सर्वेष्वात्मसु साम्ये मनः स्थितम् ; तैः इहैव - साधनानुष्ठानदशायामेव, सर्गः - संसारः, जितः - मुक्तप्रायास्ते । निर्दोषं हि समं ब्रह्म - प्रकृतिसंसर्गदोषरहितं अत एव

* गी-४-३५

समं आत्मवस्तु हि ब्रह्म, तस्मात् समस्य ब्रह्मत्वात् , ते - समदर्शिनः, ब्रह्मणि स्थिताः— आत्मसाम्ये स्थिताश्चेत् ब्रह्मणि स्थिता एव ते। ब्रह्मणि स्थितिरेव हि संसारजयः, अतः 'इहैव तैर्जितस्सर्गो येषां साम्ये स्थितं मनः'। ब्रह्मशब्दोऽत्र शुद्धात्मनि ब्रह्मसाम्यात् वर्तते।

முன் சொல்லியபடி ஸமதர்சநம் பெற்றவர்கள் இந்த நிலையிலேயே ஸம்ஸாரஜயம் பெற்றவர்கள். ஏனென்றால்— ப்ராக்ருதிஸம்பந்தமற்று ஸமமான ஆத்மவஸ்துவே ப்ரஹ்மஸமாநமாகையினால் ப்ரஹ்மம் எனப்படும். ஆகையால் ஸமதர்சிகள் ப்ரஹ்மத்திலிருப்பவர்கள். இந்நிலையே ஸம்ஸாரஜயமெனப்
படும். 19

२२३ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद्ब्रह्मणि स्थितः॥ २०॥

येन प्रकारेणावस्थितस्य कर्मयोगिनस्समदर्शनरूपो ज्ञानविपाको भवति, तं प्रकारमुपदिशति— ब्रह्मवित् - उपदेशेन आत्मयाथात्म्यवित्सन् ब्रह्मणि स्थितः - तस्मिन् ब्रह्मण्यभ्यासयुक्तः, असम्मूढः - अस्थिरेण शरीरेण स्थिरमात्मानमेकीकृत्य मोहः सम्मोहः, तद्रहितः, स्थिरबुद्धिः - स्थिरे आत्मनि बुद्धिर्यस्य सः स्थिरबुद्धिः, प्रियं वस्तु प्राप्य न प्रहृष्येत्। अप्रियं वस्तु प्राप्य नोद्विजेच्च। ब्रह्मशब्दः शुद्धात्मपरः।

ஞானிகளின் உபதேசத்தினாலே ஆத்மஸ்வரூபத்தின் நிலையைத் தெளிந்து ஆத்மாப்யாஸமுடையவனாய், தேஹாத்மாபிமானத்தை விலக்கி, ஸ்திரமான ஆத்மாவையே ப்ரியமாகத் தெளிந்தவன் அஸ்திரங்களும் ப்ராக்ருதங்களுமான ப்ரியங்களையும் அப்ரியங்களையும் பெற்றும் ஸந்தோஷத்தையும் துக்கத்தை
யும் அடையமாட்டான். 20

२२४ बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यस्सुखम्।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥ २१॥

एवं उक्तेन प्रकारेण बाह्यस्पर्शेषु - आत्मव्यतिरिक्तविषयानुभवेषु, असक्तात्मा- असक्तमनाः, अन्तरात्मन्येव यत्सुखं लभते, सः ब्रह्मयोगयुक्तात्मा, प्राकृतशब्दादिभोग्यचिन्तां विहाय ब्रह्माभ्यासयुक्तमनाः, ब्रह्मानुभवरूपं अक्षयं सुखं प्राप्नोति । उपदेशादिजन्यज्ञानमूलं सुखं पूर्वार्धोक्तम् । साक्षात्कारानन्तरभावि नित्यं सुखमुत्तरार्धोक्तमिति विशेषः ।

ஆத்மாவைத் தவிர்த்து மற்ற விஷயாநுபவங்களில் பற்றுதலற்று ஆத்மாவையே சுகமென்று உபதேசமுகத்தாலே தெளிந்தவன் ஆத்மாப்யாஸத்திலேயே ஈடுபட்டு ஆத்மப்ராப்தியாகிற அழிவற்ற ஸௌக்யத்தைப் பெறுகிறான். 21

२२५ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥

प्राकृतस्य भोगस्य सुत्यजतामाह—कौन्तेय ! ये विषयेन्द्रियसम्बन्धजन्याः भोगाः, ते दुःखहेतवः आद्यन्तवन्तः - अल्पकालवर्तिनो हि । न तेषु बुधो रमते । बुधशब्देनात्रोपरमोपयुक्तपञ्चविधविवेकवत्त्वं विवक्षितम् । आर्जनदोषाः, रक्षणदोषाः क्षयदोषाः, भोगदोषाः, हिंसादोषाः इति पञ्चविधाश्चैते दोषाः प्राकृतवस्तुगताः प्रत्यक्षादिसिद्धाः । तद्भावनावतां बुधानां सुत्यजाः प्राकृता भोगाः ।

ஐங்கருவிகண்ட சப்தம் முதலியவற்றின் போகங்கள் இறுதியில் துக்க காரணங்களும் அல்பங்களுமன்றோ ? அத்தோஷங்களையுணர்ந்தவன் அவற்றில் ஈடுபடமாட்டான். 22

२२६ शक्नोतीहैव यस्सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तस्स सुखी नरः ॥ २३ ॥

शरीरमोक्षणात्प्राक् इहैव— साधनानुष्ठानदशायामेव, आत्मानुभवप्रीत्या कामक्रोधोद्भवं वेगं सोढुं निरोद्धुं यश्शक्नोति, स युक्तः— आत्मानुभवायार्हः । युक्तशब्दोऽत्र समाधिलाभपरः । वेगश्चात्र मनोवाक्कायानामति-

त्वरिता प्रवृत्तिः। अनुचितविषयाभिध्याननीचचाटुनरपतिशुद्धान्तः पुरप्रवेशादयः कामजा वेगाः। परहिंसाद्युपायचिन्तनपरुषभाषणप्रहारादयः क्रोधजा वेगाः।

சரீரவியோகத்திற்கு முன்பே ஸாதநாநுஷ்டாநவேளையி லேயே யாவனொருவன் காமத்தினாலும் கோபத்தினாலுமுண் டாகும் வேகத்தைத் தடுக்கின்றானோ, அவனே ஆத்மாநு பவத்திற்குத் தகுதியுள்ளவன். அவனே பிறகு ஸ்திரமான ஆத்மாநுபவ ஸௌக்யம் பெறுகிறான். 23

२२७ योऽन्तस्सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥

एवं परित्यक्त प्राकृतभोग्यभोगोपकरणादिकं सर्वमात्मनि तदेकरसिकत्वाय कल्पयन् *'विन्दत्यात्मनि यत्सुखम्' इत्युक्तमुपायदशास्थं प्रपञ्चयति अन्तश्शब्दत्रयमत्र बाह्यव्यतिरेकादात्मपरम्। आत्मैवात्मन्येव वा सुखं यस्य सोऽन्तस्सुखः। अवधारणस्याविशेषेण सर्वत्रान्वयः। यो बाह्यविषयानुभवं सर्वं विहाय अन्तस्सुख एव आत्मानुभवैकसुखः, अन्तराराम एव — आत्मैकोद्यानः, आरामो हि छायापल्लवपुष्पफलादिभिस्स्वगुणैस्सुखवर्धकः। तद्वदत्रापि स्वगुणैरपहतपाप्मत्वज्ञानानन्दादिभिः आत्मैव सुखवर्धक इत्यारामशब्देनोपचर्यते। तथान्तर्ज्योतिरेव— आत्मैकज्ञानः, यो वर्तते, स ब्रह्मभूतः। यथावस्थितासङ्कुचितज्ञानादिस्वरूपेणावस्थितः, योगी ब्रह्मनिर्वाणं आत्मानुभवसुखं अधिगच्छति। ब्रह्मैव निर्वाणं ब्रह्मणि निर्वाणं, इति वा विग्रहः। पूर्वार्धे विशेषणत्रयेण क्रमात् भोग्यं भोगस्थानं भोगोपकरणादिकञ्चात्मैवेत्युक्तम्।

புறவின்பங்களில் பற்றுதலற்று ஆத்மாவையே போக்ய மும் போகஸ்தாநமும் போகோபகரணமுமாகக் கொண்டு யோகியானவன் ஆத்மாவைப்பற்றிய தெளிவு பெற்று ஆத்மாநு பவமாகிற ஸுகத்தைப் பெறுகிறான். 24

---

* गी. ५. २१

२२८ लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥ २५ ॥

"समदर्शित्वरूपज्ञानविपाकसिद्ध्यर्थं अनुष्ठान प्रकारो हि 'न *प्रहृष्येत्' इत्यादिनोच्यते । तत्र हर्षोद्वेगनिवृत्तिः, बाह्यविषयनिरसङ्गत्वं तदर्थदोषदर्शनं कामक्रोधवेगनिवारणम्, आत्मन्येव सर्वविधभोग्यताकल्पनं च क्रमाच्छ्लोकपञ्चकेनोक्तम् । अथ प्रागुक्तद्वन्द्वसहत्वादिस्मारणपूर्वकं सर्वभूतहिते रतत्वं नाम समदर्शित्वेऽत्यन्तान्तरङ्गं साधनमुपदिश्यते—छिन्नद्वैधाः— शीतोष्णादिद्वन्द्वैर्विमुक्ताः, द्वैधशब्दस्यात्र भेदस्वरूपसंशयाद्यर्थकत्वमनुचितम् । यतात्मानः— आत्मन्येव नियमितमनसः, सर्वभूतहिते रताः— आत्मवत्सर्वेषां भूतानां हितेष्वेव निरताः, §श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम् । आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥' इति पञ्चमवेदद्रष्ट्रा परमर्षिणा निर्णीतोऽयमर्थः । ऋषयः - द्रष्टारः आत्मावलोकनपराः, एवंविधसाक्षात्कार-सिद्धावनिष्टनिवृत्तिरिष्टप्राप्तिश्च 'क्षीणकल्मषाः' 'ब्रह्मनिर्वाणं लभन्ते' इत्युभाभ्यामुच्यते— क्षीणाशेषात्मप्राप्तिविरोधिकल्मषाः, आत्मानुभवसुखं लभन्ते' ।

சீதோஷ்ணம் முதலிய த்வந்த்வங்களில் நின்றும் விடுபட்டு ஆத்மாவிடத்திலேயே மனதையடக்கி எல்லா ப்ராணிகளிடத்திலும் நன்மை செய்வதில் ஊக்கமுடையவர்களாயிருப்பவர்கள் ஆத்மப்ராப்தி விரோதிபாபம் கழிந்து ஆத்மாநுபவஸுகத்தை அடைகிறார்கள். 25

२२९ कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विजितात्मनाम् ॥ २६ ॥

एवं षड्भिः श्लोकैः समदर्शित्वसाधकमनुष्ठानप्रकारमुपदिश्य तत्र शीघ्रप्रवृत्तिसिद्ध्यर्थं फलस्याविलम्बितत्वमनन्तरमुच्यते- कामक्रोधवियुक्तोक्तिः †'शक्नोति' इति श्लोकार्थानुवादः । यतीनां यतनशीलानाम्, तेन ‡ न प्रहृष्येत्' इति श्लोकद्वयार्थोऽनूदितः । यतचेतसाम्—नियमितमनसां

* गी ५-२० § भारते † गी ५-२३ ‡ गी ५-२०

SANSKRIT VIDYA PEETH TIRUPATI

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 7

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५६ मन्मथ - मीन [सं ७

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

MARCH 1956

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription  Rs. Two only.

Do. With Sastraic Supplement  Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२ कन्यामासे साधारणसञ्चिका [illegible]नन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु सा[illegible] । अथ [illegible] षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥


1 शृङ्गारनारदीयम् ।
2 वरदाभ्युदयचम्पूः ।
3 मुकुन्दमाला ।
4 विमर्शगोष्ठी ।
5 श्येनोपाख्यानम् ।
6 वृद्धभाषितम् ।
7 प्रकृतिभेदः ।
8 श्रीवेङ्कटाध्वरी ।
9 पुस्तकपरामर्शः ।

TF56
६९



काकलिनिर्ह्रादि वचो
गर्भितहुंकारमधुरसन्नाहम् ।
वेल्लितकन्धरमवशात्
त्रिभङ्गभङ्गीविधेयतनुलतिकम् ॥

वक्षः पयोधराढ्यं
मध्यः क्षामो नितम्बि जघनतटम् ।
ऊरू गौरवभाजौ
मन्थरविक्षेपशिक्षितौ चरणौ ॥

बध्नाति सौकुमार्यं
प्रणयमयीमर्पयत्यहो मुद्राम् ।
व्यञ्जयति किं च चक्षु-
श्चाञ्चल्यं कापि नूतना रेखा ।

जटाभारो भूयानसितमसृणारालकबरी-
प्रबन्धोऽसव्यापी प्रविततनितम्बव्यतिकरः ।
वलक्षच्छाया साऽप्युपचिततपःकर्कशगुणो-
दये काये मल्लीमृदुनि कनकच्छेदसुषमा ॥

अक्षाणां मौक्तिकी माला मौञ्जी सा मेखलाऽभवत् ।
हन्त चित्रोज्ज्वलं पट्टदुकूलं मृगचर्म तत् ॥

कथमिदं बत मायिकं सरः । सलिलोत्तीर्णस्यापि हि मे नार्द्रता परिधाने किञ्चिदपि दृश्यते । अहो प्रमुषितोस्मि विपाकदारुणेनामुना क्षणमात्रं कृतसंस्तवः ।

खलचरितमिवेदं शीतलप्रायमादौ
विनिहितमतिमोहं प्राप्य विस्रम्भकाष्ठाम् ।
सपदि विपरिणामं कञ्चिदत्यन्तघोरं
प्रकटयति पटिम्ना दैवनिर्घाततुल्यम् ॥

हन्त भोः, ममपि नाम नारदस्य मायामत्स्यबन्धनीवशंवदता। तत्किमिदानीं करिष्ये। मन्मथान्धः खलु मूर्खः नात्मानं चिरं धारयितुमीष्टे। तत् प्रक्रमेत बलात् प्रधर्षणमुपेक्षितः। तेन हि कालक्षेपार्थमालापयिष्ये तावदेनं पशुम्। (दृगञ्चलेन वीक्षते)

ऋक्षरजाः— भामिनि, माभूत्ते मयि कोपः। परिचरणदासोऽयमङ्गीक्रियताम्। (इति सप्रश्रयं द्वित्रपदान्युपासीदति)

नारदः— (स्वगतम्)

अहो मसृणमुग्धस्य कान्ताऽपाङ्गस्य वैभवम्।
येनैवं क्रियते मौर्ख्यभराक्रान्तोपि पेशलः॥

(प्रकाशम्) (सेर्ष्यम्)

भो हरीश्वर, अभिजातमात्मानं व्यपदिशसि। न च जानासि मृदूपक्रमोपसेव्यमबलाजनम्।

ऋक्षरजाः—(साङ्गीकारम्) सुन्दरि, समीचीनं शिक्षितोऽस्मि। अत्यादरवशात् अतिलङ्घितः किञ्चिदिव समुदाचारः। तन्मे मर्षयितुमर्हसि। किञ्च, न च न जानाति ऋक्षरजाः अबलाजनस्य कुसुमसुकुमारप्रकृतिताम्; यः स्वयं स्त्रीभूय विलासिजनवैदग्ध्यस्य समुपात्तसारस्यगरिमा। तेन हि सुतनो, त्वामेतावन्तं कालमाकुलतयाऽन्तर्विचिकित्सन्तीं दूरतः प्रत्यपालयं निगृह्यात्मानम्।

नारदः— (सौत्सुक्यम्) कुतः खलु भवान् स्त्रीभूतः।

ऋक्षरजाः—अनेनैव सरसा स्नानमात्रात् स्त्रीकृतोऽहं पुरा सूर्यमहेन्द्राभ्यां समगंसि। प्रसूय च वालिसुग्रीवौ प्रकृतिं प्रत्यापन्नः।

नारदः— (सखेदं स्वगतम्) किमपत्यप्रसवावधिकमिदं स्त्रीत्वमनुभोक्तव्यम्। अहो धिक्, जुगुप्सितं खल्वापतितमाजानसिद्धस्वाच्छन्द्यस्य ममापि नारदस्य। किमिदानीं प्रतिपत्स्ये। कष्टं बत भोः स्त्रीत्वम्।

यतः,

प्रकृतिः पुरुषस्य सा प्रपञ्चं
सुषुवे तच्च बिभर्त्यपेततन्द्रा ।
तदियं वनिता प्रपञ्चसृष्ट्यै
रजसा विप्लवमभ्युपैति शश्वत् ॥

सर्वथा परतन्त्रोऽस्मि । अथ वा परतन्त्राऽस्मि । कुतोऽद्याप्यात्मनि मे नारदत्वाभिमानः ।

यथार्थं खल्वनेनोक्तम्—

"नारदो रदना जातो महर्षिर्योषिदुत्तमा"

इति । किमिदानीं मया ऋक्षरजसो रेतः सन्धारिण्या भवितव्यम् । शान्तं पापम् । नारदस्य वा रदनाया वा स एव प्रभुः परायणं नारायणः । अपि नाम प्रतिपत्स्यते । भवतु । एनं कथमपहस्तयिष्ये । (इति चिन्तयित्वा) आः स एष प्रयोगो हस्तगतः ।

ऋक्षरजाः— बाले, कालक्षेपासहं मामीदृशं किं न पश्यसि । सिमिसिमायन्ते ममाङ्गानि ।

वनितात्वदशावितीर्णभोगो
मदनो मय्युपसृष्टमित्रभावः ।
खलवृत्तितया विधाय वैरं
नितरां मां परिबाधते त्वदर्थे ॥

नारदः— (सरोषमिव) अयि मिथ्यावाचाट, विदग्धंमन्य, किं वाचाडम्बरेण स्त्रीहृदयमवचित्यावतंसयितुमभिलषसि । प्रणयः किल प्रणयमुत्पादयति । विस्रम्भकलानभिज्ञस्त्वमेहि मन्ये मुग्धनारीजनं भोक्ष्यसे इति । शृणु तावत् ।

भूषणवसनादीनां
दानैरवतंसतिलकरचनाद्यैः ।
वरिवस्ययाप्युपांशु
स्त्रीहृदयं कामिनो विचिन्वन्ति ॥

ऋक्षरजाः—स्थाने खलूपालम्भः ।

जरसा विकलो वलन्नमुष्मि-
न्नतनीयांसमनेहसं महाद्रौ ।
अनुकूलनतन्त्रमङ्गनानां
प्रसभं न स्मृतवान् किमत्र चित्रम् ॥

तेन हि, चन्द्रमुखि, चारुस्मिते, सुदति,

केनावतंसं परिकल्पयामि
सुमेन सौरभ्यविशेषशालिना ।
यत्तेऽस्तु नेत्राञ्चलचञ्चरीक-
गतागतोड्डामरचुम्बनोचितम् ॥

प्रिये, समाज्ञापय सेवाप्रकारम् ॥

नारदः — (अङ्गुल्या निर्दिशन्) तेन हि,

सरसीमुखमण्डलप्रभं
हसितश्रीपरिपोषबन्धुरम् ।
मधुपैः समुपात्तसौरभं
मधुमत्तामरसं समाहर ॥

ऋक्षरजाः— अहो महाननुग्रहः । इदमाहरामि ।
(इति सत्वरं परिक्रम्य सरोऽवगाढः)

नारदः — (सप्रहर्षम्) अपि नाम ऋक्षरजाः पुनः स्त्रीभूय मां दूरतः परिहरेत् ।

ऋक्षरजाः — (सरोमध्यंगतः सखेदम्) अहो तु खलु भोः, सहसा वञ्चितोऽस्मि दुष्टबालिकया । असौ किल नारदः । हा धिक्, कथमेवमपरीक्षितकारी संवृत्तोऽहम् । (इति सलज्जमात्मानं निर्वर्ण्य) स्त्री खलु ऋक्षरजाः पुनरेव, पुनरेव, पुनरेव । (इति शिरसि प्रहृत्य रोदिति)

नारदः — (विलोक्य उच्चैर्विहस्य) अहो ऋक्षरजः, मत्प्रियसखि, अलमायासेन । माभूदवतंसतामरसम् । एह्येहि । उत्कण्ठितासि । मम तावन्मदनदूती भवितुमर्हसि । (आत्मगतम्) अहो सौन्दर्यसम्पत् भूतपूर्ववानरायाः ।

निश्वासेन च दक्षिणानिलवती नेत्रेण लोलम्बिनी
बाहाभ्यां लतिकावतीह भवती बाले मधुश्रीरिव ॥ २१ ॥

श्रूयतां चेदम्—

वक्त्रं दर्शय सिन्धुपुत्रि कमल वार्यन्तरे लीयतां
वाचं व्याहर कोकिलः कलरवः सन्यासमासीदतु ।
वक्षोजौ प्रकटीकुरु स्थगयतां वल्ली दलैर्गुच्छकान्
पादौ दृष्टिपथे निधेहि तपसे प्रस्थीयतां पल्लवैः ॥ २२ ॥

पश्य दयिते—

पटीरपृथ्वीधरतटीकुटीरादवतीर्य पदवीं महतीमतीत्य फणिराजसरोवरावगाहनपरिपूतात्मा पवमानडिम्भः परिकलितमत्पूजनं पङ्कजासनमवलोक्य मामिदानीं नूनमाराधयते ।

आनीतैः कमलाकराज्जलकणैरर्घ्यादिदायी मरु-
न्माध्वीकैर्मधुपर्कमप्युपहरन्माकन्दतः स्यन्दितैः ।
प्रच्छन्नैव निवेदयन् फलकुलं पुष्पैश्च निष्पातितैः
तल्पं कल्पयति त्वया सह रमे रन्तुं प्रवृत्तस्य मे ॥ २३ ॥

अन्यच्च—

रदवसनरसं ते शीधुना किं वसन्ते
रमणि सह तुलामारोपयामास कामः ।
* चरम उपरिभागे शाखिनां दृश्यतेऽसा-
वधररस इति श्रीरादिमोऽभूत्प्रसिद्धः ॥ २४ ॥

---

* हे श्रीः पश्चान्निर्दिष्टः शीधुरसः लघुत्वात् शाखिनां वृक्षाणामुपरिभागे दृश्यते । आदिमः प्रथमनिर्दिष्टः, रदवसनरसः— ओष्ठरसः गुरुत्वादधोभागे स्थितः सन् अधरश्चासौ रसश्चेति व्युत्पत्त्या अधरस्थिति रसत्वेन प्रसिद्धोऽभूदित्यर्थः ।

विलोकय तलोदरि विविधानेतान् वातपोतस्य विहितमनोजमनो-विकारान् विलासान् ।

मोदं मेदुरयन् स्मरं सशरयन् मोहं च विस्तारयन्
मानं दुष्करयन् पिकान्मुखरयन्माध्वीरसं चोरयन् ।
वामाक्षीस्त्वरयन् वनं शिशिरयन्वैराग्यमुत्सारयन्
मन्दाक्षं तिरयन्मदं प्रचुरयन् मन्दोऽनिलः स्पन्दते ।। २५ ।।

किं बहुना-अहमधुना किंकरोऽस्मि कञ्जनिलये भवत्याः । तथाहि—
आचराणि कुसुमाभिषेचनं हस्तयोः कमलमर्पयाणि वा ।
पल्लवं श्रुतिवतंसयानि वा पाययानि मकरन्दमेव वा ।। २६ ।।

मानिनि मत्प्रीतये वसन्तोपाहृतेषु मनोहरेष्वपि पदार्थेषु तदसूययेव प्रीतिं प्रतिरुन्धन् कन्दर्पः स्वानुबन्धिष्वेव वस्तुषु निस्तुलेषु वाञ्छामुदञ्चयति ।

तथाहि —

न स्प्रष्टुं मम गुच्छमिच्छति करः किन्तु स्तनौ ते घनौ
नो माध्वीकमिदं पिपासति मुखं किन्तु त्वदीयाधरम् ।
श्रोत्रं नेच्छति कोकिलध्वनिमिह श्रोतुं त्वदुक्तिं विना
गात्रं नो परिरिप्स्यते कमलिनीं कान्तं वपुः किंतु ते ।। २७ ।।

इति फणितिमुदारामीरयन्सोपचारां
करिगिरिगृहमेधी कामतन्त्रानुरोधी ।
अरमत परवत्या हर्षवत्या युवत्या
ललितकुसुमपुञ्जे रम्यरम्ये निकुञ्जे ।। २८ ।।

ततश्च—

तत इतस्तस्मिन् कानने तामरसगेहया सञ्चरन् कुञ्जरगिरिधामा भूमौ महर्षिशापात् त्रिविष्टपाद्भ्रष्टेन कलुषक्षयाय * काकोदरवरसरस्तीरे

---

* काकोदरवरः सर्पश्रेष्ठः तस्य सरः अनन्तसरः ।

तपस्यता तापसशापविपर्यस्तमतिना बृहस्पतिना राजपुत्रव्यामोहेन व्याघ्राद्युग्रसत्त्वसञ्चरणभीषणे गहनेऽस्मिन् मास्म त्वं बालया सह विहार्षीरिति व्याहृतस्तस्य स्वस्वरूपमनुपदर्शयन्नेव गम्भीरः कुम्भिकुम्भिनीधरशिखरं वरदः प्रविवेश । अथ सुरगुरोरपि तादृशस्तापसशापः कथमभूत् ? कथं च विरिञ्चयज्ञाभ्युदितेन देवेन तस्मै स्वस्वरूपं नोपदर्शितम् ? इति भृगुणा पृष्टेन भगवता नारदेन जगदेकबन्धुना पुनरेवं जगदे ।

कदाचिदास्थानमुपेत्य पुण्याः
कथा महेन्द्रो विविधास्स शृण्वन् ।
पारंगतान् नित्यगिरां प्रसङ्गात्
पप्रच्छ धर्मान् प्रवणो मुनीन्द्रान् ॥ २९ ॥

त्रीनग्नीन्परिपूजयन्ननुदिनं भक्त्याऽतिथीन्पूजयन्
वेदार्थानवबोधयन् द्विजवरान् विष्णुं समाराधयन् ।
न्यायेनार्थमुपार्जयन् खलजनैस्सङ्गं सदा वर्जयन्
वासं कश्चन गेह एव कुरुते त्रासं वहन् दुष्कृतात् ॥ ३० ॥

विसृज्य गृहमग्निभिः विविधतीर्थयात्रापरः
तनोर्न सुखमीहते तटवतीर्बहूर्गाहते ।
स्थलेषु कृतसन्निधीर्बहुषु देवतास्सेवते
परश्चिर *मटाट्यते दृढतपा वने पावने ॥ ३१ ॥

अनयोः पुण्यधनयो ‡रनयोज्झितचित्तयोः ।
घनयोः कतरः श्रेयान् मुनयो व्याहरन्तु मे ॥ ३२ ॥

एवं देवराजेन पृष्टाः प्रतुष्टास्तपोधना बृहस्पतिमामन्त्र्य भवानेव देवतानामस्माकमभ्यर्हितस्सकलधर्मज्ञः शतक्रतुकृतं प्रश्नं प्रतिब्रवीत्विति प्रार्थयन्त ॥

---

* अटाट्यते - पुनः पुनरतिशयेन वा अटतीत्यर्थः । सूचिसूत्रीत्यादिना यङि लङन्तम् ।

‡ अनयेन - दुर्नीत्या, उज्झितचित्तयोः त्यक्तमनसोः ।

ततश्च —

प्रार्थनां मानयंस्तेषां तीर्थयात्रपरं परम् ।
देवगोष्ठ्यामुवाचोच्चै †र्धिषणो धिषणोत्तरः ॥ ३३ ॥

तदेतद्गुरुभाषितमपि शास्त्रविरुद्धमिति छ्यूकुर्वन्तस्तपोधनास्तस्मिन् धृतमन्यवः शतमन्योस्सदस्येवमवदन् ॥

साम्प्रतं संविदाढ्योऽपि मौढ्यं प्राप्तो बृहस्पतिः ।
श्रुतिस्मृत्युक्तसत्कर्मप्रारम्भं प्रतिषेधति ॥ ३४ ॥

§गुरुमतमिदमङ्गीकुर्वते चेद्बुधास्तै-
र्नियतमुपगता स्यात् कष्टमख्यातिरेव ।
भवति परमपूर्वं वाच्यमप्यभ्युपेतं
स हि न सहति कर्माण्यच्युताराधनानि ॥ ३५ ॥

---

† धिषणया - बुद्ध्या उत्तरः श्रेष्ठः, धिषणः - बृहस्पतिः । 'गीष्पति-र्धिषणो गुरुः' इत्यमरः ।

§ इदं गुरुमतं– अग्निहोत्रादिसत्कर्माणि विहाय तीर्थयात्रादिकं श्रेयः इति बृहस्पतिमतं, बुधाः– वेदशास्त्रज्ञाः, अङ्गीकुर्वते चेत् अभ्युपगच्छन्ति यदि, तदा तैः अख्यातिरेव– अज्ञानमेव नियतं - निश्चितं, उपगता अङ्गीकृता स्यात् । वेदशास्त्रज्ञानसत्वेपि तद्विहितकर्माननुष्ठाने तस्याप्रयोजकत्वेनासत्प्रायत्वात् । परं - अन्यत् अपूर्वं - पूर्वमप्राप्तं, वाच्यं - निन्दावचनविषयत्वमपि, यद्वा– अपूर्वं - अवर्णपूर्वकं वाच्यं, अवाच्यं - दूष्यं, परं - अत्यन्तं, अभ्युपेतं - अङ्गीकृतं भवति । तत्र हेतुमाह - सहीति । हि यस्मात् गुरुः, अच्युताराधनानि - भगवत्पूजारूपाणि कर्माणि अग्निहोत्रादीनि न सहति– अवश्यानुष्ठेयत्वेन नानुमन्यते । आधृषीयत्वेन विभाषितणिचः 'षह मर्षणे' इत्यस्य णिजभावे 'स एवायं नागः सहति कलभेभ्यः परिभवं' इतिवद्रूपम् ।

अत्र गुरुमताख्यातिशब्दविन्यासमहिम्ना अर्थान्तरमपि प्रतीयते । तथा हि ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २९] कलि ५०५६ मन्मथ - मीन. साधारण [सं ७

## मुकुन्दमाला ॥

——:०:——

'लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः' इति यत् कुलशेखर आह तस्य तदीयं मनः एवमप्यर्थं जग्राह– सर्वस्यापि लोकस्य व्यसनापनोदनशक्तः दासस्य अस्मादृशस्य व्यसनापनोदने किं न शक्तः— इति । ततस्तं पप्रच्छ– लोकव्यसनापनोदनाय अपेक्षितज्ञानशक्तिकारुण्यादिकल्याणगुणगणसम्पन्नः स इति कथं ज्ञायत इति । एवं स्वमनसा पृष्टो महाराजः तत् देव्या उपनिषदः सकाशं नीत्वा "एवमिदं पृच्छति । अत्रभवत्या अस्य तस्मिन्नर्थे दृढः प्रत्यय उत्पादयितव्यः । तत्त्वनिश्चयो हि लोकस्य भवत्यामायतते" इति विनीतो विज्ञापयामास । तस्मै प्रसन्ना सा भगवती 'अमृतस्यैप सेतुः' 'देवं मत्वा धीरो हर्षशोकौ जहाति' 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।' इत्यादिभिः स्वोक्तमर्थं विवृण्वती एवमाह—

भवजलधिगतानां द्वन्द्ववाताहतानां
सुतदुहितृकलत्रत्राणभारार्दितानाम् ।
विषमविषयतोये मज्जतामप्लवानां
भवति शरणमेको विष्णुपोतो नराणाम् ॥ १२ ॥

भवः अविच्छिन्नजननमरणपरम्परारूपः संसारः । स एव जलधिः । तत्र पतिताः जनाः । तत्र तेषां का अवस्था । द्वन्द्ववाताहताः ।

शीतम् उष्णम्, शुभम् अशुभम्, सुखं दुःखम्, इत्येवमादीनि यानि द्वन्द्वानि तान्येव घोरा वाताः तैः आहन्यन्ते समन्तात् ताड्यन्ते। सुताः दुहितरः कलत्रमित्येषां त्राणरूपो यो महान् भारः तेन अर्दिताः पीडिता भवन्ति। अनेन हेतुना ते मज्जन्ति मग्ना भवन्ति। कुत्र? विषम-विषयतोये। विषमाः अत्यन्तमाकर्षकतया दुर्जयाः ये विषयाः भोग्यपदार्थाः त एव तोयं जलम्। तत्र। विषमं अगाधविस्तीर्णं दुरुत्तरं यत् विषय-तोयं तत्रेति च। कथं मज्जन्त्येव। समुद्रतरणोपायो हि प्लवोऽस्ति। तं कञ्चन सम्पाद्य तत्र आरुह्य सुखं तरन्तु। सत्यं प्लवलाभे तेन तरणं शक्यम्। स तु न लभ्यते। अयं प्लव इति कञ्चन मन्यन्ते, प्रार्थयन्ते च स्वोत्तरणानुग्रहम्। सोऽपि तत्तुल्य एव भवति। सोऽपि तज्जलधिपतित एव द्वन्द्ववाताहत एव, स्वपरिग्रहत्राणभारार्दित एव, विषमविषयतोये मज्जद-वस्थ एव च भवति। 'स्वयं तरितुमक्षमः कथमसौ परान् तारयेत्'। एवमेते अप्लवाः, प्लवरहिता भवन्ति।

इत्थं महत्यां विपदि वर्तमानानां नराणां किं मज्जनमेव प्राप्तम्। किं रक्षणोपायो यः कोऽपि नास्ति। अत्राह भगवती श्रुतिः। न नास्ति। भवति शरणमेकः। कोऽसौ। विष्णुपोतः। विष्णुः परमकारुणिकः श्रियः पतिः। स एव पोतः प्लवः। संसारसागरसमुत्तरणाय स एकः प्लवो वर्तते।

समुद्रमध्यपतितानां बाहुभ्यां तीरप्राप्तिः दुःशका। अथापि अगत्या यथाशक्ति यतेमहि इति चेत् तद् विष्वञ्चैः प्रबलैर्वातैः दुष्करं भवति। अथ तरणयत्नं विहाय एकस्मिन् स्थान एव जलस्योपरि कथञ्चिद् वर्तेम-हीति चेत् शिरसि स्कन्धयोः पृष्ठे च आहितो दुस्त्यजो महान् भारः जलस्यान्तः यथा अवशाद् गन्तव्यं भवति तथा अतिमात्रं पीडयति। जलस्यान्तः गाधस्थलं यदि किञ्चन स्यात् तर्हि पादेन आमृश्य आमृश्य प्रपदं वा तत्र निधाय अवस्थानं शक्यम्। तत्रापि तु आशा नास्ति। जलस्य सर्वतः अत्यन्तमगाधत्वात्। एवमतिघोरा विपत्। तत्र भगवान् एकः शरणम्।

---

# विमर्शगोष्ठी ॥

(1)

केशवः—सुहृदः, अस्मिन् दिने किमधिकृत्य अस्माकं विमर्शः प्रवर्तताम् ।

नारायणः— विमर्शे अवश्यकर्तव्ये सति को विषयो भवत्विति चिन्तनीयम् । विमर्श एव मा भूदिति मे भाति ।

माधवः— कोऽयं विचित्रो भवत उपक्षेपः । न खलु भवतो भावमवगच्छामः ।

केशवः— अस्मद्गोष्ठीनामैव विस्मृतमिव सुहृदा नारायणेन । कथमन्यथा विमर्श एव मा भूदिति स वदेत् । यदि विमर्शो न क्रियते अस्मद्गोष्ठीप्रवर्तनस्य किं फलम् ?

नारायणः—न खलु तदहं विस्मृतवानस्मि । किन्तु इदं मे मनसि वर्तते । विमर्शस्य अकरणे अस्मद्गोष्ठीप्रवर्तनस्य किं फलमिति अत्रभवान् पृच्छति । विमर्शे कृते किं फलमिति तु मम प्रष्टव्यं भवति । वृथा वयं कण्ठशोषणं कालयापनं च कुर्मः अनेन विमर्शव्यसनेन । इदं फलमिति तावद् भवन्तो वदन्तु । कति विमर्शान् वयमियदवधि कृतवन्तः स्मः । तैः कस्य किमभूत् । तदा तदा मिलिता वयं अस्य गृहस्य अन्तरुपविश्य चर्चां कृत्वा विघटामहे । तावति सर्वं विरमति । अस्माकं वा बहिर्लोकस्य वा को नामानेन उपकारः । कोऽस्मान् पश्यति । कोऽस्माकं विमर्शेषु दृष्टिमपि करोति ।

गोविन्दः—सुहृदा केशवेन प्रथमं 'किमधिकृत्य अद्य विमर्शः कार्यः" इति प्रश्नोऽकारि । तत्र नारायणेन उत्तरं दीयते — विमर्श एवाद्य विमर्शविषयो भवत्विति । (सर्वे सहासं करघोषं कुर्वन्ति) ।

केशवः— शोभनमापतितम् । विमर्शस्य विषय इदानीं लब्धः । अस्माभिः विषयविशेषमादाय तदा तदा क्रियमाणस्य विमर्शस्य किमपि फलमस्ति न वेति सम्प्रति विमर्शनीयम् । तत्र नारायणः पूर्वपक्षिणमात्मानं प्रकटितवानेव । अन्येऽपि क्रमेण पूर्वपक्षं अन्यं वाऽवलम्ब्य भाषितुमर्हन्ति ।

विष्णुः— किं नारायणोक्तं पूर्वपक्षकोटिं प्रविशति अथवा कोट्यन्तरमिति न वयमद्य निश्चित्य वक्तुं शक्नुमः ।

माधवः— अस्मदीयो विमर्शः सर्वो विफल इत्ययमपि सिद्धान्त इह कुतो भवेदिति भवान् सम्भावयतीव ।

विष्णुः— कामं तथा । किमत्रानौचित्यम् । स्वतन्त्रा वयम् । यं कमपि निश्चयं कर्तुं प्रभवामः ।

माधवः— वैफल्यसिद्धान्ते गोष्ठ्यपि विघटनीया ।

विष्णुः— कः संशयः ? एवमेतत् । किं तेन ?

माधवः— न किमपि । संस्कृतपण्डितता पुनः प्रकाशिता स्यात् ।

विष्णुः—(ससंरम्भं) का नु भोः संस्कृतपण्डितता । न खलु भावं बुध्ये ।

माधवः— किमत्र भावस्तिरोहितः । विव्रियते, श्रूयताम्— लोकक्षेमचिन्तावैमुख्यं, स्वार्थचिन्तावैकल्यं, दैन्यावलम्बनं, अनुत्साहिता, उत्साहमानैरसङ्घातः, तेषां परिवादेन उत्साहभञ्जनं, कृतस्य विघटनोद्यमः ; इयं सर्वा संस्कृतपण्डितता ।

विष्णुः— भवानपि संस्कृतपण्डित एव । आत्मोपालम्भं सम्प्रति कृतवानसि ।

गोविन्दः— न खलु भोः परिवादप्रावण्यात् तदाह माधवः । परिश्रम्य स्थापिताया गोष्ठ्याः विघटनवार्ताश्रवणक्षुब्धहृदयस्तु तथा किमप्यभाषिष्ट ।

मधुसूदनः— इदं मे अत्यन्तं शोकाय भवति यत् अस्या गोष्ठ्याः स्थापनावसरे अस्मासु एकैकेनापि कृतां दृढां प्रतिज्ञां विस्मृत्य इदानीं विप्रतिपत्तिसङ्कटे पतिता भवामः । "अद्य स्थाप्यमानाया अस्या विमर्शगोष्ठ्याः स्थैर्याय उत्तरोत्तराभिवृद्धये च यद्यत् कर्तव्यं तत्र जागरूको भविष्यामि । तद्विपरीतं यत्, तत् कर्तुं सर्वथा न प्रवर्त्स्यामि । मनसाऽपि तन्न चिन्तयिष्यामि । त्रिः सत्यमेतत्" इति हि पृथक्पृथक् एकैकेन प्रतिज्ञातम् ।

केशवः— आम् एवमेतत् । सुहृदः, दैवादापतितं इदं वैमत्यं विस्मृत्य कर्तव्यं पश्येम । इदं मे भाति । अस्माभिः क्रियमाणानां चर्चानां फलमस्ति न वेति एवं पक्षभेदो न प्रदर्शनीयः, येन निषेधपक्षस्य सिद्धान्तत्वे, तेन गोष्ठ्या विघटनीयत्वे च शङ्काया उन्मेषस्य अवकाशो दत्तो भवति । किं फलमित्येव विमर्शनीयम् । अस्ति किमपि फलमित्येतत्तु असन्दिग्धं स्थितं कुर्मः । (करताडनेन सर्वे तत्र सम्प्रतिपत्तिं दर्शयन्ति ।)

मधुसूदनः— सुहृदः, सर्वैरत्र सन्तुष्टैर्भाव्यम्, यत् प्रसक्तस्य वैमत्यस्य शोभनमवसानं सम्पन्नम् । परन्तु अद्य कालो यातः । प्रस्तुतां चर्चां अनन्तरे सम्मेलने करवाम । (तथेति सर्वे उत्थिताः)

---

# श्येनकपोतोपाख्यानम् ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

—o—

[अनुशासनपर्वान्तर्भूतदानधर्मपर्वान्तर्गतमिदं कथ्यते ।]

युधिष्ठिर उवाच— 'महाप्राज्ञ, सर्वशास्त्रविशारद, भरतसत्तम, पितामह, त्वत्तोहं कञ्चिद्धर्मं श्रोतुमिच्छामि, देवतिर्यङ्मनुष्यस्थावरात्मना चतुर्विधे भूतग्रामे यत्किमपि भूतं शरणागतं ये रक्षन्ति तेषां तत्त्वतः किं फलं भवति' इति ।

भीष्म एवमुवाच— "महायशः, महाप्राज्ञ, धर्मपुत्र, शरणागतरक्षणस्य महत्फलमधिकृत्य कञ्चनेतिहासं वक्ष्यामि, शृणु— प्रियदर्शनः कश्चित्कपोतः श्येनेनाकाशात् प्रपात्यमानस्सन् महाभागं नरेन्द्रं वृषदर्भं (शिविचक्रवर्तिनं) शरणं जगाम । विशुद्धात्मा स वृषदर्भस्त्रासात् स्वाङ्कमुपागतं तं दृष्ट्वाऽऽश्वास्य 'हे अण्डज, ते भयन्नास्ति । आश्वसिहि । कस्मात्ते सुमहत्साध्वसम् ? त्वया किं वा कृतम् ? त्वमिह भ्रान्तचेतनो विसंज्ञश्चायातः । नवनीलोत्पलवर्णसमानवर्णालङ्कृतमस्तक, चारुवर्ण, सुदर्शन, दाडिमाशोकपुष्पाक्ष, मा त्रस । तवाभयं दत्तम् । मत्सकाशमनुप्राप्तस्य मया बहुमतस्य तव ग्रहणं कोऽपि चिन्तयितुमपि न प्रभवेत् । त्वदर्थं काशीराज्यं मम जीवितं चाद्यैव जह्याम् । हे कपोत, तव भीतिर्मास्तु । विस्रब्धा भव' इत्याचष्ट । श्येनः, 'राजन्, एष कपोतो दैवेन मे भक्ष्यः परिकल्पितः । गतप्रायजीवितं प्रयत्नेन ग्रहणेन मया लब्धमेनं त्वं त्रातुं नार्हसि । अस्य मांसमज्जामेदोरुधिराणि मम हितानि । एष मम परितोषकरः । अस्याग्रतो न वर्तस्व । अत्युग्रा पिपासा मां बाधते । क्षुधा मां निर्दहतीव । क्षुधं मन्दयितुं न हि शक्ष्यामि । एनं मुञ्च । एष मयाऽनुसृतो मत्पक्षनखविक्षतश्चास्ति । किञ्चिदुच्छ्वासनिश्वासमेन गोप्तुं नार्हसि । स्वदेशे नृणां रक्षणे त्वं प्रभुस्स्याः । तृषार्तस्य खेचरस्य पक्षिणस्त्वं न प्रभुः । वैरिषु भृत्येषु स्वजनेषु स्वदेशव्यवहारे इन्द्रियाणां शब्दादिविषयेषु च पराक्रमसे यदि तद्युक्तम् । आकाशचारिषु पराक्रमप्रदर्शनं नोचितम् । त्वदाज्ञातिलङ्घिषु शत्रुषु पराक्रमप्रकाशने प्रभुत्वं सम्यग्भवेत् । एतत्कपोतविषये धर्मं चिकीर्षसि चेन्मामपि द्रष्टुमर्हसि' इत्यब्रवीत् ।

श्येनस्य तद्वाक्यं निशम्य विस्मयान्वितो राजर्षिरेनं तद्वाक्यं चाभिनन्द्य कपोतार्थी सन् 'हे द्विज, ते क्षुधाप्रशमनाय वृषो, वराहो, मृगो, महिषो वा सम्प्रति भुज्यताम्। शरणागतं न त्यजेयम्। एतन्मम दृढं व्रतम्। द्विजोऽयं ममाङ्गानि न मुञ्चति। पश्य' इत्यभणत्। श्येनः, 'महाराज, वराहमुक्षाणमन्यान् विविधान् पतत्रिणश्च न भक्षयामि। तादृशजन्तुभक्षणेन मम किं प्रयोजनम्। मे देवश्चिराद्विहितो भक्ष्य एतज्जातीय एव। श्येनाः कपोतान् खादन्ति। एषा स्थितिस्सनातनी। अनघ, औशीनर, कपोते तव स्नेहो यदि कपोतसमतया तुलया धृतं स्वमांसमद्य मे प्रयच्छ' इत्यवदत्। स राजसत्तमः 'यदिह त्वमेवं मामात्थ अयं मम महानुग्रह इदानीं जातः। बाढमेव करिष्यामि' इत्युदित्वा स्वमांसान्युत्कृत्योत्कृत्य तुलया समतोलयत्। तनोरत्नविभूषितास्तस्यान्तःपुरस्त्रिय एतदाकर्ण्य परमदुःखिता हाहाकारं कुर्वाणा निरक्रामन्। तासां मन्त्रिभृत्यजनस्य च रुदितेन मेघगर्जितगम्भीरस्सुमहान्नाद उदपद्यत। व्यभ्रं गगनं सर्वं तस्य सत्येन कर्मणा धाराधरैराच्छाद्यत। भूमिः प्राचलच्च। स राजा पार्श्वयोर्बाह्वोरूर्वोश्च मांसानि सञ्छिद्य शीघ्रं तुलामपूरयत। तथाऽपि तुलायां धृतो मांसराशिस्तुलान्तरस्थकपोतगुरुत्वसमगौरवन्नाविन्दत। स राजा यदा निर्मांसस्स्रवद्रुधिरोऽस्थिभूतश्च संवृत्तस्तदा स्वशरीरमुत्सृज्य स्वमांसोपेतां तुलामारोहत्।

तदानीं लोकत्रयवासिन इन्द्रं पुरस्कृत्य तन्नरेन्द्रमुपातिष्ठन्त। देवा भेरीरवादयन्। वृषदर्भममृतेनासिञ्चन्। तस्योपरि दिव्यानि सुखकराणि माल्यानि पुनः पुनरभ्यवर्षंश्च। तस्मिन्प्रभौ चतुर्मुख इव देवा गन्धर्वा अप्सरसश्च समन्तादनृत्यन् अगायश्च। स राजर्षिस्तेन पुण्यकर्मणा हेमप्रासादसम्पूर्णं मणिकाञ्चनतोरणैर्वैडूर्यमणिस्तम्भैश्च शोभमानं विमानं समधिष्ठाय शाश्वतं स्वर्गमियाय। युधिष्ठिर, त्वं शरणागतेष्वित्थं सर्वं कलय। भक्तानां स्निग्धानामाश्रितानां च रक्षिता सर्वभूतेषु दयावांश्च पुरुषः परलोके सुखमेधते। यो राजा शिष्टाचारमनुतिष्ठति स सुतरामकपटेन स्वकर्मणा किं न प्राप्नुयात्। परिशुद्धमना धीरस्सत्यपराक्रमः काशीदेशेश्वरस्स राजर्षिः स्वकर्मणा त्रिषु लोकेषु ख्यातिमभजत्। शरणागतं पालयन्नन्योऽपि तमेव स्वर्गमासादयेत्। लोके वृषदर्भस्येदं वृत्तं नित्यं कीर्तयन् शृण्वंश्च पुरुषः पूतात्मा भवेत्।"

# वृद्धभाषितम् ॥ (18)

—:o:—

रामकृष्णौ—बालाः यद्यपि तिक्तमधुरविवेकिनः, तथाऽपि प्रियहितविवेकिनो न भवन्ति । एरण्डतैलस्य तिक्ततया यद्यपि तत्पानं न प्रियं भवति तथाऽपि तत् आरोग्यहेतुतया परमं हित भवति । इदं तदानीन्तनप्रीतिमात्रप्रवणा बाला न ज्ञातुमीशते । बालत्वात् । अतो बलात्कारेणापि ते वृद्धैः हितं कारयितव्याः ।

आचार्यः— तुल्यं तत् प्रकृतेऽपि शास्त्रविहिता व्यवस्था यद्यपि स्वरसतो रुचये न भवति तथाऽपि सा सर्वेषां परमहिता । औषधस्य तिक्ततेव हितकामैः तस्या अरोचमानता सह्या । अध्ययनादिकं केषाञ्चित् नियमेन कर्तव्यतया विधीयते, न कर्षणादिकम् । कर्षणादि केषाञ्चित् विधीयते, न अध्ययनादि । तत्र यदि क्लेशावहमिति वा कारणान्तरेण वा स्वकर्म उपेक्ष्यते सुखमिति वा कारणान्तरेण वा परकर्म चिकीर्ष्यते तर्हि औषधद्वेषिणः शर्करैककाङ्क्षिणश्च बाला इव प्रौढा अपि अविवेकिन एव । बलादपि ते शास्त्रकृतव्यवस्थानुसारिणः कार्याः ।

रामकृष्णौ एरण्डतैलन्यायः सर्वबालसाधारणः । प्रकृते तु जातिभेदमाश्रित्य कैश्चिदेव अध्ययनादिकार्यं, नेतरैरिति नियमः क्रियते । इदं वैषम्यं कथमिति दुःसमाधानः प्रश्नस्तिष्ठति ।

आचार्यः—वृक्षाः सन्ति । तत्र कियन्तो जातिभेदाः । निम्बः आम्रः तिन्त्रिणी, पनस इति । मृगाः सन्ति । तत्र कियन्तो जातिभेदाः । अश्वो गौः, श्वा मार्जारः, हरिणः सिंहः, गजः उष्ट्र इति । व्यवस्थिता एव एषां गुणाः । मनुष्येष्वपि पुमांसः स्त्रियश्च जन्मनैव भिन्नरूपा भवन्ति । तत्र पुंसां गर्भाधानं स्त्रीणां तद्ग्रहणमिति व्यवस्थितमेव कर्म । एवं द्विजा अद्विजा इति जातिभेदे तदनुसारिणि कर्मभेदे च सति किं नामानुपपन्नम् ? किं नाम वैषम्यम् ?

रामकृष्णौ — वृक्षादिषु सर्वत्र जातिभेदः प्रत्यक्षसिद्धः । न केनचित् तत्र विप्रतिपत्तुं शक्यम् । मनुष्येषु तु तथा नास्ति । अतो महती, प्रायः सार्वत्रिकी विप्रतिपत्तिः ।

आचार्यः—मनुष्येष्वपि नीग्रो इति, चीना इति, यूरोपीया इति जातिभेदः प्रत्यक्षसिद्ध एव ।

रामकृष्णौ—स भेदस्तावदास्ताम्। द्विजाद्विजभेदो न प्रत्यक्षं गृह्यते।

आचार्यः—कुतो न गृह्यते? दर्शनमात्रेण हि 'अयं द्विजः' इति 'अयं अद्विजः' इति च विविच्य गृह्णन्तो जनाः तदनुगुणां वृत्तिं तस्मिन् तस्मिन् अवलम्बन्ते।

कृष्णः— क्वचित् सन्देहोऽपि भवति 'द्विजो वा अद्विजो वा अयमिति।

आचार्यः— कामं भवति। ततः किम्? रत्नानां तत्त्वनिर्धारणं सहसा न भवति। चिरपरीक्षणमावश्यकं भवति। तावता किं रत्नत्व-जातिर्वा तदवान्तरजातयो वा न सन्तीति भवेत्? ओषधीष्वपि सन्देहो भवति केयमिति। अवधानेन पुनः पुनरवलोक्य इदन्ता निर्श्चीयते।

कृष्णः— नियतैराचारविशेषैः चिरमनुष्ठीयमानैः आकारे कश्चन विशेषो भवति। तावता जातिभेद इति कथमेतत्?

आचार्यः— आचारैः चिरपरिपालितैः आकारे कश्चन विशेषो भवतीति एतावन्मात्रं न। अन्तः रक्तेऽपि, मनस्यपि, महान् विशेषो भवतीति ज्ञातव्यम्। आहारभेदे शरीरस्थितिभेदो भवति। तद्भेदे मनोवृत्ति-भेदो भवति। एवमेव शौचस्नानपानवृत्त्यादिभेदैः जनानां परस्परं महान् भेदः।

प्राणिनां सर्वेषां शरीरं, तत्र रक्तमांसादि, आहाराद्यपेक्षा, जरा-मरणमिति सर्वं समानम्। अथापि मृगा इति, तत्र अश्वो गौः श्वा वराहः गजः सिंहो व्याघ्र इति अवान्तरभेदाः परस्सहस्राः सन्ति इत्युक्तम्। एषु एकैकस्यामपि जातौ अवान्तरजातयो बह्व्यः सन्ति। बहुभिरंशैः सर्वेषामेषां साम्यमप्यस्ति। एवमेव बहुभिरंशैः भेदोऽप्यस्ति। तथा मनुष्येष्वपि। द्विपादशरीरवत्त्वेन, ऊर्ध्वत्वेन, भाषणसामर्थ्ये-नेत्येवमादिभिः प्रकारैः सर्वे मनुष्याः समाना एव। अथापि तत्तन्माता पितृशरीरोत्पन्नत्वेन बहुधा भेदा अपि सन्ति। कृष्णाः गौराः, दीर्घा ह्रस्वाः, स्थूलाः कृशाः, समग्रशरीराः अङ्गविकलाः, बुद्धिमन्तो जडाः, इति हि जन्मसिद्धविशेषा अत्यन्तभिन्ना नरा भवन्ति। तत्र जाति-भेदोऽपि भवति चेत् किमनुपपन्नम्। को द्वेषः।

कृष्णः— न खलु श्चन द्वेषः। किन्तु जातिभेदप्रयुक्ताः कलहा बहव उत्पद्यन्ते। तेषां परिहारमिच्छन्तः 'वस्तुतो जातिभेदो नास्ति,' किमिति

कलहायध्वे' इति बोधयन्ति। तस्मिन् विषये तत्त्वजिज्ञासा सम्प्रति अस्माकं वर्तते।

आचार्यः— तत् कामं युज्यते। सर्वे कलहाः अत्यन्तं परिहर्तव्याः। अवश्यं परिहर्तव्याः। न तत्र कस्यचित् वैमत्यं भवितुमर्हति। परं तु तत्र क उपाय इति बुद्धिमद्भिर्विमृश्य निर्धारणीयम्। भाषाभेदेन प्रदेशभेदेन शरीरवर्णभेदेन च भूयिष्ठा घोराश्च कलहा भवन्तीति दिने दिने प्रत्यक्षं पश्यामः। तत्परिहाराय किं नाम भाषाभेदस्य प्रदेशभेदस्य शरीरवर्णभेदस्य च विध्वंसने प्रयतितव्यम्। न हि शिरःशूलस्य शिरश्छेदश्चिकित्सा। एवमेव जातिभेदनिमित्ताः क्षोभा भवन्तीति न जातिविनाशे यतितव्यम्। अपि तु तत्त्वबोधनेन विवेक उत्पादयितव्यः। मनः प्रसादः सम्पादयितव्यः।

कृष्णः— दीर्घकालानुष्ठितैः नियतैराचारैः तेजोविशेषः कश्चन जायत इति तत्त्वमिदम्। स एव तेजोविशेषो जातिरिति वक्तव्यम्। तथा च कर्मणा जातिर्भवतीति सिद्ध्यति।

आचार्यः— सौम्य, जातिरिति पदेन किमुच्यत इति पर्यालोचय। जननवाचिनः 'जनी प्रादुर्भावे' इत्यस्माद्धातोः निष्पन्नोऽयं जातिशब्दः। तदयं जन्मना सिद्धो योऽर्थः तमाह, न तु कर्मणा जन्मनः पश्चात् उत्पादितं कञ्चिदर्थम्।

कृष्णः— अद्य अद्विजः कश्चित् गर्भाधानादिसंस्कारैः संस्कृतः उपनीतः वेदमधीत्य तदुपदिष्टानि कर्माणि करोतु। तस्माज्जातः तत्पुत्रः किं न द्विजो भवेत्?

आचार्यः— कथं भवेत्? अद्विजः द्विजोचितसंस्कारानधिकारी तैः संस्कृतः पापभागशुद्धो भवति। तत्पुत्रस्य द्विजत्वे का प्रसक्तिरपि।

कृष्णः— तर्हि अद्यतना द्विजाः कथं द्विजा अभवन्?

आचार्यः— उक्तमेतत् द्विजमातापितृभ्यां जाता द्विजा भवन्तीति। पूर्वपूर्वमातापितृगता जातिः उत्तरोत्तरसन्ततौ सङ्क्रामति।

कृष्णः— सर्वप्रथमं कथम्?

आचार्यः—सृष्टिकाले सर्वशक्तः सत्यसङ्कल्पः सर्वेश्वरः सकलं जगत् सृजन् देवान् पशून् मनुष्यान् वृक्षांश्च व्यवस्थिततत्तज्जातिधर्मविशिष्टान् ससर्ज। ततःप्रभृति तेनैव प्रकारेण सर्वं व्यवस्थितमनुवर्तते।

# प्रकृतिभेदः॥

I

—आर्य, अत्र आगतस्य ते द्वित्राण्यपि दिनानि नाभूवन्। कस्मात् त्वरसे स्वपुरं गन्तुम्। यदा कदाचिदागच्छसि। पञ्चषाणि वा दिनानि स्थित्वा गच्छ। न हि ते इह असौकर्यं किञ्चिदस्ति।

—न सौम्य, न किञ्चिदसौकर्यमस्ति। युष्माभिः क्रियमाणेन प्रेमभरितेन उपचारविशेषेण सुखमत्र वसामि। परन्तु अस्मन्नगरे भगवतो देवाधिराजस्य उत्सवः श्व आरभ्यते। तत्र महान्तो भागवता आगमिष्यन्ति। केचित् अस्मद्गृहमानीय आराधनीयाः। न हि कालान्तरे तेषां सेवा शुश्रूषा वा सुलभा।

II

—अद्य भवन्नगरे भगवतो महोत्सव इति श्रूयते। सर्वे जनाः स्वस्वग्रामं विहाय तत्र गच्छन्ति। कथं मातुल त्वं परं ततः प्रस्थाय इह आगतोऽसि। कच्चित् कानिचिद् दिनान्यत्र स्थास्यसि ?

—आं सौम्य, उत्सवस्तत्र भवति। कारणेनैव तु अद्य ततः प्रस्थाय इह आगमम्। उपदशानि दिनानि अत्र वत्स्यामि।

—उत्सवावसानपर्यन्तमिति ब्रूहि।

—आम्, तथा। तदवधि इह स्थित्वा ततः परमेव तत्र गमिष्यामि।

—किं कारणम्।

—किं कारणम्। देवोत्सव एव कारणम्। तद्व्याजेन खलु यत्र-क्वापि स्थिताः सर्वे तत्र आगत्य अस्मान् पीडयन्ति 'इदं देहि, तद् देहि। स्थलान्तरं नास्ति। इहैव वस्तव्यम्।' इति यत् किमपि वदन्तो याचन्तश्च। तमुपद्रवं सोढुमशक्नुवन् सुखं क्वापि स कालो यापनीय इत्यागतोऽस्मि।

—अथ क्व मातुलानी।

—तां पितृगृहं प्रेष्य कवाटं पिधाय आगतोऽसि। कस्तां बाधां सहेत।

---

# श्रीवेङ्कटाध्वरी॥

अस्य शास्त्रज्ञस्य कवेः जननसंस्थितिकालनिर्देशः अतीतकन्यासञ्चिकायामक्रियत। तत्र अशुद्धिः काचिदापतिता दृश्यते। चरमे द्वे पङ्क्ती शोधिते एवं पठनीये—

"इतः, आङ्गलगणनया १६९७ तमे ईश्वरवत्सरे जातः ८८ वर्षाणि जीवित्वा १७८५ तमे विश्वावसुवत्सरे कविः स कीर्तिशेषो बभूवेति ज्ञायते।"

इति। अनेन कविना कृताः केचन श्लोकाः काञ्चीसन्निहित "वन्दवाशि" पुरस्थपर्वतशिलासु लिखिताः सन्तीति, तत्रत्यौ

आरामं धवलगिरेरधित्यकाया-
मध्वन्यश्रमहरमण्टपाभिरामम्।
मार्ताण्डान्वयतिलकोऽथ मातृभक्त्या
कोन्नूहोजिक्षितिपतिरातनोन्मनोज्ञम्॥

आत्रेयगोत्रजनुषा विदुषां वरेण
श्रीवेङ्कटेशमखिना रघुनाथसूरेः।
पुत्रेण शेषगिरिनाथपदाब्जभाजा
श्लोका इमे विरचिताः सुचिरं जयन्तु॥

इतीमौ द्वौ श्लोकाविति च त एव इळङ्गाडु अरशाणिपालै श्रीनिगमान्ताचार्यस्वामिनः अवोचन्।

---

# पुस्तकपरामर्शः ॥

—:o:—

श्रीरामकथामृतम्। श्री आर् नरसिंहभट्टाचार्यविरचितम्।

आलयेषु भगवदर्चनपवित्रवृत्तयः सन्ति वैखानसकुलतिलका बहवो महान्तः। तेषु गाढसंस्कृतव्युत्पत्तिसम्पन्नाः शास्त्रज्ञाः कवयश्चानेके। तेष्वन्यतमोऽयं श्रीनरसिंहभट्टाचार्यः पञ्चविंशच्छतेन उपजातिश्लोकैः भगवतो रामस्य चरितं सञ्जग्राह। स सङ्ग्रहो न मुद्रितः। अस्यां पत्रिकायां मुद्रणाय तु अस्मत्सकाशं प्रेषितः। तस्य कृत्स्नस्य मुद्रणे सौकर्यविरहात् तत्रत्यान् कतिपयान् श्लोकानिह प्रकाशयामः, येन कर्तुः कवनपाठवं सहृदयैः गृहीतं भवेत्।

1 प्रणम्य रामं वचसामगम्यं कारुण्यमूर्तिं कलिकल्मषघ्नम्।
कथामृतं तस्य वदामि हर्षात् शृण्वन्तु सन्तो विगताभ्यसूयाः॥

2 बहूनि काव्यानि मनोहराणि रामस्य वृत्तं प्रतिपादयन्ति।
तथाऽप्यहं वच्मि तदेव भूयो निवार्य लज्जामपि दुर्निवाराम्।

9 आसीदयोध्यानगरी मनोज्ञा राज्ञां रघूणां मनुवंशभाजाम्।
तामावसत् पङ्क्तिरथो महात्मा महागुणैर्मन्त्रिवरैः समेतः॥

33 सीता सती नाथमनुव्रजन्ती साध्वीचरित्रं प्रथयाञ्चकार।
सौमित्रिरप्यस्य गुणैर्विकृष्टस्तेनैव वासं चकमे वनेऽपि॥

46 माता प्रजानां हितकारिणीति निगद्यते त्वं विपरीतवृत्तिः।
कथं नु ते राजकुले प्रसूतिर्मत्पापभूयिष्ठतयाऽजनीति॥

47 निन्दन्निजां मातरमात्तरोषो द्रष्टुं ययौ कोसलराजपुत्रीम्।
नत्वा च तां मातरमग्रजस्य निनाय शोकं शपथैरुदारैः॥

110 पयोधिमध्ये भगवान् कृपालुर्बबन्ध सेतुं परमं पवित्रम्।
आलोकमात्रादनघस्य यस्य पापानि सर्वाणि लयं प्रयान्ति॥

132 भद्रासने तं विधिवत् ससीतं संस्थाप्य रामं प्रयतो वसिष्ठः।
चतुःसमुद्राहृतपुण्यतीर्थैः समभ्यषिञ्चन्मुनिभिः समेतः॥

---

SANSKRIT VIDYAPEETHA TIRUPATI

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मानि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५७ दुर्मुख - मेष [सं ८

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY
APRIL 1956

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।
२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।
३ ग्राहकैर्बुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।
४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखा ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः — श्रीगीतार्थदीपः। १६१—१६८

आत्मन्येव सर्वाकारकल्पनानुवादोऽयम् । विजितात्मनाम्-विजितमनसाम्, अनेन दोषप्रदर्शनेनान्तःकरणावर्जनपरस्य *'ये हि' इति श्लोकस्यार्थः सूचितः । ब्रह्मनिर्वाणमभितो वर्तते— एवं भूतानां हस्तस्थं आत्मानुभवसुखम् । 'अभितो ... ... वर्तते' इति अत्यन्तासन्नकालत्वं विवक्षितम् ।

*காமக்ரோதங்களை அடக்கி ஆத்மாவே ஸர்வஸுகமென்கிற முயற்சியினால் மனதை ஆத்மாவிடத்திலேயே வைக்கின்றவர்களுக்கு ஆத்மாநுபவஸுகம் கையிற்கனி போன்றது.* 26

२३० स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ २७ ॥

२३१ यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यस्सदा मुक्त एव सः ॥ २८ ॥

उक्तं कर्मयोगं स्वलक्ष्यभूतयोगशिरस्कमुपसंहरति— स्पृश्यन्त इति स्पर्शाः शब्दाद्याः, तान् बहिष्कृत्य चक्षुषी भ्रुवोर्मध्ये— नासाग्रे, कृत्वा नासाभ्यन्तरचारिणौ प्राणापानौ समौ कुर्यात् । एक एव हि वायुर्नासापुटेन निष्क्रामन् प्रविशंश्च प्राणोऽपान इति चोच्यते । न दीर्घमुच्छ्वसन्नापि निश्श्वसन् उच्छ्वास निश्श्वासौ समगती कुर्यादिति यावत् । यतेन्द्रियमनोबुद्धिः— यतशब्दः साक्षात्काराव्यवहितपूर्वावस्थापरः । आत्मावलोकनादन्यत्र प्रवृत्तयर्हेन्द्रियमनोबुद्धिः, 'स्पर्शान् कृत्वा बहिर्बाह्यान्' इत्यत्र बाह्येन्द्रियप्रवृत्तिनिवारणम् ; 'यतेन्द्रिये'त्यत्र तु तत्फलभूता प्रवृत्त्यनर्हतोच्यते, अतो न पुनरुक्तिः । विगतेच्छाभयक्रोधः मोक्षपरायणः - मोक्षैकप्रयोजनः मुनिः - योगावस्थायां आत्मावलोकनशीलः, य एवंभूतः, सः सदा मुक्त एव— साध्यदशायामिव साधनदशायामपि मुक्तप्रायः ।

*சப்தாதி விஷயங்களில் பாஹ்யேந்த்ரியங்கள் செல்லாமல் அடக்கியும் யோகாஸநத்திலே அமர்ந்து நாஸாக்ரத்தையே பார்த்துக்கொண்டும் அதிக ச்வாஸமிராமல் ஸமகதியாக்கியும ஆத்மஸாக்ஷாத்காரத்தைத் தவிர்த்து மற்றதில் இந்த்ரியம் மனம்*

* गी— ५-२२

புத்தி இவற்றை ப்ரவ்ருத்தி யோக்யமல்லாமற்செய்தும் சிற்றின்பங்களில் ஆசைமுதலியது இல்லாமலும் மோக்ஷத்தையே விரும்பியும் யோகதசையில் ஆத்மஸாக்ஷாத்காரமொன்றையே யாவனொருவன் செய்து வருகின்றானோ, அவன் யோகாப்யாஸதசையிலேயே முக்தனுக்கு ஸமானன். 27—28

२३२ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

इति
श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम
पञ्चमोऽध्यायः ।

---

अध्यायारम्भे अर्जुनेन 'सन्न्यासं कर्मणां कृष्ण' इत्यादिना कर्मज्ञानयोगयोर्वैषम्यं पृष्ठम्। ज्ञानयोगस्य दुष्करत्वादिकं कर्मयोगस्य सौकर्यं शैघ्र्यञ्चोक्तं भगवता । स कर्मयोग एवोपरि विशदीकृतः । अथात्रोपसंहारेऽपि प्राक्प्रश्नोत्तरतया प्रक्रान्तं सौकर्यादिकमेव प्रकारान्तरेण स्थिरीक्रियते— देवार्चनतपस्तीर्थयज्ञदानादिश्चतुर्थाध्यायोक्तः कर्मयोगः । सः नित्यनैमित्तिककर्मेतिकर्तव्यताकः । सर्वकर्मयोगनिष्ठानां ज्ञानयोगनिष्ठानां भक्तियोगनिष्ठानां चावर्जनीयस्साधारणांशो नित्यनैमित्तिकधर्मः । कर्मयोगस्य फलं ज्ञानयोगः, आत्मावलोकनं वा । अयं सुशकः अनिर्वेदेन प्रवृत्तिविषयः कर्मयोगः । यतः अहमेव यज्ञतपःप्रभृतीनां कर्मयोगभेदानां भोक्ता— आराध्यः, मदाराधनरूपः कर्मयोगः । सर्वेषां लोकानां महानीश्वरोऽहमेव सर्वभूतानां सुहृदहमेव । एवंभूतं महोदारसार्वभौमं सर्वकर्मसमाराध्यं सर्वभूतप्रियसखं च मां ज्ञात्वा शान्तिमृच्छति - कर्मयोगकरण एव सुखमृच्छति, मनःक्लेशशान्त्यादिरूपं सुखमत्र शान्तिशब्देन विवक्षितम् । सुहृद आराधनाय हि सर्वे प्रयतन्ते ।

கர்மயோகத்தை அநுஷ்டானம் செய்வது ஸுகம். ஏனெனில் மஹோதாரனானனே கர்மயோகங்களுக்கு ஆராத்யனாயிருப்பவன். ஆராத்யர்களான ப்ரஹ்மருத்ராதிகளுக்கும் மேலானவியந்தானனே. ஸர்வருக்கும் ப்ரியனான ஸகாவானவன் நானே. பாமரர் உள்பட தங்கள் ஸௌஹ்ருத்தக்களை ஆராதிப்பதில் ஈடுபடுகிறார்களன்றோ! ஆகவே இப்பெருமை வாய்ந்த என்னை உள்ளபடி அறிந்து கர்மயோகம் செய்வதிலேயே மநச்சாந்தியாகிய ஸுகத்தை அடைகிறான். 29

इति श्रीगीतार्थदीपे पञ्चमोऽध्यायः।

---

## अथ षष्ठोऽध्यायः।

श्री भगवानुवाच—

२३२ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥ १ ॥

कर्मयोग उक्तः, तत्साध्यस्समाधिलक्षणो योग एवात्र षष्ठाध्याये सानुबन्धः प्रतिपाद्यते—

'योगाभ्यासविधिर्योगी चतुर्धा योगसाधनम्।
योगसिद्धिस्स्वयोगस्य पारम्यं षष्ठ उच्यते ॥

इति गीतार्थसंग्रहश्लोके प्रथमं योगाभ्यासविधेरुपादानात् स एवाध्यायप्रधानार्थः, अन्ये च चत्वारोऽर्थास्संगृहीता योगाभ्यासविधेः प्रधानार्थस्यानुबन्धाः। आदौ नवभिश्श्लोकैः कर्मयोगस्य निरपेक्षसाधनत्वं द्रढयितुं ज्ञानाकारः कर्मयोगो योगशिरस्कोऽनूद्यते। कर्मफलं - स्वर्गादिकं, अनाश्रितः, कार्यशब्दः प्रयोजनपरः। सुहृत्तमपरमपुरुषाराधनरूपतया स्वयं प्रयोजनभूतं कर्म यः करोति, स सन्न्यासी च - ज्ञानयोगनिष्ठश्च; योगी च - कर्मयोगनिष्ठश्च, पृथक्साधनभूतोभयसाध्यं फलमनेन लब्धमिति उभयनिष्ठत्वमुपचर्यते।

कर्मयोगस्य निरपेक्षसाधनत्वमिह विवक्षितम् । अग्निशब्दोऽत्राग्निसम्बन्धि-कर्मलक्षकः, अक्रियशब्दश्च क्रियानिवृत्तिमुखेन क्रियाव्यतिरिक्तनिष्ठत्व-लक्षकः । न निरग्निः - न चोदितयज्ञादिकर्मस्वप्रवृत्तः, न चाक्रियः - न च केवलज्ञाननिष्ठः. निर्गताः अग्नयः यस्मात्सः निरग्निः, निरग्नेः प्रत्यवाय एव फलम्, केवलज्ञानयोगनिष्ठस्य तु आत्मावलोकनमेव फलम्, कर्मयोग-निष्ठस्य तु ज्ञानयोगः तत्साध्यमात्मावलोकनं चेत्युभयमप्यस्ति ।

ஸ்வர்க்கம் முதலிய கர்மபலத்தை விரும்பாமல் ஸ்வயம் ப்ரயோஜனமாக கர்மாவை அநுஷ்டிப்பவன் ஜ்ஞாநயோக நிஷ்டனுமாகிறான். கர்மயோகநிஷ்டனுமாகிறான். ஆத்மஸா க்ஷாத்காரத்திற்கு ஜ்ஞாநயோகம்போல் கர்மயோகமும் ஸாதனமாகின்றமையால் கர்மயோகநிஷ்டனொருவனே இருவரு மாகிறான் என்றவாறு. அன்றிக்கே தனக்கு அடைத்த யஜ்ஞாதி கர்மாக்களை விட்டவனும், கேவலஜ்ஞானயோகநிஷ்டனும் அவ்வாருகமாட்டான். ஜ்ஞான யோகநிஷ்டனுக்கு ஆத்மஸா க்ஷாத்காரமொன்றே பலம், கர்மத்யாகம் செய்தவனுக்கு ப்ரத்யவாயமே பலம். கர்மயோகநிஷ்டனுக்கோ ஜ்ஞாநயோகம், அதின்பலனை ஆத்மஸாக்ஷாத்காரம் இவ்விரண்டும் ஸித்திக் கின்றது.

२३४ यं संन्यास इति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसन्न्यस्तसङ्कल्पो योगी भवति कश्चन ॥ २ ॥

हे पाण्डव ! उक्तलक्षणकर्मयोगे ज्ञानमप्यस्ति – प्रकरणात् ज्ञान-योगवाची सन्न्यासशब्दोऽत्र तदंश आत्मयाथात्म्यज्ञाने प्रयुज्यते । यं आत्मयाथात्म्यज्ञानरूपसन्न्यास इति प्राहुः तं कर्मयोगमेव विद्धि - कर्मयो-गान्तर्गतमेव विद्धि । उत्तरार्धेन तदुपपादयति । एकीकृत्य कल्पोऽत्र सङ्कल्पः । स चात्र देहात्मगोचरः । उक्तसङ्कल्पः सन्न्यस्तः— परित्यक्तो येन स सन्न्यस्तसङ्कल्पः, अनेवंभूतः असन्न्यस्तसङ्कल्पः, कर्मयोगनिष्ठेषु यः कोपि आत्मयाथात्म्यानुसन्धानरहितः न हि कर्मयोगी भवति * 'यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः' इति ह्युक्तम् ।

* गी– ४-२९

அர்ஜுனா! முன் கூறிய கர்மயோகத்திலே ஜ்ஞானமும் அடங்கியது என்று எண்ணுவாயாக. ஆத்மதத்வஜ்ஞானமில்லாமல் தேஹாத்மப்ரமம் உடையவன் எவனும் கர்மயோகநிஷ்டனாகமாட்டான். ஆகவே ஞானிக்கே கர்மயோகம். 2

२३५ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

कर्मयोग एवाप्रमादेनात्मावलोकनं साधयति—मुनेः-आत्मावलोकननिष्ठस्य, योगं आरुरुक्षोः - आत्मावलोकनं प्राप्तुमिच्छोः, कर्म - कर्मयोगः, कारणं - साधनं, उच्यते। उक्तकर्मप्रतियोगिकः शमोऽत्र कर्मनिवृत्तिः, योगारूढस्य तस्यैव - प्रतिष्ठितयोगस्यैव, शमः कर्मनिवृत्तिः, कारणमुच्यते। प्रतिष्ठितयोगस्य किं कारणापेक्षया, न ह्यन्यदस्य कार्यमस्तीति चेत्, 'योगारूढस्य' इत्यादिना कर्मनिवृत्तिविधानं ततः पूर्वमनिवृत्त्यभिप्रायम्। यावदात्मावलोकनं कर्म कार्यमिति यावत्।

ஆத்மஸாக்ஷாத்காரம் பெறவிரும்புமவனுக்கு கர்மயோகமே அதற்குக் காரணமெனப்படும். ஆத்மஸாக்ஷாத்காரம் பெற்றவனுக்கே கர்மாநுஷ்டானம் விலகும். அதைப்பெறுமளவும் கர்மாநுஷ்டானம் செய்தல் வேண்டும். 3

२३६ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

यदाऽयं स्वात्मैकानुभवस्वभावतया प्राकृतेन्द्रियार्थेषु तदुपायभूतेषु कर्मसु च नानुषज्जते— न सङ्गमर्हति, सङ्गस्स्वयमेव न जायत इति यावत्। तदा हि सर्वसङ्कल्पसंन्यासी— सर्वान् सङ्कल्पान् इहामुत्रार्थकामहेतून् सन्न्यसितुं शीलमस्येति स सर्वसङ्कल्पसन्न्यासी योगारूढ उच्यते, न तु सङ्गकाले। तस्मादारुरुक्षोर्विषयानुभवार्हतया तदननुषङ्गाभ्यासरूपः कर्मयोग एव योगनिष्पत्तिकारणम्।

ப்ராக்ருதங்களான ஐங்கருவி கண்டவின்பங்களிலும் அவற்றிற்கு உபாயங்களான கர்மங்களை அநுஷ்டிப்பதிலும் பற்றுதலானது எப்பொழுது விலகுகின்றதோ ; அப்பொழுதே ஸர்வஸங்க பரித்யாகம் செய்த யோகாரூடனாகிறான். பற்று தலுள்ள காலத்தில் கர்மயோகாப்யாஸமும் செய்தல்வேண்டும். 4

२३७ उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५ ॥

'आरुरुक्षोः' 'यदा हि' इति पूर्वोक्तश्लोकद्वयाभिप्रेतमर्थं विवृणोति- आत्मना - विषयाननुषक्तेन मनसा, आत्मानं उद्धरेत् - योगारूढताऽऽपादनेन संसारसमुद्रादुत्तारयेत् । 'आत्मने'त्यावर्तते । आत्मना-विषयप्रवणेन मनसा नात्मानमवसादयेत् - न पुनरधो नयेत्, आत्मैव-मन एव, ह्यात्मनो बन्धुः - आत्मोद्धरणहेतुः, आत्मैव - तदेव मनः, आत्मनो रिपुः - आत्मावसादहेतुः ।

மனதை ப்ராக்ருத விஷயங்களில் ஈடுபடாமல் செய்து தன்னை ஸம்ஸார ஸமுத்திரத்திலிருந்து கரையேற்றவேண்டும். அம்மனதை விஷயங்களில் ஈடுபடுத்தி தன்னை ஸம்ஸாரத்தில் அழுந்தச் செய்தல் கூடாது. தனக்கு பந்துவும் மனமே. சத்ருவும் மனமே. தன்னுடைய நன்மைக்கும் தீமைக்கும் மனமே காரணம் என்கை. 5

२३८ बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवाऽऽत्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

एकस्यैवैकंप्रति बन्धुत्वं रिपुत्वञ्च कथमिति चेत् येन पुरुषेण आत्मनैव - स्वेनैव, आत्मा जितः - स्वमनो जितम्, विषयेभ्यो व्यावर्तितम्, स आत्मा - मनः, तस्यात्मनः - जीवस्य, बन्धुः । अनात्मनस्तु अजितमनसस्तु, आत्मैव - स्वमन एव, शत्रुवत् - सम्प्रतिपन्नबाह्यशत्रुवत्,

शत्रुत्वे - शत्रुकृत्ये स्वनिःश्रेयसविपरीते वर्तेत । बन्धुत्वोपपादनं मनसो विजयेन, शत्रुत्वोपपादनं तु तदभावेनेति मनसो बन्धुत्वरिपुत्वे उपपद्येते ।

எந்த புருஷன் மனதை சப்தம் முதலிய விஷயங்களில் ஈடுபடுத்தாமல் ஜயிக்கின்றனோ, அவனுக்கு அவன் மனது பந்துவாகும், மனதை ஜயிக்காதவனுக்கு அந்தரங்கமான மனதே பாஹ்யசத்ருவைப் போல் ஆத்மக்ஷேம விரோதம் செய்வதாகும். ஆகவே மனதே பந்து, மனதே சத்ரு. 6

२३९ जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानावमानयोः ॥ ७ ॥

प्रतिष्ठितयोगत्वावस्था, तदारोहणोपायश्चोक्तौ अथ योगप्रक्रियां वक्तुं तदारम्भदशा ज्ञाप्यते– शीतोष्णसुखदुःखेषु मानावमानयोश्च जितात्मनः- जितमनसः, विकाररहितमनसः, प्रशान्तस्य - असन्निहितफलाभिसन्ध्यादि- रहितस्य, आत्मा परं - अधिकं, समाहितः - सम्यगाहितः विशदानु- सन्धानयोग्यो भवति ।

சீதோஷ்ணம், சுகதுக்கம் மாநாவமாநம், ஆகியவற்றில் மனோவிகாரமற்றும் ஸந்நிஹிதனை வாத்மாவைத் தவிர்த்து கிட்டாத மற்ற பலன்களில் அபிமான மற்றுமிருப்பவன் ஆத்ம ஸாக்ஷாத்காரயோக்யனுகிறன். 7

२४० ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ ८ ॥

इन्द्रियविजयो द्वन्द्वसहत्वं चोक्तम् ; अथ तयोर्हेतुरुच्यते - ज्ञान- विज्ञानतृप्तात्मा - आत्मस्वरूपविषयेण ज्ञानेन, तस्य प्रकृतिविविक्ता- कारविषयेण विज्ञानेन च सन्तुष्टमनाः, कूटस्थः - कूटस्थशब्दः परिशुद्धा- त्मन्यौपचारिकः । कूटस्य ह्ययःपिण्डादिसंश्लेषविश्लेषरूपावस्थाप्रवाहे

वर्तमानेऽपि स्वस्वरूपे न शैथिल्यादिरूपो विकारः, तद्वदत्रापि देवादिशरीरसंश्लेषविश्लेषरूपावस्थाप्रवाहेऽपि निर्विकारत्वं सिद्धमिति कूटशब्देनोपचारः । तादृशे ज्ञानैकाकार आत्मनि स्थितः. तत एव विजितेन्द्रियः समलोष्टाश्मकाञ्चनः - समानि लोष्टाश्मकाञ्चनानि यस्य सः, प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृतवस्तुषु भोग्यत्वाभावात् लोष्टाश्मकाञ्चनेषु समप्रयोजनः, लोष्टाश्मभेदवदश्मकाञ्चनादिभेदेऽपीत्यनेकदृष्टान्ताभिप्रायः । एवम्भूतःकर्मयोगी युक्तः - आत्मावलोकनरूपयोगाभ्यासार्हः, इत्युच्यते ।

*ஆத்ம ஸ்வரூபத்தைப் பற்றிய அறிவும் ஆத்மா ப்ரக்ருதி விலக்ஷணன் என்பதில் தெளிவும் ஏற்பட்டு அதனால் மனதில் ஸந்தோஷம் பெற்று ஆத்மநிஷ்டனும் ஜிதேந்த்ரியனும், மண் கட்டியையும் கல்லையும் பொன்னையும் ஒன்றாக நினைப்பவனுமான கர்மயோகியானவன் ஆத்மஸாக்ஷாத்காரமாகிற யோகாப்யாஸத்திற்குத் தகுதியுள்ளவனெனப்படுகிறான்.* 8

२४१ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

वयोविशेषानङ्गीकारेण स्वहितैषिणस्सुहृदः, सवयसो हितैषिणो मित्राणि, निमित्ततोऽनर्थेच्छवोऽरयः, हितैषित्वाहितैषित्वयोरुभयोर्हेत्वभावात् उभयरहिताः उदासीनाः, जन्मत एवोभयरहिताः मध्यस्थाः, जन्मत एवानिष्टेच्छवो द्वेष्याः, जन्मत एव हितैषिणो बन्धवः, धर्मशीलाः साधवः, पापशीलाः पापाः, आत्मैकप्रायोजनतया सुहृन्मित्रादिभिः प्रयोजनाभावात् विरोधाभावाच्च तेषु समबुद्धिर्योगाभ्यासार्हत्वे विशिष्यते ।

*ஸ்நேஹிதர்கள் சத்ருக்கள் உதாஸீநர் பந்துக்கள் சாதுக்கள் பாபிகள்போன்ற யாவரிடத்திலும் தனக்கு ப்ரயோஜநமோ விரோதமோ இல்லாமையால் ஆத்மாவையே ப்ரயோஜனமாகக்கொண்டு அவர்களிடம் ஸமபுத்தியுள்ளவன் யோகாப்யாஸம் செய்யத் தகுதியுள்ளவர்களில் சிறந்தவன்.* 9

...SKRIT VIDYA PEE... TIRUPATI.

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 9

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५७ दुर्मुख - वृषभ [सं ९

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

MAY 1956

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि।
२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

# विषयाः ॥

1 शृङ्गारनारदीयम् ।
2 नववर्षप्रशंसा ।
3 मुकुन्दमाला ।
4 विमर्शगोष्ठी । (2)
5 संस्कृतपुनरुज्जीवनम् । (3)
6 वत्सनाभमुनिचरित्रम् ।
7 वृद्धभाषितम् ।
8 धर्मतत्परता ।
9 प्रकृतिभेदः ।
10 पुस्तकपरामर्शः ।
11 चाटुश्लोकाः ।

TIRUPATI.

ऋक्षरजाः— (तीरमुपगच्छन् सरोषम्) अयि, ऋक्षरजःपरिभाविनि धूर्तिके, किमितःपरमपि त्वया प्रस्तोतव्यं साहचर्यम् ।

नारदः— ऋक्षरजः, अमोघं ते स्त्रीत्वं भविष्यति । किं मुधा मय्यमर्षं धारयसि । दिवस्पतिरहर्पतिर्वा त्वामचिरादनुग्रहीष्यति । यद्युडुपतिं कामयसे सोऽपि न तेऽनासाद्यो भवितुमर्हति । किं च, सर्वेषामपि दिक्पालानां त्वामुद्दिश्याचिरात् कलहकोलाहलमुत्पश्यामि । यतः, पश्य गजगामिनि,

गात्रं चम्पककुड्मलैर्विरचितं व्यालिप्य चन्द्रप्रभा-
सारैर्निःश्वसिते नियोज्य मलयप्रान्तोद्गतं मारुतम् ।
संसृज्यालकडम्बरेऽलिपटल संमन्त्र्य कण्ठे पिकं
यस्यास्ते नवयौवनच्छलमुपेत्यातस्थिवान् माधवः ॥

ऋक्षरजाः— (सासूयम्) नूनं त्वदीयोऽयं मनोरथः यदीदृश्या गात्रशोभया वृषस्यन्ती लोकपालान् भोक्ष्ये इति ।

(इति सत्वरमपसृत्य कन्दरां प्रविश्य निष्क्रान्ता)

नारदः—हन्त मुक्तोऽस्मि ऋक्षरजसः । न खलु, तावता पर्याप्तं मुक्तोऽस्मि यस्य बत ममावखण्डितसंसारचरित्रस्य संसारशकटीनाभिभूतं नारी-शरीरमुपस्थितम् । अथवा विटसार्वभौमो वृष्णीनां मौलिमणिः स भग-वानेवमाशास्ते । भवतु, आह्वये तावदेनं वीणागानेनाभ्युदयाय । (परिक्रम्य) अत्र किल शिलाभित्त्यन्तरिते सूर्ये शीतला स्थली छाया-संस्त्यायमादिशतीव मे । इति (शिलातले निषद्य वीणामङ्के कुर्वती) भवतु गास्यामि । (अन्तर्विहस्य) सुष्ठु भोः, यन्नारदत्वे समीहितं तद्वदनात्वे मुरारिभजनं पूरयिष्यते । अथवा स्त्री खलु वीणया गाय-न्ती शोभते इति भगवतः सङ्कल्पस्येदं पारतन्त्र्यम् । (मनस्समाधाय निरीक्ष्य) मा तावत् वानरकरास्फालनवशात् उत्पाटितावयवा महती । दिष्ट्या खलु । (संयोज्य वादयन्ती गायति)

सुकुमारललितमूर्ते गोपीजनगीतमधुरनिजकीर्ते ।
नारदललनामार्तेरुद्धरविहिताखिलेष्टसम्पूर्ते ॥

नारायण नारायण नारायण रदनाम्।
आराद्पहारीकृतहृदयामवसदयः॥

आसीन्मुनिबालः खलु वीणारवलोलः।
स्नातोत्थित एवाम्भसि जातो ननु युवतिः॥

अन्तःकरणेनाहितसन्तर्पणमनिशम्।
रदनामिह भजनारदमधुनार्पितकरणाम्॥

अङ्गीकृतसङ्गीतकमनुमोदितभणितम्।
भङ्गीजुपमङ्गीकुरु तदिमामिह तं माम्॥

गोपीजनजार स्मर नारायण रदनाम्।
दारास्तत्र माराशुगनिचिताङ्ग्यहमुचिताः॥

नेपथ्ये

दारा मम माराशुगनिचितस्य समुचिताः।

रदना— (ससंभ्रमम्) किं प्रतिरवो मां विडम्बयति।

अथवा—

पुनर्नेपथ्ये

शङ्कामयि पङ्केरुहनयने त्यज रदने।

रदना—(सलज्जाविस्मयप्रहर्षमुत्थाय) उपस्थितः खलु लोकनाथः।

प्रविश्य

ारायणः— अयि सुभगे,

प्रेप्सोःपुनरपि लक्ष्मीमन्यामम्भोनिधौ शयानस्य।
प्रतिपालनकार्श्यजुषो मम हि सुरदने परत्र जातासि॥

रदना— (सशोकम्) भगवन्, ईदृशावस्थामापन्नः स ते चरणभजनानुरक्तो जनः।

नारायणः— भद्रे, कृतमत्र परितापेन। गुणोत्तरं खलु संवृत्तम्। पश्य,

यस्योद्घर्षितवर्ष्मगीतमचिराद्यन्मञ्जुसञ्जल्पितै-
र्न्यक्काराकलितं, प्रपञ्चचतुरा यस्याप्युदारा गिरः ।
सद्यो यद्रतिकेलिकूजितजिता न स्मर्तुमर्हन्ति त-
न्मत्सौभाग्यवशान्न किं सुरदना सेयं स मे नारदः ॥

रदना— स्वामिनः स्वं येन विधिना प्रीतिमुत्पादयति तेन विधिनोपपन्नं स्वीक्रियते । तत्तटस्थोऽयं जनः किं प्रजल्पितुमर्हति ।

नारायणः— रदनिके, कुतोऽत्र ताटस्थ्यम् । भोगायतनं खलु स्त्रीशरीरम् । किमर्थमवमान्यते । मयाऽपि किल पूर्वं दानवप्रतारणार्थं मोहिनीभूतेन भुक्तो महेश्वरः । यत्र स्मृतिसीम्नि स्फुरितमात्रे वयमद्याप्युत्कण्ठाकर्बुरितां चित्तवृत्तिमावहामः ।

रदना—अनपहस्तितलज्जः कोऽन्य एवमालपिष्यति । (इति ग्रीवावलितकेन निरीक्षते)

नारायणः— मा तावत् शिरोधरनाडीनां वलितवैकृतं प्रसज्जतु । प्रिये, लक्ष्मीमारभ्य कुब्जिकां यावत् शतसाहस्रिका युवतयो मया भुक्ताः । त्वां किलेदानीमन्यादृशीं प्रेक्षे । तथा हि,

यत्सौष्ठवस्य परिणाहि, समृद्धिमच्च
कान्तेरुदारमपि वा सुकुमारतायाः ।
माधुर्यमञ्जुलतयोः फलमग्रसीम्नि
तत्ते वपुः परिणतं शतशः शपेयम् ॥

रदना— नाथ, माऽतिमात्रं मां लज्जापयित्वा । वित्तकाः खलु यूयं विदग्धालापानाम् । आस्तां तावत् सर्वमिदम् । ब्रूहि मे निश्चयम् । किमीदृश्येवात्यन्तकी परिणतिर्नारदस्य ।

नारायणः— अयि कातरे,

मत्तः प्रसूय षष्टिं वर्षान् जातेन हेमलम्बेन ।
नन्दिष्यसि प्रकामं पुनरास्थाय प्रभावं स्वम् ॥

भवतु, कुत्र तावदृक्षरजाः ।

रदना— (विहस्य) अस्यां कन्दरायां निलीना तिष्ठति असूर्यंपश्या मत्प्रियसखी ।

नारायणः—वर्तते मे कुतूहलम् । पश्याम्येनाम् ।

रदना— किमपर्याप्तिर्मारजनकस्याशोदितस्य सूर्यस्य रदनिकोपलब्धिमात्रेण ।

नारायणः— प्रिये, अलमन्यथा संभाव्य ।
तपस्वी खलु ऋक्षरजाः मदनुग्रहेण स्वां प्रकृतिं विन्दतु ।

रदना— अनर्थपर्यवसायिनी नूनमियं ते करुणा । न जानासि ऋक्षजरसम् । प्राप्तमात्रे पुंस्त्वे दारापहारेण व्यवहारपदेनाभियोक्ष्यते त्वाम् ।

नारायणः— (सस्मितम्) भवतु द्रक्ष्यामः । (उच्चैः) भो ऋक्षरजः, अयमहं वैकुण्ठात् त्वदनुग्रहार्थमुपगतः । तत्किमात्मानं न दर्शयसि ।

गुहाया निष्क्रम्योपगम्य

ऋक्षरजाः— (सप्रणामम्) भगवन्, अरविन्दनाभ, अमन्दपरिभवास्कन्दमन्दीभूतोऽहं त्वां वन्दे ।

नारायणः-- छिन्दन्तु, विधुराः प्रलापाः । किमपेक्ष्यते । यावत् पूर्ववत् पुमांसमेव त्वां करोमि ।

ऋक्षरजाः— (शिरश्चलयति ।

नारायणः— अयि मुग्धे, भण त्वरितम् । क्षणाद्भवसि पुमानृक्षरजाः ।

ऋक्षरजाः— अनुमन्यतां मां भगवान् अनेनैव वयोरूपविभवेन संसारसञ्चारिणीं बुभूषन्तीम् ।

रदना— (साश्चर्यम्) कोनु खल्वभिप्रायः ।

नारायणः— (सस्मितम्) कुतः खल्वेतत् ।

ऋक्षरजाः— एवं खल्विदम् ।

अतिचिरमुषितं मया हि पुंसा मुषितसुखेन जगत्यगोचरेण ।
तदिह सुतनुता ममास्तु यस्यां कृपणधियः प्रथमेऽपि याचितारः ॥

नारायणः— साधुदर्शिनी खलु त्वम् । भवत्वेवमेव । तत्कस्मान्नः परिग्रहभूतां रदनिकां न वर्धयसि ।

ऋक्षरजाः— सौभाग्यशालिनि, विजयस्व । या त्वं मया परिकलितेन नाम्ना भगवतेवाहूयसे ।

नारायणः— प्रिये,

सौभाग्यं मम वर्धते सुरदना लाभा—

रदना— न्ममाप्यच्युत-

प्राप्त्या पूर्वसमुच्चितैः सुचरितैर्योपियदि स्यामपि ।

ऋक्षरजाः—जीर्णे वानरवर्ष्म चर्क्षरजसस्तन्मे गतं सुन्दरी-

गात्रं चोपनतं दिगीश्वररहः स्मारोपचारोचितम् ॥

नारायणः— किं वां भूयः प्रियमुपहरामि ।

रदना— स्वन्तं सर्वमनवद्यम् ।

नारायणः— तथापीदमस्तु (भरतवाक्यम्)

आचन्द्रार्कमशेषलोकधिषणां व्याप्नोतु गीर्वाण
गीर्जीयादेष कविश्चिराय च महीमाश्राव्य भव्यं यशः ।
अस्यैताः प्रचरन्ति यत्र कृतयः सारस्यपारङ्गमा-
स्तत्रोन्मीलितभावुकत्वभरिताः सन्तः स्पृहां बिभ्रतु ॥

समाप्तं चेदं

शृङ्गारनारदीयम् नाम प्रहसनम् ।

श्रीमन्महालिङ्गकविप्रणीतम् ।

शुभमस्तु ।

# नववर्षप्रशंसा ॥

(R. Rajagopalan M. A, Bangalore)

—:o:—

१ अमितानन्ददः प्राप्तो दुर्मुखी नव्यवत्सरः ।
सुमुखः साधुसङ्घानामतथा खलचेतसाम् ॥

२ ह्लादयन् विगतोत्साहान् मन्दमारुतवीजनैः ।
संबोधयन्मङ्गलानां ऋद्धिं कोकिलगीतिभिः ॥

३ प्रेरयन् राष्ट्रकल्याणसाधने मूढचेतसः ।
इङ्गितेनैव सन्मार्गे शरद्गुरुरजृम्भत ॥

४ नवीनपुष्पवसना फुल्लविद्रुमशोभिता।
राजतेऽसौ मही सर्वा न वोढा गृहिणी यथा ॥

५ विकसत्पद्मवदना मल्लीमन्दस्मितप्रभा ।
कलहंसनिनादेन शंसन्तीव प्रियं प्रिया ॥

६ वत्सर स्वागतं तेऽस्तु चित्तोल्लासविधायिने ।
संसारौल्बण्यतप्तानां नव्योत्साहप्रदायिने ॥

७ चिरेप्सितानां कामानां नवमुल्लसमीयुषाम् ।
अस्तु पूरणमस्माकं प्रिययोः सङ्गमादिव ॥

———

// उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २९] कलि ५०५७ दुर्मुख - वृषभ साधारण [सं ९

# मुकुन्दमाला ॥

—:o:—

'भवति शरणमेको विष्णुपोतो नराणाम्' इत्युक्तं श्रुत्वा मन आह— यदि भगवान् संसारतारकः कथमस्मानसौ न तारयति । इयन्तं कालं तावदयं न तारितवान् । इतःपरं तारयिष्यतीति को न आश्वासः। अगाधः अत एव दुस्तरश्च खल्वयं संसारसागरः । न हि तत्तरणे स्वयं मम शक्तिरस्ति । तारणसमर्थस्तु भगवान् विष्णुः अत्यन्तमुदासीनः। अहो बत किमहं कुर्याम्— इति । तस्य समाश्वासनं कुर्वन्नाह महाराजः कुलशेखरः—

भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मा स्म गाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥

हे मम चेतः, अगाधं दुस्तरं भवजलधिं अहं कथं निश्शेषं तरेयमिति कातरत्वं मा स्म गाः ; कातरं भीतं मा भूः । कुत इति चेत् शृणु । स भगवान् तत्तरणोपायः पोत इत्युक्तम् । 'स इयदवधि अस्मान् न तारितवान् । इतःपरं वा कदाचित् तारयिष्यतीति कथमाश्वासः' इति पृच्छसि। तत्र इदमुत्तरम् । स भगवान् सर्वज्ञः सर्वशक्तः परमकारुणिकः। अस्मान् संसारसागरस्य परं पारं प्रापयितुं सर्वदा अवसरप्रतीक्षो वर्तते। परं तु ये तमुपसृत्य प्रसन्नं कुर्वन्ति तानेव स तारयति। नेतरान्।

अद्यावधि त्वं तच्चिन्तां नैव कृतवदसि । अतः त्वां न तारितवान्। अद्य त्वं तमभिगच्छ । तस्य प्रसादं सम्पादय । अवश्यं ते अभयं दास्यति। संसारभीतिस्ते निवर्त्स्यति। न मनागपि संशयः। किन्तु तत्प्रसादलाभाय त्वया कर्तव्यं किञ्चिदस्ति। तत् तस्य भजनम्। तस्मिन् भक्तिः क्रियताम्। सा कृता तं त्वयि प्रसन्नं करिष्यति। ततस्त्वं संसारं तरिष्यति।

सरसिजदृशि कमलनयने। नरकभिदि नरकासुरध्वंसकारिणि। परमकारुणिके, प्रतिकूलसर्वनाशकारिणि देवे भगवति निषण्णा स्थिरतया वर्तमाना तावकी त्वदीया त्वया कृता भक्तिरेका भक्तिरेव केवला इतरानपेक्षा अवश्यं निश्चितं तारयिष्यति, त्वं यथा भवजलधिं दुस्तरमपि तरसि तथा करिष्यति।

---

# विमर्शगोष्ठी ॥

(2)

केशवः— अस्मद्गोष्ठ्यां तदा तदा क्रियमाणस्य विमर्शस्य किं फलमिति विमर्शने वयमिदानीं प्रवृत्ताः। बुद्धेर्भिन्नत्वात् अत्र फलमपि भिन्नं भिन्नं भास्यति । मम तावदिदं भाति यत् यद्यपि फलान्तरं किमपि न भवति तथाऽपि व्यवहारकौशलसम्पत्तिरस्माकं उत्तमं फलं भवतीति।

माधवः— इदमहमनुमोदे। संस्कृतकलाशालासु वर्तमाने अध्ययनक्रमे विद्यार्थिनः शास्त्रपाण्डित्यं लभमाना अपि व्यवहारेषु नातीव पटवो भवन्ति। तथा स्थिता वयं अद्य अस्मद्गोष्ठ्यां पदे पदे भाषणावसरं प्राप्नुवन्तः तदभ्यासं कुर्वन्तो वर्तामहे। प्रत्यक्षमेवेदमस्माकं यत् आरम्भे यावन्तं भाषणक्लेशमन्वभवाम न तावन्तमिदानीमनुभवाम इति।

गोविन्दः— न परं न क्लेशमनुभवाम इति, अपि तु निरर्गलं मधुरगम्भीरं च भाषितुं शक्नुमः। अत्र भाषणाभ्यासो नाभविष्यच्चेत् नैवेयं शक्तिरस्माकमभविष्यत्।

विष्णुः— सुहृदः, पदे पदे भाषणसौकर्यलाभेन सुव्युत्पन्नपदवाक्यरचनापाटवमस्माकं भवतीति फलमिदं अस्मद्विमर्शगोष्ठीप्रवर्तनस्य न कश्चिदपह्नोतुं क्षमः। तत्र इदमपि मे वक्तव्यं भाति। गृहीतस्य कस्यचिद्वस्तुनो विषये ये अस्माकं अभिप्रायाः तान् भाषणेन आविष्कुर्मः। अभिप्रायाणां बहिः प्रकाशनोपायः भाषणम्। तत्र पटुता पुनःपुनरभ्यासेन भवतीति तत्त्वमेतत्। सुशिक्षितेन भाषणेन अभिव्यञ्जनीया ये अभिप्रायाः तेषां बुद्धौ बहुलमुद्भवे सामीचीन्ये च हेतुर्भवति इदमस्मद्विमर्शगोष्ठीप्रवर्तनम्। वस्तु किञ्चिदुपादाय सम्यग् भाषणीयमिति चेत्, प्रथमं तस्य वस्तुनः यत् स्वरूपं, यः स्वभावः, ये गुणाः, यत् पूर्वोत्तरम्, तत् सर्वं विचिन्त्य विविच्य अनाकुलं बुद्धौ धारणीयम्। एवं प्रथमं गृहीतवस्तुसम्बन्धिषु सर्वेषु अथवा विवक्षितेषु अंशेषु साधु अवधृतेषु गोष्ठ्यां भाषणं अक्लिष्टं सुकरं च भवति। अन्यथा हि वाग्मिनामग्रणीरपि भाषणे मन्थरायते, स्खलति, आकुलं किमपि भाषते, विरसवाग् भवति। तस्मात् सम्यग्भाषणं कामयमानैः पूर्वं गृहीतवस्तुविषया चिन्ता गाढविपुला कर्तव्या भवति। अत्रापि अस्माकमिदानीं अभ्यासो भवति। तदेवं विषयाणां तत्त्वविवेचनम्, विविक्तानां श्रोतृहृदयङ्गमं उपपादनम् इत्यस्मिन् उभयस्मिन्नपि पाटवं सम्पादयितुं वयं लब्धावसराः स्मः अनेनास्मद्गोष्ठीप्रवर्तनेनेति मे मतिः। (करघोषः)

नारायणः – (सर्वेषु साशङ्कं पश्यत्सु) यदियता कालेन अस्मत्सुहृदोऽवोचन् तत्र सत्यं ब्रवीमि न मे मनागपि विप्रतिपत्तिः। सम्पूर्णेन मनसा तदहमनुमोदे। परं तु सहसा मह्यमक्रुध्यन्तः परमां क्षमां कृत्वा शृणुत यदहं वच्मि। ततः परं सम्यग् विमृश्य ब्रूत यद् वो वक्तव्यं भाति। नाहं गोष्ठीविघटनोत्सुकः, नापि तथा वक्रबुद्धिः यथा सर्वत्र किञ्चित्प्रतिकूलभाषणं शीलं भवेत्। अनेन विमर्शनानुबन्धेन वस्तुविवेचनेषु भाषणेषु च सम्पन्नसामर्थ्या वयं भवाम इत्येतत् अहमप्यङ्गीकरोम्येव। न तत्र भवत्सु येनकेनापि अल्पिष्ठोऽपि सन्देहः कर्तव्यः। परं तु इदं वः पृच्छामि किं तत् सामर्थ्यं स्वयम्प्रयोजनम्? यदि वस्तूनां विवेचने अत्यन्तं प्रगल्भामहे, यदि च व्यवहारनैपुण्यस्य परां काष्ठां प्राप्ता भवामः, तावताऽपि किं साधितं भवति। आत्मनो

वा लोकस्य वा किं तेन कृतं भवति । तदभावे कस्य का हानिर्जायेत । तूष्णीं लोचने निमील्य मिथ्या सन्तुष्टैर्न भाव्यम् । दीर्घदृष्ट्या दूरावगाहिनी चिन्ता कार्या । यदि लोकयात्रायामुपयोगः सर्वथा नास्ति तर्हि यत् किमपि क्रियमाणं लोके आदरं न विन्देत् । तस्मादिदं वः सनिर्भरं ब्रवीमि, अस्मदीयः परिश्रमः कथमपि लोकयात्रोपयोगिने कस्मैचित् फलाय कल्पेत न वेति अस्माभिः विमृश्य अवधारणीयमिति । (सर्वे व्यग्रमन्योन्य पश्यन्ति)

केशवः— यत् सुहृदा नारायणेनोक्तं तन्नूनं अनुत्तानहृदयैरस्माभिः परिचिन्तनीयम् । महान्तं प्रश्नमेष उत्थापितवान् । अस्य पर्यालोचनाय कालः कश्चिदपेक्षितः । तदद्य व्युत्तिष्ठाम पुनः सम्मेलनाय ।

---

# संस्कृतपुनरुज्जीवनम् ॥ (3)

(R. Rajagopalan. M. A., Bangalore)

एतं विषयमधिकृत्य क्रियमाणेन पूर्वलेखानुवृत्तविमर्शनेनानेन न केवलं पण्डिताः परं भारतीयसंस्कृतिप्रसरणे संस्कृतपुनरुज्जीवने च बद्धादरास्सर्वे तदुचितकार्याचरणनिरता भवेयुरिति दृढं विश्वसिमः । संस्कृतविदुषामेवेदं पर्यवसायीति, अन्ये भारतीयाः विशेषतः इतरभाषाभिज्ञाः पाश्चात्यविद्यावासनावासिता भारतीयशास्त्रमहिमज्ञाः सर्वेऽपि औदासीन्यमवलंबितुं नार्हन्ति । तेषां सततप्रयत्नेनैव निरुत्साहानां निराशाविष्टमानसानां संस्कृताध्ययनेनैव स्वजन्म सफलयतां परश्शतानां पण्डितानां हृदये आशाङ्कुरः पल्लवितो भवेत् । देशप्रेम्ण इव भाषाप्रेम्णः आवश्यकतां यथा सर्वे जानन्ति, तथा विविधभाषामातृभूतस्य संस्कृतस्य पुनरुज्जीवनकार्याचरणेनैव ते कृतार्था भवेयुः, बहूनां भारतीयानामादरपात्रतां लभेरन्निति च निश्शङ्कं ब्रूमः ।

यथा श्रीमतामुन्षीमहाशयेन मुम्बैनगरे स्थापितं भारतीयविद्याभवनं संस्कृतस्य प्रोत्साहनाय बहूपकुर्वदास्ते, यथाऽयोध्यायां काश्यादिक्षेत्रेषु च संस्कृतज्ञाः महाकार्यपरायणा भवन्ति, तथा दक्षिणदेशे च

भवतीति तु आपाततो गृह्णन्तः तन्निर्मूलनाय तीव्रमुद्युञ्जते । तस्मादहं तद्विषये युष्माकं निष्कम्पं सुदृढं विवेकमुत्पादयितुमिच्छामि । यूयमपि हि तथाविधानेव प्रश्नान् पृच्छथ । अतो युष्माकं तादृश एव अभिप्रायो भवतीति भाति । इयदवधि यदहमवोचं तेन किं बुद्धेः प्रसादो ऽजन्यतेति जिज्ञासे । ज्ञात्वा उपरि वक्तव्यं वक्तुमिच्छामि ।

माधवार्यः— पूर्वमेव विज्ञापितवानस्मि, अतिगहना अपि विषयाः स्वामिभिः प्रतिपाद्यमानाः सुग्रहा भवन्ति, श्रोतॄणां बुद्धौ सुलभा भवन्तीति । तन्मन्ये रामकृष्णावपि स्वामिभिरुपदिष्टमर्थं सुगृहीतवन्ताविति ।

रामकृष्णौ— एवमेव आवामपि मन्यावहे । प्रलयानन्तरं लोकं स्रष्टुं प्रवृत्त ईश्वरः केषांचिदात्मनां मनुष्यशरीरं कल्पयति । तत्र केषाञ्चित् ब्राह्मणशरीरं अन्येषां क्षत्रियशरीरं, इतरेषामितरदिति शरीरगतो जातिभेदः प्रथममीश्वरसृष्टः । स पश्चात् सन्ततिक्रमेण अनुवर्तते । न तु स्वयं कैश्चिदियं व्यवस्था कल्पितेति अत्रभवन्त उपदिशन्ति ।

आचार्यः— एवमेतत् । सर्वेश्वरः सत्यसङ्कल्पः स्वेच्छया सर्वं कर्तुं शक्तः । अस्य आत्मनः द्विजशरीरं भवतु, इति स सङ्कल्पयति । तथैव तद्भवति । पृथिव्यादिभिः पञ्चभिर्भूतैः निर्मितोऽयं लोकः । कारणभूतानि पञ्चापि भूतानि सर्वेश्वरः यथा यथा इच्छति तथा तथा परिणमन्ति । तेन देवतिर्यङ्मनुष्यस्थावरभेदेन चतुर्धा शरीराणि जायन्ते । तेनैव एषु प्रत्येकं अवान्तरभेदा अपि बहवो जायन्ते ।

रामकृष्णौ— कथं सर्वेश्वरः केषांचिदात्मनां देवशरीरं अन्येषां मनुष्यशरीरं, इतरेषां पक्षिशरीरं, अपरेषां वृक्षगुल्मादिस्थावरशरीरं च ददाति । न हि स पक्षपाती ।

आचार्यः— सत्यं सर्वेश्वरः न कचित् पक्षपाती । सर्वेषु सम एव सः । तत्तज्जीवात्मगतकर्मभेदेन तु शरीरभेदः । तत्तत्कर्मानुगुणं भिन्नभिन्नं शरीरं सर्वेश्वरो ददाति ।

रामकृष्णौ— भगवन् साधु तावदेतत् । मनुष्येषु सर्वेषु समानाकारेषु केषाञ्चित् इयं जातिः अन्येषां इयं जातिरिति विशेषः कुतो भवति ? तत्र किं प्रमाणम् ? इति प्रश्नस्य यत् निष्कृष्टं समाधानं तत् पुनः सकृद् भगवान् वक्तुमर्हति ।

आचार्यः—ब्रवीमि शृणुतम्। सर्वे वृक्षाः सामान्यतो वृक्षा इत्यभिधीयन्ते। तत्र वटः, अश्वत्थः, आम्रः, पनसः, निम्बः इति बह्वयो वृक्षजातयः सन्ति। आसु वटबीजाज्जातो वृक्षो वटो भवति। आम्रबीजाज्जात आम्रो भवति। एवं सर्वत्र। एवमेव सर्वेषां मनुष्याणां मनुष्यत्वे समाने ब्राह्मणादयो जातिविशेषा भवन्ति। तत्र ब्राह्मणाज्जातो ब्राह्मणो भवति, क्षत्रियाज्जातः क्षत्रिय इत्येवं ज्ञेयम्। त्वङ्मांसरक्तादिषु सर्वत्र तुल्येष्वपि तत्र कश्चन विशेषोऽस्तीति अनुमानतः शास्त्राच्च अवगम्यते। उन्मत्तेन शुना दृष्टः पुरुषः तद्विषविकृतरक्तः साक्षात् श्ववदेव भवति। एवमत्र रक्तभेदकार्यं स्फुटं दृश्यते। एवं सुस्पष्टमदृष्टमपि प्रतिजातिशरीरं रक्ते अत एव मनसि कृत्स्ने शरीरे च जन्मसिद्धः कश्चन विशेषोऽस्तीति स एव जातिशब्दार्थ इति चावगन्तव्यम्। शास्त्रतश्च एवं विशेषोऽस्तीति गम्यते। तद्धि ब्राह्मणशरीरे सत्त्वगुण उद्रिक्त इति क्षत्रियशरीरे रजोगुण उद्रिक्त इत्येवमादि विभज्य वदति।

रामः—एतावता जातिभेदः सर्वः शरीरगतः न त्वात्मनि कश्चिद् भेदोऽस्तीति पर्यवस्यति।

आचार्यः—आम्। एवमेतत्। ब्राह्मणः अब्राह्मणः, मनुष्यो मृगः, पशुः पक्षी, मशको मातङ्गः, चरं अचरम्, इति सर्वोऽयं भेदः शरीरमात्रसम्बन्धी। नानाविधेषु एषु शरीरेषु अन्तर्वर्तमाना आत्मानः सर्वे समाः। न तेषां स्वरूपे परस्परं कश्चन भेदोऽस्ति। अद्य यो ब्राह्मणः सः कर्मविशेषेण अनन्तरजन्मनि अब्राह्मणमनुष्यो वा मृगविशेषो वा स्थावररूपो वा भवेत्। एवं अद्य अब्राह्मणः सन् पुनर्जनने ब्राह्मणो वा अन्यो वा। एवं जीवात्मनां कर्माधीनतया भिन्नभिन्नजातिशरीराणि भवन्ति। स्वरूपतस्तु सर्वे आत्मानः समाना इति निश्चितमेतत्।

कृष्णः—जननं नाम अभिनवशरीरप्राप्तिः। यदा कश्चन शिशुर्जायते तदा तदीये तस्मिन् अभिनवे शरीरे तन्मातापितृशरीरयोर्या जातिः सा सङ्क्रामतीत्युक्तं भवति। अत एव जन्मसिद्धा जातिः, न तु जाते मनुष्ये पश्चात् कारणविशेषेण सा उत्पद्यत इत्यपि निरूपितं भवति। इत्थं जन्मसिद्धायां जातौ उपनयनादयः संस्काराः किं कुर्वन्ति? तेषां क्रियमाणानां किं प्रयोजनम्? किं फलमुद्दिश्य ते क्रियन्ते?

आचार्यः—तेषु कृतेषु काचन योग्यता जायते। स्नाने कृते काचन शुद्धिर्भवति। ततःपरमेव सन्ध्यावन्दनादि कर्म कर्तव्यम्। स्नाने

अकृते शुद्धिर्न भवति । शुद्धिरहितैः कृतं सन्ध्यावन्दनादिकर्म निष्फलं भवति । तथा उपनयनादयः संस्काराः । द्विजानां उपनयनादिभिः संस्कारैः काचन योग्यता जायते । तादृशयोग्यतावद्भिरेव वेदाध्ययनादिकर्म कर्तव्यम् । अन्यथा तत् यस्मै फलाय क्रियते तत् नोत्पद्येत ।

कृष्णः— अध्ययनादिकर्मकरणे योग्यतासम्पादकतया तदङ्गभूता उपनयनादयः संस्कारा इति सारांशः ।

आचार्यः—तथा । योग्यता द्विविधा जन्मसिद्धा उत्पाद्या च । जन्मसिद्धा ब्राह्मणत्वादिजातिः उत्पाद्या उपनयनादिजन्या । अनया उभय्या योग्यतया सम्पन्ना ये ते वेदाध्ययनं कर्तुमर्हन्ति । तैः क्रियमाणमेव तत् सफलं भवेत् । अन्यथा न परं वैफल्यम्, महाननर्थोऽपि जायेत, भगवदाज्ञातिलङ्घनात् ।

---

महाकवेः कालिदासस्य

# धर्मतत्परता ॥*

—:o:—

रसोपसिक्तं रमणीयमर्थं
निवेदयन् निर्वृतिमातनोति ।
विदग्धलोकस्य विशेषतो यः
स कालिदासः कविरग्रगण्यः ॥

उदारनानारसबन्धबद्ध-
भावो भवत्येवमथापि धर्मे ।
दृढां जनानां धियमादधानो
मान्यो मनोऽयं महतां धिनोति ॥ २ ॥

---

*मद्र - संस्कृतसेवासमित्या 'कालिदासप्रतिभायां' प्रकाशितपूर्वमिदम् ।

दण्ड्यस्य दण्डात् स्थितये दिलीपः
प्रसूतिहेतोः परिणीतितश्च ।
चक्रेऽर्थकामावपि धर्ममेवे-
त्याः कालिदासादपरो वदेत् कः ॥ ३ ॥

शकुन्तलादर्शनलुप्तधैर्यं
दुष्यन्तमत्यन्तमुदीर्य तस्याः ।
विवाहयोग्यत्वविमर्शनिष्ठं
कोऽन्यः कविः कर्तुममुं क्षमेत ॥ ४ ॥

यज्ञे पशूनां विनियोजनस्य
भूतानुकम्पातिशयस्य चास्ति ।
विरोधगन्धोऽपि न, तत्त्वमेत-
दकालिदासोऽभिदधीत कः स्वित् ॥ ५ ॥

अश्वोऽस्तु गौरस्तु यदात्मरक्ष्यं
रक्ष्यं नृपैस्तत् स्ववपुर्व्ययेऽपि ।
इतीदमुर्वीश्वरकार्यसौक्ष्म्यं
को नः कविर्ग्राहयितुं क्षमोऽन्यः ॥ ६ ॥

यत्रास्ति यः कोऽपि न चोरवृत्ति-
र्यत्रास्ति यः कोऽपि न बन्धनस्थः ।
तदुत्तमं राज्यमितीममर्थं
जग्राह धीः कस्य कवेः परस्य ॥ ७ ॥

अन्योन्यसम्पत्परिवर्तनेन
नृपेण शक्रेण च संविधेयम् ।

लोकद्वयस्यावनमित्युदारं
शास्त्रार्थमत्राह कविः परः कः ॥ ८ ॥

अकालिदासोदितकाव्यबन्धे
द्रष्टुं क्व शक्यावभिनन्द्यसत्त्वौ।
गुरुप्रदेयाधिकनिस्स्पृहोऽर्थी
नृपोऽर्थिकामादधिकप्रदश्च ॥ ९ ॥

धर्मस्य तत्त्वं निहितं गुहायां
यः सर्वदृष्टेर्विषयं चकार।
तं कालिदासं विरहय्य मन्तु-
मन्यं कविं नोत्सहते मनो मे ॥ १० ॥

---

वेदान्तचिन्तां विपुलां करोमि
मीमांसने मग्नमनोरथोऽस्मि।
तथापि मे तस्य गिरो वलन्ते
भावे बतायं बलवान् कवीन्द्रः ॥

---

# प्रकृतिभेदः ॥

शुप्पः— (वीथ्यां त्वरितं गच्छन्तं कृष्णं निर्दिशन्) अमुं पश्य रे। महापुरुषमेष आत्मानं मन्यते। अतीव गर्वी। अतो हि अत्रोपविष्टौ आवां अपश्यन् गच्छति।

रामः— तवेयं प्रकृतिः यत् विषयमज्ञात्वा सर्वेषां परिवदनम्। केन गुरुणा कार्येण, कियदाकुलेन मनसा स इयत्या त्वरया गच्छतीति को वेद? कार्यान्तररहितस्त्वं इहोपविष्टः वीथ्यां गच्छत आगच्छतश्च जनान् प्रति किमपि किमपि वदन् नन्दसि।

शुप्पः— (क्रुद्धः) आमरे, अहं परिवादशीलः। सर्वान् दूषयामि। त्वं महायोग्यः। परमसात्त्विकः। सौजन्यशेवधिः। अपरो रामः ....।

रामः— तात, क्षमस्व माम्। तव हितं अहं कामये अतः आर्जवेन निस्सङ्कोचं एतदवोचम्। तत्र मा स्म क्रोधं कार्षीः। यदि मदुक्तमुचितं मन्यसे तर्हि तद् गृहाण। अन्यथा त्यज। स्वशीलमनुवर्तस्व।

शुप्पः— (हसन्) राम, साधु तावत् सात्त्विकवेषं धारयसि। त्वादृशैः बहुधा वञ्च्यते अयं लोकः। भयङ्करा यूयम्।

रामः— यः कोऽप्यहमसानि, अन्ये च। त्वन्तु कृष्णगृहं गत्वा विचारय को हेतुः येन स तथा त्वरितं अगमदिति। ततःपरं ज्ञास्यसि, कियद् भ्रान्तस्त्वमिति।

शुप्पः— का नु भो मे श्रद्धा तस्य गृहं गन्तुं विचारयितुं च। इयज्जडस्त्वमिति न मे विदितोऽसि।

रामः— तत्त्वजिज्ञासायां ते श्रद्धा मा भूत्। अस्तु पुनः अल्पेतरा सा दर्शं दर्शं मनुष्यान् परिवदितुम्।

---

# पुस्तकपरामर्शः ॥

—o—

श्रीभगवदाराधनक्रमः । श्रीदेशिकदर्शनविजयध्वजैः श्रीमदहोबिल-मठ - आस्थानविद्वद्भिः श्रीपुत्तङ्कोट्टकं वाधूलश्रीनिवासाचार्यमहादेशिकैः संगृहीतः । शिरोमणि तर्करत्न न्यायवेदान्तकेसरि (श्रीमधुरान्तकं) तिरुमलै ईच्चम्बाडि श्री वीरराघवाचार्यस्वामिकृतद्राविडभाषाविवरण-समेतः । मूलग्रन्थकर्तृदौहित्रेण (नाकै) वङ्कीपुरं श्रीवासुदेवशर्मणा प्रकाशितः ।

N. V. Vasudevan, Paduka Asrama, 33, Kothandarama Swami Koil Street, West Mambalam, Madras 17.

अतो लभ्यः । मूल्यम् १० आणकाः

अस्मद्देशे नवीना जीवनपद्धतिः काचिदिदानीं निष्पद्यमाना वर्तते, यत्र प्राचामाचाराणां अल्पोऽप्यवकाशो न लभ्यते । अथापि पूर्ववासनासम्पृक्तमनसो बहव आस्तिकाः तत्र तत्र वर्तन्त एव । तैः परिपाल्यमानेषु शास्त्रीयेष्वनुष्ठानेषु भगवदाराधनं प्रधानतमम् । तदिदं धर्मशास्त्रेषु, तदनुरोधिषु आह्निकग्रन्थेषु च विस्तरेण विहितम् । असौकर्यभूयिष्ठेऽस्मिन् काले तत् तथैव कर्तुं बहवो न पारयन्तीति पश्यन्तो दयालव आचार्याः तत् संक्षिप्योपदेष्टुं प्रवर्तन्ते । प्रस्तुतो ग्रन्थः तादृशसङ्ग्रह एव कश्चित् । अतोऽयं बहूनां महते उपकाराय कल्पेत । एतत्कर्तार आचार्याः सुप्रसिद्धा विद्वांसः । न परं वैदुष्यं वैदिकधर्मप्रवर्तनधुरन्धरत्वमप्येषां अपारमभूत् । त एते अविद्वत्सात्त्विकजनानुजिघृक्षया इमं भगवदाराधनक्रमं प्रणिन्युः । अद्य एतत्प्रकाशनेन तं तेषां यत्नं सफलयति तद्दौहित्रः श्रीवासुदेवाचार्य इति सन्तुष्यामः । द्राविडभाषाऽनुवादयोजनेन पण्डित श्रीवीरराघवाचार्याः इमं ग्रन्थं सरलतरमकुर्वन् । अन्ते कृतं श्रीनृसिंहहयग्रीवाष्टोत्तरशतनामावलियोजनं तत्तदर्चनापराणामत्यन्तमुपयुक्तं भवेत् ।

—————

# चाटुश्लोकाः॥

यदृच्छयोपपन्नेन सन्तुष्टो वर्तते सुखम्।
नासन्तुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः॥

पुंसोऽयं संसृतेर्हेतुरसन्तोषोऽर्थकामयोः।
यदृच्छयोपपन्नेन सन्तोषो मुक्तये स्मृतः॥

यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते।
तत् प्रशाम्यत्यसन्तोषादम्भसेवाशुशुक्षणिः॥

न तद् दानं प्रशंसन्ति येन वृत्तिर्विपद्यते।
दानं यज्ञस्तपःकर्म लोके वृत्तिमतो यतः॥

सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः।
न तथा तीर्थ आयाते श्रद्धया ये तनुत्यजः॥

बलेन सचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभिः।
सामादिभिरुपायैश्च कालं नात्येति वै जनः॥

SRI SANSKRIT VIDYA PEETHA TIRUPATI. LIBRARY.

Registered No. M 2300.

Book XXIX • ॥ श्रीः ॥ No. 10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५७ दुर्मुख - मिथुन [सं १०

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

JUNE 1956

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.

Do. With Sastraic Supplement Rs. 3—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यं द्वे रूप्ये । सानुबन्धायाः त्रीणिरूप्याणि ।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३ ग्राहकीबुभूषर्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात निर्वाहकसम्पादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः — श्रीगीतार्थदीपः । १६९—१७६

२४२ योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

अथाध्यायप्रधानार्थभूतयोगाभ्यासविधिरुच्यते— योगी - उक्तप्रकार-कर्मयोगनिष्ठः, रहसि - जनवर्जिते देशे, स्थितः, एकाकी - रहस्यार्हशिष्य-सब्रह्मचार्यादिसन्निधिरहितः, यतचित्तात्मा - चित्तमिह चिन्तारूपमनोवृत्तिः, तद्रहितमनस्कः, निराशीः - आत्मव्यतिरिक्तफलानपेक्षः, अपरिग्रहः - आत्मव्यतिरिक्ते ममतारहितः, सततम् - अहरहर्योगकाले, आत्मानं युञ्जीत - स्वदर्शननिष्ठं कुर्वीत ।

கர்மயோகநிஷ்டன் ஜனமில்லாத விடத்தில் தனிமையா யிருந்துகொண்டு மனதை அடக்கி பலாந்தரங்களில் அபேக்ஷை யற்று அவற்றில் எனது என்கிற அபிமானமுமில்லாமல் யோகம் செய்யுங்காலந்தோறும் தன்னை ஆத்மஸாக்ஷாத்காரியதனாகச் செய்தல் வேண்டும். 10

२४३ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम् ॥ ११ ॥

२४४ तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ १२ ॥

बाह्योपकरणनियममाह—शुचौ देशे - पाषण्डपतिताद्यशुचिसंसर्गजेन स्वाभाविकेन चाशुचित्वेन रहिते स्वतश्शुद्धे देशे, स्थिरम् - दार्वादिनिर्मितं अचलम्, नात्युच्छ्रितं नातिनीचम् - किञ्चिदुच्छ्रितं किञ्चिन्नीचं च, चेलं अजिनं कुशाश्च उत्तरे यस्मिन् आसने तत् चेलाजिनकुशोत्तरम् दार्वादेरासनस्य कठिनत्वात् मृदुत्वार्थं तदुपरि वस्त्रं, तदुपरि शुद्ध्यर्थं कृष्णाजिनम्, सर्वस्योपरि शुद्ध्यर्थं सत्त्वोन्मेषार्थं च कुशाः, एवंभूतं आत्मनः आसनं प्रतिष्ठाप्य - दृढं स्थापयित्वा, तत्र आसने उपविश्य इत्यन्वयः, एकाग्रम् - एकं अग्रं चिन्तनीयं यस्येत्येकाग्रं योगैकप्रवणं मनः

कृत्वा, यतचित्तेन्द्रियक्रियः - चित्तमिह चिन्तावृत्तिः, इन्द्रियाणि च बाह्यानि मनसः पृथगुक्तत्वात्। उपसंहृतचिन्तावृत्तिः उपसंहृतेन्द्रियक्रियश्च, आत्मविशुद्धये आत्मनो बन्धनिवृत्तये, शुद्धान्तःकरणस्य साक्षात्कारसाध्या ह्यात्मविशुद्धिर्मोक्ष एव। योगं युञ्ज्यात् - आत्मावलोकनं कुर्यात्। पाकं पचतीतिवत् 'योगं युञ्ज्यात्' इति निर्देशः।

சுத்தமான ஸ்தலத்தில் மரம் முதலியவற்ருல் செய்யப் பெற்று த்ருடமாய் அதிக உயர்வு தாழ்வில்லாது நடு நிலையில் ஆஸனத்தைத் தனக்கு அமைத்துக் கொள்ளவேண்டும். அவ் வாஸனத்தில் வஸ்திரம் அதின்மேல் மான் தோல் அதற்கு மேலே தர்ப்பம் ஆகியவற்றைச் சேர்த்து அதில் உட்கார்ந்து கொண்டு மனதையும் புறவிந்திரியங்களையும அடக்கி ஆத்ம ஸாக்ஷாத்காரம் செய்யவேண்டும். அதனுல் தனது கர்ம பந்த மானது விலகி மோக்ஷம் பெறலாகும். 11–12

२४५ समं कायशिरोग्रीवं धारयन्नचलं स्थिरम्।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्॥ १३॥

२४६ प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः।
मनस्संयम्य मच्चित्तो युक्त आसीत मत्परः॥ १४॥

एवं शुचिदेशासनादिरूपं बाह्यं योगोपकरणं मनसश्चैकाग्र्यमुक्तम्, अथ कायमनसोः क्रमात्कर्तव्यनियमविशेषा उच्यन्ते— कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं इति द्वन्द्वैकवद्भावः, तत एव नपुंसकता। अत्र सिद्धापरनामा शरीरस्य मध्यमप्रदेशः कायशब्देन विवक्षितः। समं अचलं, स्थिरम् इति धारणक्रियाविशेषणानि। सममित्यत्र आर्जवं, अचलशब्देन निष्कम्पत्वं, स्थिरमिति पश्चाद्भागधारणप्रयत्ननिवृत्तिहेतुस्सापाश्रयत्वं च विवक्षितानि। शरीरस्य मध्यमप्रदेशं शिरः कण्ठं च समं निष्कम्पं सापाश्रयतया स्थिरं च धारयन्, दिशश्चानवलोकयन् हेत्वर्थेऽत्र शतृप्रत्ययः, दिक्शब्दोपलक्षितबाह्यसकलपदार्थावलोकननिवृत्त्यर्थं, स्वं नासिकाग्रं संप्रेक्ष्य निमीलनेनापि बाह्यानवलोकनसिद्धौ स्वनासिकाग्रावेक्षणं

निद्रादिनिवृत्त्यर्थम् । मनस्यन्तर्मुखे स्वनासाग्रसम्प्रेक्षणस्यासम्भवात् नायनस्य तेजसो नासाग्रसन्निपातमात्रमिह विवक्षितम् । प्रशान्तात्मा - योगोपयुक्तमनस्सन्तोषवान्, विगतभीः - विगतभयः, ब्रह्मचारिव्रते । योषित्सु भोग्यताबुद्धिवर्जनरूपे ब्रह्मचर्ये स्थितः, मनस्संयम्य - मनसः वृत्तीः उपसंहृत्य, मच्चित्तः - मयि भगवति चित्तं यस्य तथाभूतः युक्तः - अवहितः मत्परः - अहं परो यस्य सोऽयं मत्परः - मय्येव सर्वस्मादुत्कृष्टत्वबुद्धिमान् आसीत ।

யோககாலத்தில் தன் சரீரத்தின் மத்யபாகம், தலை, கழுத்து இவைகளை ஸமமாகவும் அசையாமலும், ஸ்திரமாகவும் அமைத்துக்கொண்டு மற்ற பதார்த்தங்களில் கண்ணோட்டம் கொள்ளாமல் பார்வையைத் தனது மூக்கு நுனியில் வைத்து, மனஸ் ஸந்தோஷத்துடன் நிர்ப்பயனாய் ஸ்த்ரீகளிடத்தில் ஆசையை விலக்கி என்னையே போக்யனாகவும் ஸர்வோத்க்ருஷ்டனாகவும் நினைத்து, அவதானத்தோடு இருத்தல் வேண்டும்.
13-14

२४७ युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥

जीवात्मयोगप्रकरणे 'मच्चित्तो मत्परः' इति परमात्मचिन्तनं किमर्थं विधीयत इत्यत्रोच्यते — एवं– यथोक्तेन सर्वस्मात्परत्वादिना, आत्मानं - मनः, सदा युञ्जन् - समाहितं कुर्वन्, तेन नियतमानसः - निश्चलमानसः. मत्सम्बन्धेन मनः पवित्रं भवति ततो निश्चलं च । निर्वाणस्य परमां निर्वाणपरमां - आनन्दकाष्ठाभूताम्, मत्संस्थाम् - मयि संस्थिताम्, शान्तिं अशनायादिषडूर्मिराहित्यरूपाम्, अधिगच्छति - प्राप्नोति, परमात्मचिन्तनेन निश्चलमना योगी 'युञ्ज्याद्योगमात्मविशुद्धये' इति पूर्वोक्तां बन्धनिवृत्तिमधिगच्छतीति भावः ।

இவ்வாறாக என்னிடத்திலேயே மனதைச் செலுத்துமவன் அசஞ்சலமனம் பெற்று கர்மபந்த நிவ்ருத்தியாகிய ஆனந்தத்தின் எல்லையை அடைகிறான் 15

२४८ नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

२४९ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

उचितदेशप्रभृति परमात्मचिन्तनपर्यन्तं योगस्यापेक्षितांशमुक्त्वाऽन्यदपि योगोपकरणमाह— "अत्यशनादेर्योगविरोधित्वं 'नात्यश्नत' इति श्लोकस्यार्थः । मिताहारादेस्तु योगोपयुक्तत्वं 'युक्ताहार' इति श्लोकेनोच्यत इति व्यतिरेकतोऽन्वयतश्चैक एवार्थस्स्थिरीक्रियते"; हे अर्जुन अत्यश्नतस्तु योगशास्त्रे परिपठितादन्नपरिमाणात् अतिमात्रम् अश्नतो योगिनस्तु योगो नास्ति - न सिद्ध्यति, एकान्तं अनश्नतश्च न - अत्यन्तमनशनवतोऽपि न सिद्ध्यति । अतिस्वप्नशीलस्य च न 'जाग्रतः इत्यत्राप्यतिरनुषञ्जनीयः । अतिमात्रं जाग्रतश्च नैव योगो भवति । युक्ताहारविहारस्य पूर्वश्लोकोक्तातिशब्दप्रतियोगिकत्वात् 'युक्त' शब्दो मितपरः । आह्रियत इत्याहारः अन्नं, विहारः–विहरणम् सञ्चारः, तौ युक्तौ नियतपरिमाणौ यस्य सः युक्ताहारविहारः तस्य । 'उदरस्यार्धमन्नस्य तृतीयमुदकस्य तु । वायोस्सञ्चरणार्थं तु चतुर्थमवशेषयेत्' इत्युक्तमन्नपरिमाणम् । न्यूनाधिकादिसमस्तदोषराहित्यमिह युक्तशब्देनाभिप्रेतम् । कर्मसु युक्तचेष्टस्य - श्रमहेतुरायासोऽत्र चेष्टा । युक्ता नियता चेष्टा यस्य, मितायासस्य, युक्तस्वप्नावबोधस्य - युक्तौ नियतकालौ स्वप्नश्च अवबोधश्च यस्य तस्य योगिनो दुःखहा - सर्वसंसारदुःखनाशनः, योगः भवति - सम्पन्नो भवति ।

அதிகமான ஆஹாரம், அல்லது ஆஹாரமே இல்லாமை இவ்விரண்டும் யோகவிரோதிகள். அதிகமான உறக்கமும், தூக்கமே இல்லாமையும் அவ்வாறே. அளவிற்குள்பட்ட ஆஹாரமும் ஸஞ்சாரமும் வேலைகளில் மிதமான ஆயாஸமும் மிதமான தூக்கமும் விழித்தலுமாகிய விவை துக்கத்தைப் போக்குகின்ற யோகத்திற்கு உபகாரகங்களாகும். 16-17

२५० यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निस्स्पृहस्सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ १८ ॥

एवं परिकरोक्तिसमनन्तरं योगदशां प्रदर्शयितुं ततः पूर्वां प्रागुक्तैव योगयोग्यदशा परामृश्यते— विशेषेण नियतं विनियतं, यदा चित्तं बाह्यार्थचिन्तां हित्वा आत्मन्येव विनियतं एकाग्रतां गतं निश्चलमवतिष्ठते स्वात्मन्येव स्थितिं लभते, तदा सर्वकामेभ्यो निस्स्पृहस्सन्– काम्यन्त इति कामाः दृष्टादृष्टविषयाः, तेभ्यस्सर्वेभ्यो निर्गता स्पृहा तृष्णा यस्य तथाभूतस्सन्नयं योगी युक्तः योगयोग्यः इत्युच्यते ।

தனது மனதானது ஆத்மாவினிடத்திலேயே எப்பொழுது ஈடுபட்டிருக்கின்றதோ அப்பொழுது மற்றுமுள்ள விஷயங்களில் வைராக்யம் பெற்றுள்ள இவ்வதிகாரியானவன் யோகத்திற்குத் தகுதியுடையவன் எனப்படுகிறான். 18

२५१ यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥

अथ योगदशा लक्ष्यते— निवाते वातवर्जिते स्थाने तिष्ठतीति निवातस्थः दीपः यथा नेङ्गते - न चलति । निश्चलत्वे पर्वतादिनिदर्शनसद्भावेऽपि दीपदृष्टान्तसामर्थ्यात् अचलस्सप्रभस्तिष्ठतीति विवक्षितम् । यतचित्तस्य - संयतान्तःकरणस्य, योगं युञ्जतः - आत्मविषये साक्षात्कारं कुर्वतः, 'योगिनः आत्मनः' इति व्यधिकरणे षष्ठ्यौ । योगिनः आत्मस्वरूपस्य सा उपमा स्मृता - 'उपमा' इति दृष्टान्तगतं साधर्म्यमत्र निर्दिश्यते । नात्रोपमाशब्द उपमितिपरो दृष्टान्तपरो वा । यथेति निर्दिष्टप्रकारपरामर्शी खल्वत्र तच्छब्दः, उपमाशब्दश्च तच्छब्दसमानाधिकरणः । यथा निवातस्थो दीपो निश्चलस्सप्रभश्च तिष्ठति तथा निश्चलो ज्ञानप्रभ आत्मा तिष्ठति । प्रभायाश्च प्रतिधर्मोऽत्र ज्ञानम् । आत्मनो निश्चलत्वं च स्वप्रभाभूतज्ञानस्य बाह्यविषयेषु इन्द्रियद्वारा प्रसरणनिवृत्तिः ।

காற்றில்லாத ஸ்தலத்திலுள்ள தீபமானது சலியாமல் ஒளியோடிருப்பதுபோல் ஆத்மஸாக்ஷாத்காரத்திலிருக்கும் யோகியின் ஆத்மஸ்வரூபமுமிருக்கும். அதாவது தன்னுடைய ஞானத்தினல் விஷயாந்தரங்களில் சலியாமலும் ஆத்மஜ்ஞான மாகிற ஒளியோடு கூடியும் நிற்குமென்றவாறு. 19

२५२ यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनाऽत्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

२५३ सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ २१ ॥

२५४ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥ २२ ॥

२५५ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

पुनरपि योगदशैवादरातिरेकाय निरतिशयपुरुषार्थत्वप्रतिपादनेन
प्रपञ्चयते— योगसेवया हेतुना सर्वत्र निरुद्धं— उत्तरोत्तरप्रवृत्त्यनुदयवत् ,
चित्तं यत्र— योगे, उपरमते - अतिशयेन रमते, प्रतिनिर्देशस्थयोगशब्दा-
न्वयानुरोधात् यच्छब्दोऽत्र योगपरः । यत्र च योगे, आत्मना - मनसा,
आत्मानं जीवात्मानं, पश्यन् - साक्षात्कुर्वन्. आत्मन्येव - जीवात्मन्येव,
तुष्यति - सन्तोषं लभते नान्यत्र ।

यत्तदिति पिण्डितं प्रसिद्ध्यतिशयार्थं तदित्यर्थकम् । अतीन्द्रियम् -
इन्द्रियागोचरः, बुद्धिग्राह्यम् - आत्मविषयबुद्ध्येकग्राह्यम्, आत्यन्तिकम् -
पुनर्दुःखसंभेदरहितम् सुखम्, यत्र - योगे, वेत्ति - अनुभवति, 'आत्मनि
तुष्यति' इति पूर्वमितरसुखनिरपेक्षत्वपरम्, 'सुखमात्यन्तिकं' इत्यादिकं
तु स्वरूपसुखानुभवपरमित्यपौनरुक्त्यम् ।' 'वेत्ति यत्र' इति यत्रशब्दः पूर्वो-

तरवाक्यसाधारणतया मध्ये प्रयुक्तः । यत्र च - योगे, स्थितः (सुखातिरेकेण) तत्त्वतः - तद्भावात्, आत्मस्वरूपसुखानुभवादिति यावत् न चलति - न प्रच्यवते, यम् - योगम्, लब्ध्वा च - प्राप्य च, (योगाद्विरतः) अपरं लाभम् - लाभान्तरम्, ततः - योगात्, अधिकं न मन्यते - न चिन्तयति, यस्मिन् - योगे, स्थितः गुरुणा महता, दुःखेनापि, न विचाल्यते - योगप्रतिकूलमवसादं न गच्छति, वियुज्यतेऽनेनेति वियोगः । दुःखसंयोगस्य वियोगः दुःखसंयोगवियोगः - दुःखसम्बन्धस्य विश्लेषहेतुम्, तम् योगसंज्ञितम् - योगशब्दाभिधेयम्, विद्यात् - जानीयात्, सः योगः निश्चयेन - पूर्वोक्तनिरतिशयपुरुषार्थत्वाध्यवसायेन हेतुना, न निर्विण्णम् अनिर्विण्णम्, अनिर्विण्णं च तत् चेतश्च तेन अनिर्विण्णचेतसा - हृष्टेन मनसा, योक्तव्यः - कर्तव्यः, 'मनसा क्लिश्यमानस्तु समाधानं च कामयेत् । अनिर्वेदं मुनिर्गच्छन् कुर्यादेवात्मनो हितम् इति ह्युच्यते ।

யோகாநுஷ்டாநத்திலுல் மற்றெல்லாவற்றிலும் தகையப் பெற்று மனதானது யோகத்திலேயே சந்தோஷம் பெறும். ஆத்மஸாக்ஷாத்காரத்திலுல் மனஸ்ஸானது ஆத்மாவைத் தவிர்த்து மற்றதில் ஆசையற்றிருக்கும் யோகதசையிலே இந்திரியங்களுக்குப் புலனுகாததும் எல்லையில்லாததுமான ஸுகத்தை அநுபவிப்பன். அந்த ஸுகத்திலிருந்து விலகமாட்டான். யோகத்திலிருந்து விலகிய தசையிலும் மற்ற ப்ரயோஜநமொன்றையும் மேலானதாக நினையான். யோகநிஷ்டன் எக்காலத்திலும் புத்ரவியோகம் முதலிய பெரிய துக்கத்திலுைம் மனச்சோர்வு பெறமாட்டான். ஸர்வதுக்கஸம்பந்தமும் விலகுவதற்குக் காரணமானது யோகமென்பது. இந்த நிச்சயத்திலுல் மனதில் ஸந்தோஷத்தோடு யோகத்தைச் செய்தல் வேண்டும்.

२५६ सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥

२५७ शनैश्शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ २५ ॥

[ ध्यानपत्रिका XXIX-10

सङ्कल्पः प्रभवः येषां कामानां ते सङ्कल्पप्रभवाः, ते च पुत्रक्षेत्रादयः, तान् सर्वान् कामान् मनसैव तदनन्वयानुसन्धानेन स्वरूपतः त्यक्त्वा, अशेषतश्च कामान् त्यक्त्वा' इति चकाराभावेऽपि योज्यम्, अन्यथा 'सर्वान्' 'अशेषतः' इति पदयोरन्यतरस्य वैयर्थ्यम्। ते च कामाः सङ्कल्पप्रभवभिन्नाः स्पर्शजाः शीतोष्णादयः । ते च स्वरूपतस्त्यक्तुं न शक्यन्ते। तेष्ववर्जनीयेषु तन्निमित्तहर्षोद्वेगौ त्यक्त्वा । 'मनसैव' इति पदं काकाक्षिन्यायेन पूर्वोत्तरयोरन्वेति। मनसैव हेतुना, इन्द्रियग्रामम् - इन्द्रियसमुदायम्, समन्ततः- सर्वस्माद्विषयात्, विनियम्य - विशेषतो नियमनं कृत्वा, धृतिगृहीतया - धैर्येण युक्तया, बुद्ध्या शनैश्शनैः - न सहसा, उपरमेत् - आत्मव्यतिरिक्तात् मानसोद्योगं वारयेत् । मनः आत्मसंस्थम् - आत्मैकनिष्ठं कृत्वा किञ्चिदपि - आत्मव्यतिरिक्तमनुकूलप्रतिकूलोदासीनात्मकं सर्वं, न चिन्तयेत् ।

காமங்களில் புத்ர க்ஷேத்ரம் முதலியவை எனது என்னும் எண்ணத்தினுலேற்படுகின்றன. அவற்றையும் அவற்றில் பற்றுதலையும் விலக்கவேண்டும. மற்றொருவகை காமங்கள் சீதோஷ்ணுதிகள் இவை சரீரத்தோடு விலக்கமுடியாத ஸம்பந்தம் பெற்றவை. இவற்ருலேற்படும் சந்தோஷத்தையும் வெறுப்பையும் விலக்கவேண்டும். புலன்கள் யாவற்றையும் சிற்றின்பங்களில் செல்லாதபடி மனதினுல் கட்டுப்படுத்தல் வேண்டும். புறவின்பங்களைப் பெறுதலில் மனது செல்லாதவாறு மெள்ள மெள்ள விவேகத்தினுல் விலகச்செய்தல் வேண்டும். பிறகு மனதை ஆத்மாவிலேயே ஊன்றச்செய்யவும் மற்றுள்ள அநுகூலவஸ்துக்களையும் ப்ரதிகூல வஸ்துக்களையும் இரண்டுமல்லாத உதாஸீனங்களையும் நினைக்கலாகாது.

२५८ यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥

पूर्वोक्तमेव दुर्ग्रहत्वद्योतनायावधानविधानाय च प्रपञ्चयति–चञ्चलम् - चलस्वभावम्, अत एव अस्थिरम् - आत्मन्यस्थिरम्, सामान्यविशेषविषयत्वात् चञ्चलं अस्थिरं इत्यनयोरपुनरुक्तिः । एवंभूतं मनः, यतो यतो निश्चरति - यस्माद्यस्मात् शब्दादेर्निमित्तात् निर्गच्छति, प्रयोजनतया हेतौ

TIRUPATI

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 11

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५७ दुर्मुख - कर्कट [सं ११

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY
JULY 1956

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription  Rs. Two only.

Do. With Sastraic Supplement  Rs. 3—0—0

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखा ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— . Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

# विषयाः ॥

1 उद्भ्रान्तदशाननम्।
2 वरदाभ्युदयचम्पूः।
3 मुकुन्दमाला।
4 विमर्शगोष्ठी। (3)
5 कीटोपाख्यानम्।
6 वृद्धभाषितम्।
7 प्रकृतिभेदः।
8 सुभाषितानि।
9 पुस्तकपरामर्शः।
10 विषयसूची।

85

॥ श्रीः ॥

मरकतवल्लीसमेतश्रीमार्गसहायस्वामिने नमः ।

# ॥ उद्गातृदशाननम् ॥

नाम

## ॥ नाटकम् ॥

श्री महालिङ्गकविप्रणीतम् ।

---

नमो दिक्पालकोटीरहीरनीराजिताङ्घ्रये ।
शम्भवे जगदारम्भस्थितिसंस्थितिहेतवे ॥ १ ॥

यक्षो रक्षो दानवो मानवो वा
स्यादासीद्वा योऽपराधी विरोधी ।
तस्याकस्मात् क्वापि बुद्धौ सशुद्धौ
युष्मान् सद्यः सर्वदः पातु शर्वः ॥ २ ॥

नान्द्यन्ते

सूत्रधारः—

नन्दिकरकलितडमरुक-
लयनिरपेक्षोद्भ्रमत्पदाब्जाय ।
उन्मत्ततण्डवाडम्बराय
सन्ध्यानटाय नमः ॥ ३ ॥

(इति पुष्पाञ्जलिं विकीर्य किञ्चिदन्तरं गत्वा पुरोऽवलोक्य सहर्षपारवश्यम् ।)

अर्णवोऽर्णव इत्येवमलं स्तुत्वा जडाशयम् ।
निर्णयान्तर्हितक्षोभं संस्तुमः संसदर्णवम् ॥ ४ ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये, किं न त्वरसे ?

नेपथ्ये,

अये, मुञ्च, मुञ्च दुकूलाञ्चलम् । आर्यपुत्र आह्वयति ।

सूत्रधारः – हा धिक् । कस्तावत्ते गत्युपरोधं करोति ।

(दृष्ट्वा सहासम्) अहो बालकस्य दुश्चेष्टितम् ।

व्यालम्बमानः सिचयाञ्चलेन पद्भ्यां पुरो विघ्नितपादचारः ।
आयासयत्यानतपूर्वकायामम्बां रुदन्नर्धविमिश्रहासः ॥ ५ ॥

(पुनः स्मृत्वा) अहो कार्यातिपातः । एष हुंकृतेनैनं निवारयामि ।

नेपथ्ये

अयि वत्स, पश्य, पश्य। पिता त्वां निर्वर्ण्य निर्भर्त्सयते । अपेहि, अपेहि यावन्नोपैष्यति ।

सूत्रधारः— (सहासम्) कथं मद्भ्रुकुटिं दृष्ट्वा अपक्रान्त एव ।

प्रविश्य

नटी— (सलज्जास्मितं सविभ्रमायासं निःश्वसती) जयत्वार्यपुत्रः । बालस्यापि पुंसोऽस्य पुरोऽहमबलैव नूनं येन क्षणमात्रेणास्मि विश्लथिताङ्गयष्टिराक्रोशमात्रशरणा विक्लवीकृता ।

सूत्रधारः— (सस्मितम्) यत्सत्यमाकम्पितामिव लतां त्वां संस्थाशून्यामेव पश्यामि । अद्य खलु भवत्याः,

उत्तरलाक्षि स्मेरं स्रंसि मुखं विनतनालमिव पद्मम् ।
व्याकीर्णोऽलकभारः साध्वसहर्षावधूतायाः ॥ ६ ॥

नटी— आर्यपुत्र, अलमधिकं मां लज्जापयित्वा । कीदृश उपक्रमः आर्यपुत्रस्य (सस्मितम्) यो मां त्वरया आह्वयत् ।

सूत्रधारः – साधु । सम्यक् स्मारिताः स्मः । अद्य खलु श्रीमदप्पय्यदीक्षितवंश्यस्य, श्रीयज्ञेश्वरकविसूनोः श्रीमार्गसहायशर्मणो महालिङ्गकवेः अभिनवेन **उद्धातृदशानन** नाम्ना सनातनलोकवार्तावद्धप्रतिशब्दबन्धु-

रेण, उपहिताळौकिकसंवित्संस्थानरहस्येन, परमेश्वरकृपाप्रापकेण, रूपकेण सभासदः सभाजयितुमिच्छामि । तदिदमधिकृत्य काशनीकाशच्छविगगनाङ्गणविहरमाणराजहंसं शरत्समयं, सामाजिकाराधनाय प्रस्तूयतां किमपि गीतम्।

नटी– (तथेति गायति)

तारामौक्तिकहारा
सितपरिचलदभ्रदिव्यसंव्याना ।
उल्लसितचन्द्रवदना
क्रीडति गगनाङ्गणे रजनी ॥ ७ ॥

सूत्रधारः– साधु गीतम्। (पुरो दृष्ट्वा) अथवा 'क्रीडति शैलाङ्गणे गौरी'ति वक्तव्यम्। पश्य, पश्य काञ्चनशरवणमालावलयितस्य विन्दुसरसः परिसरारामे क्रीडासक्तायाः शैलराजतनयायाः दौवारिकधुरां वहन्नेष नन्दी अनभिनन्दनीयभ्रुकुटिरित एवाभिवर्तते । तदावामितोऽपसृत्य अनन्तरकरणीयाय सज्जीभवावः।

नटी– तथा।

(उभौ निष्क्रान्तौ)

---

## प्रस्तावना।

ततः प्रविशति यथा निर्दिष्टो नन्दी, केनचिदन्तरेण
पृष्ठतो भृङ्गिरिटिश्च।

नन्दी– (चिन्तां नाटयन् स्वगतम्)

कलिश्चेदादिदम्पत्योरीदृशोऽपि गृहाश्रमे।
का कथा मोहमात्सर्यकलुषाणां नृणां भुवि ॥ ८ ॥

भृङ्गिरिटिः— (साशङ्कमुपसर्पन्) भगवतः किमपि गुरुकं चिन्तास्थानमिव पश्यामि। यद्यहं विश्वासभाजनम् ... ...

नन्दी— भृङ्गिरिटे,

भृङ्गिरिटिः— (सत्वरोपसर्पणम्) भगवन् !

नन्दी— अद्य कलासशिखरे सन्निहित एव भवान्।

भृङ्गिरिटिः— अथ किम्।

नन्दी– तत् किमत्र प्रष्टव्यम्। अपि च पश्य, सचराचरं जगदद्य ज्ञातव्यं विजानाति। तथा हि—

> निष्पन्दास्तरवः प्रशान्तविहगव्याहारमूकादिशः
> सन्त्रस्ताः सरितो नदन्ति न पुरो ग्रावोपरुद्धा अपि।
> सृष्टिश्चित्रमयीव भाति निखिला लीना गणाः कुत्रचि-
> द्देवे तिष्ठति योगसंवृतरुषि त्यक्तेऽम्बया रुष्टया॥ ९॥

भृङ्गिरिटिः— कथं रुष्टया त्यक्त इति। अहं तावदज्ञासिषं देवी क्रीडितुं शरवणमागतेति। किं तु प्रागेव मम हृदयकोणे लघ्वी कापि शङ्का उद्भूत, देवस्याविनाभूता देवी कथमेकाकिनी विहारभुवमतरतीति।

नन्दी— नीचैर्भण, नीचैर्भण।

भृङ्गिरिटिः— भगवन्, तत्किमिदं कालुष्यनिदानं देव्याः।

नन्दी— किं नावगतो भवताऽद्य विजयाया वृत्तान्तः।

भृङ्गिरिटिः— आम्, किमप्यसमग्रमवगतम्। सा शप्तेति श्रूयते। कथं वराकी देव्यामपराद्धा।

नन्दी— न सा देव्या शप्ता।

भृङ्गिरिटिः— किन्तु .... ....

नन्दी— ... देवेन। श्रूयतां शुद्धान्तरहस्यम्।

> देव्या सखीप्रणयतोऽनुमतप्रवेशा
> तस्थौ कवाटविवरार्पितवामकर्णा।

(नेपथ्ये कलकलः)

नन्दी— किमिदम्।

भृङ्गिरिटिः—कथयतु भगवान्। ततस्ततः।

नन्दी— प्राकल्पचित्रचरितश्रवणाद्भुतेन
हन्तेत्युदीर्य विजया विदिता बभूव॥ १०॥

अस्यां महत्सभायामशास्त्रीयार्थनिर्धारणदोषाद्वनौ कस्यचिद्धनस्य भवानात्मजो भवन्ननाश्यानि दारिद्र्यादिप्रभवानि दुःखान्यनुभवत्विति सुरगुरुं प्रति शापं दत्त्वा यथागतं गतवन्तः ।

अथ च—

वाचस्पतिर्विंतेजा भुवि प्रविष्टस्त्रिविष्टपाद्भ्रष्टः ।
1पतनं सुराधिपगुरोः प्रज्ञासिन्धोरपि क्षमं नो किम् ॥ ३६ ॥

2पतिरपि बृहतां महर्षिशापात् बत भुवि मन्त्रजितस्सुतो बभूव ।
व्यभिचरति सतां बहुश्रुतानां न फलमनुग्रहवन्द्धि निग्रहोऽपि ॥ ३७ ॥

---

शुक्ताविदं रजतमित्यत्र शुक्तिविशेष्यकं रजतत्वप्रकारकं भ्रमात्मकं विशिष्टवैशिष्ट्यावगाहिज्ञानं जायते । तस्यैवान्यथाख्यातिरिति संज्ञेति नैयायिकमतम् । तत्र शुक्त्यंशे प्रत्यक्षं, रजतांशे स्मरणात्मकं च भिन्नमेव ज्ञानं जायते, न तु विशेषणविशेष्यभावावगाहि विशिष्टज्ञानमिति मीमांसकैकदेशिगुरुमतं. तदङ्गीकारे, ख्यातिः विशिष्टज्ञानं. तदभावः इत्यर्थिका अख्यातिरेवाङ्गीकृता स्यात् । एवं, परं - प्रवर्तनाभिन्नं अपूर्वं तत्संज्ञं यागादिकर्मजन्यमदृष्टं च लिङादिवाच्यमङ्गीकृतं भवति । गुरुमते लिङ् लोट्तव्यदादीनां अपूर्वाख्यनियोगवाचकत्वाङ्गीकारात् । किं च स हि गुरुः मीमांसकः यागादिसत्कर्माणि भगवत्प्रीतिकराणीति न सहते - नानुमन्यते । तन्मते कर्मातिरिक्तस्याराध्यस्यानभ्युपगमात् । कर्मणामेव स्वातन्त्र्येण स्वजन्यापूर्वद्वारा स्वर्गादिफलप्रापकत्वाङ्गीकारात् । ईश्वराङ्गीकारेऽपि कर्मणां न तत्प्रीतिजनकत्वमङ्गीक्रियते । अन्यथा ईश्वरप्रीतेरेव स्वर्गादिसाधनत्वे अपूर्वकल्पनस्य वैयर्थ्यापानात् । कर्मणां स्वातन्त्र्यभङ्गप्रसङ्गाच्चेति ।

1 प्रज्ञासिन्धोरपि - ज्ञाननिधेरपि, सुरामधिकं पिबन्तीति सुराधिपाः अधिकमद्यपायिनः तेषां गुरोरुपदेष्टुः, पतनं - पातित्यं, नो क्षमं किं ? क्षममेवेत्यर्थः ।

2 बृहतां - तन्नामकानां वेदवचसां पतिः बृहस्पतिः । 'तद्बृहतोः करपत्योश्चोरदेवतयोस्सुट्तलोप'श्चेत्यनेन तकारलोपे सुडागमे च रूपम् । सतां अनुग्रहवन्निग्रहेऽपि फलं प्रति न व्यभिचरति । अनुग्रहस्येव निग्रहस्यापि अवश्यं फलाधायकत्वमस्त्येवेति भावः ।

[1]बृहस्पतौ हन्त शिशौ भुवंगते
दिवं गता तज्जननी तु तत्क्षणात्।
पिता च पश्चादुदितेऽद्भुते सुते
किमस्ति पित्रोः द्युगतौ विलम्बनम् ॥ ३८ ॥

अथासावनाथत्वादर्भकदशायामनुपरतक्षुत्पिपासः कथंचिद्गतासुः कालक्रमेण तत इतश्चरन्नाभीक्ष्णिकभिक्षणक्षणेषु प्रदर्शितानेकदशनः कदशनः भिक्षाभिरप्यपूर्णकुक्षिरविषह्यविषादमहोदधिमग्नमानसः सर्वस्मादप्युद्विग्नः भग्नमनोरथः कथमपि जिजीव: (सजीवः?) जीवः उदुवाह च काममपि कामपिधाननिदानभूतामतिकुत्सिताङ्गिङ्गालसमच्छायां जायाम्।

ततश्च—

[2]एकनन्दनजुषः पुरन्दरात् तद्गुरोरतिशयो ममोचितः।
अत्र नूनमिति दर्शयन्नभूद्ब्राह्मणः स बहुनन्दनश्रितः ॥ ३९ ॥

बहुशिशुभिरवस्त्रैः पीड्यमानामनन्यै-
र्विधृतशिथिलकंथां वीक्ष्य भार्यां क्षुदन्धाम्।
अगतिगहहघोरं सोऽधितिष्ठन् कुटीरं
क्षणमपि कृपणात्मा कल्पकल्पं निनाय ॥ ४० ॥

---

1 बृहस्पतौ शिशुरूपेण भूमाववतीर्णे सति तज्जननी तत्क्षणात् दिवं स्वर्गं गता। पश्चात् कतिपयदिवसानन्तरं पिता च दिवं गतः। अद्भुते - लोकोत्तरमहिमशालिनि सुते आविर्भूते सति पित्रोः द्युगतौ - दिवः - स्वर्गस्य पुण्यलोकस्य गतौ प्राप्तौ विलम्बनं - साधनान्तरापेक्षाप्रयुक्तः कालविलम्बः अस्ति किं? नास्त्येवेत्यर्थः। किं च अद्भुते - लोकविलक्षणदुरदृष्टशालिनि सुते उत्पन्ने सति तत्पोषकमातापितृनाशे तदीयदुर्भाग्यस्यैव कारणत्वेन तदरिक्तकारणापेक्षया विलम्बो नास्तीति च।

2 एकनन्दनं - एकं नन्दनाख्यमुद्यानं। बहुनन्दनैः - अनेकपुत्रैः श्रितः - आश्रितः।

विशिष्य प्रावृषि भिक्षाटनप्रत्यूहविधायिनीं विविधां व्यथामनुबभूव स निर्धनः ।

तथाहि—

1निरोदनस्यार्भकरोदनारवैः कुटीरदुर्भित्तिनिपातनिस्वनैः ।
क्षुधातुरस्त्रीपरुषाक्षरैरपि व्यथामधात्प्रावृषि दुर्वचामसौ ॥ ४१ ॥

किं च—

2विनिद्रं दारिद्र्यं धरणिविबुधे तत्र सुदृढं
निरूढं पश्यन्तो निरुपधिपदप्राप्तिमुदिताः ।
चिकित्सारम्भार्हद्रविणविरहादुज्झितभया-
स्सपत्नीकं भेजुस्सशिशुकममुं रोगनिकराः ॥ ४२ ॥

अत्रान्तरे विरचयन्मृगयाविहार-
माविष्टित. पृतनया तनयानुयातः ।
कश्चित्किल क्षितिपतिः क्षणविश्रमाय
ग्रामं जगाम तमुवास स यत्र निस्वः ॥ ४३ ॥

तत्र च— धरित्रीसुत्राम्णः पुत्रो मत्तो बाल्यकृतेन लौल्येन परितस्सञ्चरन् कांचिदनेकशिशुकां सरमां समालोक्य तस्याश्शिशुमेकमविवेकादपाकृतदयो व्यापादयामास । सा च तद्व्यापदनापादितकोपा सरमा नृपालबालं जङ्घयोर्भृशं दशति स्म । अथ तदपराधोपजनितक्रोधोद्भटा वसुधाधिनाथभटास्तामुपद्रवं नेतुमनुद्रवन्ति स्म ।

तत्र पार्थिवभटैरनुद्रुता
तद्गृहं सशिशुरानशे शुनी ।

---

1 निर्गतं ओदनं येभ्यस्ते अन्नहीना इत्यर्थः । ह्रस्वा कुटी कुटीरः अल्पगृहं । दुर्भित्तिः - शिथिलकुड्यम् ।

2 विगता निद्रा यस्मात्तत् अविरतमनुसृतमिति यावत् ।

1दुर्गतोऽतिशयितं विजनती
दुर्गतो वसति यत्र स द्विजः ॥ ४४ ॥

तदानीं महता प्रयत्नेन सम्पन्नमन्नं भुञ्जानस्य भूसुरस्तावन्मृत्युग्रस्तामिव त्रस्तां पुरस्तादुपस्थितां शुनीं निर्वर्ण्य निरस्तान्नपानस्तनयांश्चुक्रोध जगाद चैवम् ॥

2अत्ययशनीयादोदनमुत्कासरमांसमालोक्य ।
न पुनरशितुं प्रजा नामुत् का सरमां समालोक्य ॥ ४५ ॥

तस्मादस्माद्गृहादेनां शुनीं निष्कारुण्या भवन्तो निष्कासयन्त्विति । तत्पुत्राश्चेमां पित्राज्ञां शिरसा गृहीत्वा तथैव कृत्वा झटिति कवाटं घटयामासुः । युक्तं चैतद्दारिद्र्यजन्मभूमेस्तस्य । तथा हि—

3उज्झामास द्विजो निस्वः सरमां शरणागताम् ।
कर्म युक्तमभाग्यानां दुर्गतिप्रदमीदृशम् ॥ ४६ ॥

---

1 दुर्गतः - दुर्गस्थानात् । अतिशयितं - उत्कृष्टं । दुर्गतो दरिद्रः ।

2 उत् - अधिकं, कासरस्य - महिषस्य, मांसं - पललमालोक्याशीयादपि । तदपि सम्भावितमित्यर्थः । सरमां शुनीं समालोक्य का प्रजा को वा जनः, अशितुं, नास्ति मुत् यस्यास्सा अमुत् सन्तोषहीना, तादृशी नेति न । अपि तु सर्वाऽपि प्रजा अमुदेवेत्यर्थः । नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात् ।

3 निस्वः - दरिद्रः, द्विजः शरणार्थं रक्षणार्थमागतां सरमां शुनीं उज्झामास - तत्याज । निस्वः स द्विजः शरणं गृहं आगतां - प्राप्तां, रमां - श्रियं, तत्याजेति च । अभाग्यानां - तादृशादृष्टहीनानां दुर्गतिः - नरकप्राप्तिः दारिद्र्यं च, तत्प्रदं, ईदृशं - शरणागतनिराकरणं, स्वयं गृहप्राप्तश्रीनिरसनं च कर्म, युक्तं - अर्हम् ।

# उद्यानपत्रिका ॥

'अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु २९] कलि ५०५७ दुर्मुख · कर्कट साधारण [सं ११


## मुकुन्दमाला ॥

—0❀0—

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ १४ ॥

स्वयम्प्रयोजनतया भगवति भक्तिः प्रथमदशके प्रार्थिता। अथ यमयातनाभीतानां भगवान् अभयप्रद इति एकादशे श्लोके उक्तम् । यमयातनेति सांसारिकसकलदुःखोपलक्षणम् । दयालुरस्मत्स्वामी । सः अस्मदीयं सर्वं दुःखमपनेष्यतीति भावः। एवमस्मत्परिपालने स शक्त इति; तथा प्रमाणसिद्ध इति च द्वादशे प्रत्यपादि। अथ तूष्णीं स्थितान् अस्मान् स न पालयिष्यति। तस्मिन् भक्तिः कर्तव्या। तया प्रीतः सः अस्मदपेक्षितं पूरयिष्यतीति त्रयोदशे अभिहितम् । एवमस्मिन् द्वितीय-दशके उपायभूता भक्तिः प्रतिपाद्यत इति ज्ञेयम् ।

भक्तिर्नाम प्रीतिपूर्वकनिरन्तरध्यानम। न चैतदस्माकं सुकरम्। मनसः स्वतन्त्रत्वात् । अस्मद्वशवर्तित्वाभावात् । प्रबलदुष्कृतवशेन स्वभावतः क्षुद्रविषयैकसङ्गित्वात्। एवं सङ्कटायां स्थितौ, पुनः कुलशेखरः कर्तव्यं चिन्तयामास। शास्त्राणि पर्यालोचयामास। मनसो वशीकरणोपायः भगव-च्छरणागतिरेवेति निरचिनोत् । स्वमनसे इदं ज्ञापयामास। ततः तत् शरणमुपगम्य भगवन्तं प्रार्थयते – तृष्णातोय इति।

हे त्रिधामन्। परमं पदं, सवितृमण्डलं, सतां हृदयम्, इति त्रीणि धामानि स्थानानि यस्य तथाभूत । आदित्यः, चन्द्रमाः, अग्निः इतीमानि

त्रीणि धामानि तेजांसि यदीयानि तथाभूतेति वा । वरद । प्रार्थितमर्थं ददातीति तथाभूत हे भगवन्।

नः। शरणागतस्य मम मदीयानां च।

भक्तिनावं प्रयच्छ। अस्मदभीप्सितसिद्धिहेतुभूतां भक्तिं देहि। तद्विरोधिदुष्कृतविध्वंसनेन तां उत्पादय। सैव अस्माकं सम्प्रति अपेक्षिता नौः। भवन्तमेव नावमाचक्षते— 'विष्णुपोतो नराणाम्' इति। अथापि भक्त्या प्रसादितस्यैव भवतः उपायत्वात् निरूपणे क्रियमाणे भक्तिरप्युपायो भवति। तस्मात् साऽपि नौः। तां प्रयच्छ। वरदो हि त्वम्।

भवतः पादाम्भोजे। सत्यज्ञानानन्तं भवत्स्वरूपं अस्माकं दुरवगाहम्। अम्भोजवत् सुन्दरं भोग्यं च दिव्यं ते पादं, ततः क्रमेण सर्वाश्चर्यमयं कृत्स्नं दिव्यमङ्गलविग्रहं च आन्तरे चक्षुषि आविर्भाव्य तत्र अस्मदीयं मनः सक्तं कृत्वा त्वयि भक्तिमुत्पाद्य अभिवर्धय।

अगाधत्वात् अपारत्वाच्च तृष्णा तोयम्। दुर्निवारत्वात् तीव्रवेगत्वाच्च मदनः पवनः। तेन उद्धूताः उत्थापिताः उत्क्षिप्ताः मोहोर्मिमालाः यत्र। जुगुप्सनीयेषु वस्तुषु भोग्यत्वबुद्धिः मोहः। तदधीनाः तत्तद्वस्तुभोगाय उत्कटप्रवृत्तिजनकाः तीव्रा अभिलाषा इह मोहशब्देन विवक्षिताः। इमे अभिलाषा यस्मात् पुरुषं इतस्ततः भ्रमयन्ति, परितः प्रेरयन्ति, काष्ठमिव ऊर्मयः, तस्मादिमे ऊर्मयः।

दारा आवर्तः। पुरुषस्य स्वातन्त्र्यापायेन अत्यन्तपारवश्या-पादकत्वात्। तनयाः सहजाश्च ग्राहाः नक्राः। तद्गतस्नेहातिशयेन आकृष्टो हि पुरुषः स्वहितं किमपि कर्तुमलब्धावसरो नश्यति।

एवम्भूते संसाराख्ये महति भवदनुग्रहं विना दुस्तरे जलधौ मज्जतां नः तत्सन्तरणोपायभूतां भवत्पादाम्भोजभक्तिनावं अस्मदनुष्ठितप्रपत्ति-प्रसन्नस्त्वं अस्मदीयसकलदुष्कृतपरिहरणेन प्रयच्छ।

---

# विमर्शगोष्ठी॥

—:o:—

(3)

केशवः – सुहृदः, मन्ये अतीते सम्मेलने यत् नारायण आह तत् प्रति यथोचितं समग्रां पर्यालोचनां भवन्तः कृतवन्तो भवन्तीति। तथा चेत्

स्वस्वाभिप्रायं प्रकाश्य अद्य तस्मिन् विषये कमपि निश्चयं कर्तुमर्हामः।

स हि पृच्छति अस्माभिरत्र क्रियमाणानां विमर्शानां निर्णयानां वा लोकोपयोगः क इति। यच्च स वदति येन केनापि प्रकारेण लोकोपयोगविरहे यत् किमपि क्रियमाणं निष्फलम्, लोकस्य आदरस्तत्र न भविष्यतीति तत् तथ्यमेव।

तदिह अस्माभिरत्यन्तमवधाय समालोचनं कार्यम्।

नारायणः— सम्यगाह केशवः। अयं मे साक्षादभिसन्धिः। शान्तेन अवहितेन मनसा विचिन्त्य निरूपणं कुर्वन्तु सुहृदः।

माधवः— अद्य नारायणहृदयस्थं स्फुटमवगतं भवति।

सत्यं यथा यथा निरूप्यते तथा तथा अस्मदीया प्रवृत्तिः सर्वा मनागपि लोकोपयोगिनी न भवतीत्येव वक्तव्यं भवति।

बाल्यात्प्रभृति संस्कृतं शिक्षितवन्तः स्मः। ततः तर्कं, व्याकरणं, मीमांसां, साहित्यं, वेदान्तं वा अधीतवन्तः स्मः। एवं परिश्रम्य अधिगतायाः संस्कृतविद्यायाः कः पश्चादुपयोगः?

गोविन्दः— 'अस्मद्गोष्ठयां क्रियमाणानां विमर्शानां निर्णयानां च वैफल्यं नारायणः शङ्कते। माधवः पुनः अस्मदधीतायाः संस्कृतविद्याया विफलतां वदति। का सङ्गतिः?

विष्णुः— समग्रा सङ्गतिरत्र अस्ति। यां विद्यां वयमधीतवन्तः तदनुबन्धिन एव विषयानादाय विमर्शं कुर्मः। वेदापौरुषेयत्वं, न्यायवैशेषिकयोः सम्प्रतिपन्नविप्रतिपन्नांशाः, मुनीनामुत्तरोत्तरं प्रामाण्यं, रसविषये मतभेदाः, जीवब्रह्मणोः सम्बन्धः, इत्येते एतादृशा अन्ये च विषयाः अस्माभिः विमृश्यन्ते। तेन एकवैफल्ये उच्यमाने अपरवैफल्यं स्वयमापतति। का असङ्गतिः?

माधवः— हन्त, विष्णुना रक्षितोऽस्मि। (सर्वे हसन्ति)।

विष्णुः— माधवोऽपि विष्णुरेव। सर्वे वयं विष्णवः। आत्मना आत्मा रक्षितो भवति।

माधवः— सत्यमेतत्। गाढसौहार्दाः पावनतमभगवन्नामभृतश्च वयं सर्वे अभिन्ना एव। अथापि साक्षाद् विष्णुमूर्तिरत्रभवान्।

मधुसूदनः— सुहृदः, प्रस्तुतः प्रश्नः नूनमुत्तरोत्तरं गहनो भवति। किं नैष्फल्यमेव सिद्धान्तो भवेदिति भीतिर्मां बाधते।

गोविन्दः— का नु भो भीतिः। यत् तत्त्वं, तत् अस्माभिरुपलब्धव्यम्। तदनुरोधेन कर्तव्यं अकर्तव्यं वा निश्चेतव्यम्। रागद्वेषौ दूरे कृत्वा तत्त्वविचारः क्रियताम्।

मधुसूदनः— श्लाघ्या अत्रभवतो धीरता। इदं श्रोतव्यं यदहं वक्ष्यामि।

समुचितस्य आदरस्य विरहात् जीवनसौकर्यविनाशात् क्रमेण श्रद्धाया ह्रासात् कारणान्तरेभ्यश्च अग्रहारेषु स्थितः विद्यासम्प्रदायक्रमः लुप्त आसीत्।

तत्र तत्र कैश्चिद्धार्मिकैः स्थापितासु संस्कृतकलाशालासु निवास-भोजनादिसंविधानवतीषु केचित् विद्यार्थिनः शास्त्राणि अधीयानाः संस्कृतविद्याया जीवितं रक्षन्त आसन्।

आङ्गलकलाशालासु संस्कृतस्यापि स्थानं कल्पितमवर्तत। संस्कृत-कलाशालासु अधीत्य उत्तीर्णाः पण्डिताः आङ्गलकलाशालासु संस्कृत-पण्डितस्थानं लब्ध्वा उपाध्याया अभवन्। संस्कृताध्यायिनां अय-मेकः जीवनोपायोऽभवत्। अद्य तु आङ्गलकलाशालासु संस्कृतस्य स्थानलोपात् तत्र संस्कृतपण्डितानां अपेक्षा नास्ति। एवं स्थितस्य एकस्य जीवनोपायस्य निरुद्धत्वात्, संस्कृताध्ययने केऽपि बाला न प्रवर्तन्ते। तेन संस्कृतकलाशालाः प्रायः सर्वाः विद्यार्थिदुर्भिक्षपीडिताः विनष्टाः विनश्यदवस्थाः विनङ्क्ष्यदवस्थाश्च दृश्यन्ते।

एवं संस्कृतविद्यायाः यः अल्प उपयोगः स्थितः सोऽपि नष्टः। एवं सति बहु परिश्रम्य अस्माभिः सम्पादितस्य शास्त्रपाण्डित्यस्य भाषणकौशलस्य अन्यस्य वा किं फलमस्ति ?

त्रिविक्रमः— ये संस्कृतपण्डिता आसन् ते तत्स्थानापायात् देशभाषां वा हिन्दीं वा अभ्यस्य, तदुपाध्याया भूत्वा जीवनं कुर्वन्ति, अभ्यस्तपूर्वं संस्कृतमुपेक्षमाणाः। अस्यां स्थितौ संस्कृतविद्यायाः नैष्फल्यं विना किमन्यत् प्रतिपत्तुं शक्यम् ?

केशवः— कथं सर्वे निष्फलत्वपक्षमेव द्रढयन्ति। इदं भवन्त आलोचयि-तुमर्हन्ति। कति पण्डिताः तत्र तत्र भगवत्कथाप्रवचनेन जनानां आनन्दातिशयं भक्तिं धर्मपरत्वं च उत्पादयन्तो वर्तन्ते। जनाश्च तान् बहुलमाद्रियन्ते। महान् किलायं संस्कृतविद्याया उपयोगः। अन-धीतसंस्कृतानां दुष्करं प्रवचनम्। कथञ्चित् क्रियमाणमपि न रसाय कल्पते।

नारायणः-- सम्यगेतत् यत् केशव आह । तदुक्तरीत्या बहवः पण्डिताः जनानामुपकुर्वन्ति । ततो जीवनलाभेन आत्मनश्च । एवं तु नेदं संस्कृतविद्यायाः फलत्वेन व्यपदेशार्हम् । न हि कथको भविष्यामीति कश्चन विद्यार्थी संस्कृतकलाशालायामध्येतुं प्रवर्तते । न च पण्डिताः सर्वे सर्वजनरञ्जकं प्रवचनं कर्तुं पारयन्ति । येषां प्रायः शास्त्रेषु कुण्ठिता मतिर्भवति, अदृष्टाधीनं भाषणचातुर्यं च वर्तते, ते प्रवचने प्रथां लभन्ते । अपण्डिता अप्यत्र प्रकाशन्ते, पण्डिता अपि न प्रकाशन्ते । तस्मात् केवलमदृष्टाधीनं यादृच्छिकमेतत् यत् कथाप्रवचनेन यशो वा पर्याप्तं जीवनं वा लभ्यत इति । इदमादाय विद्यासाफल्यं दुर्वचम् ।

वामनः— सुहृदः, मधुसूदनोक्तरीत्या विषयः क्रमेण गहन एव सम्पद्यते । अनादिकालप्रवृत्तायाः अस्मद्विद्यायाः कथमपि नैष्फल्यं नाभ्युपगन्तुं शक्यम् । इदं फलमिति तु सम्प्रति न प्रतिभाति । अद्य कालोऽतिक्रान्तः । पुनः सावकाशं सावधानं चिन्तयेम, समालोचयेम, विमृशेम । आगामिनि सम्मेलने कमपि निर्णयं कर्तुं नूनं पारयेम ।

---

# कीटोपाख्यानम् ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

——:o:——

एतदनुशासनपर्वान्तर्गतदानधर्मपर्वणि त्रिभिरध्यायैः कथ्यते ।

युधिष्ठिर उवाच –

'पितामह, महामृधे मरणमनिच्छन्तस्तदिच्छन्तश्च ये पुरुषा अहन्यन्त ते कां योनिं प्रत्यपद्यन्त । तन्मे ब्रूहि । महासमरे प्राणपरित्यागः पुरुषाणां दुःखावहः । धर्मज्ञ, अहं प्राणत्यागं सुदुष्करं प्रजानामि । सधने वा निर्धने वा सुखेन सहिते वा तद्रहिते वाऽस्मिन् संसारे सदा जाताः प्राणिनः कथं तत्राभिरमन्ते ? तत्र कारणमाख्याहि । त्वं सर्वज्ञो मे मतोऽसि ।' इति ।

भीष्म एवमुवाच —

"पृथिवीपते, तथाविधेऽस्मिन् संसारे जाताः सर्वेऽपि प्राणिनो येन भावेन तत्र रतास्तत्र हेतुं मत्तः शृणु। युधिष्ठिर, त्वया कृतोऽयं प्रश्नस्समीचीनोऽस्ति। नृप, अत्र ते द्वैपायनस्य कीटस्य च संवादरूपमिदं पुरावृत्तमुदाहरिष्यामि। "पुरा ब्रह्मनिष्ठो विप्रः कृष्णद्वैपायनस्सञ्चरन् सन् शकटवर्त्मनि शीघ्रं धावन्तं कीटं ददर्श। सर्वभूतानां गतिं रुतञ्च विदन् स सर्वज्ञस्त्वरितं कीटं वीक्ष्य, 'कीट, त्वं भीतवद्भासि, त्वरितश्चैव लक्ष्यसे। तव क्व वासः? कुतो भयमागतम्? तदाचक्ष्व' इत्यपृच्छत्। कीटः— 'महाबुद्धे, महतश्शकटव्रजस्य घोषस्याकर्णनेन मम भयमागतम्। दारुण एष स्वनः श्रूयते हि। स मां हन्यादित्यस्मादपक्रामामि। प्रभो, सुमहाभारं वहतां प्रतुद्यमानानां श्वसतां च वृषभाणां शब्दं समीपे निशमयामि। तान् संवाहयतां नृणां विविधा नादा आकर्ण्यन्ते। कीटयोनिनाऽस्मद्विधेनैष वोढुं न शक्यः। तस्मादस्माद्घोरात्साध्वसादपैमि। भूतानां मृत्युर्दुःखावहः जीवितं सुदुर्लभं च। अतो भीतो यथाऽऽपदं न व्रजेयं तथा पलाये' इत्यभणत्। इत्युक्तस्स व्यासस्तं कीटमवलोक्य 'कीट, तव सुखं कुतः? ते मरणं सुखं मन्ये यस्मात्त्वं तिर्यग्योनौ वर्तसे। त्व शब्दस्पर्शरसगन्धानुच्चावचान् बहून् भोगांश्च न जानीषे। ततो मरणमेव ते श्रेयः' इत्यवदत्। कीटः— 'महाप्राज्ञ, सर्वेषु देहेष्वपि जीवो नितरां रतः। अस्मिन् देहेऽपि मम विद्यमानं सुखं वेद्मि। तस्माज्जीवितुमिच्छामि। अस्मिन्जन्मन्यपि देहानुगुण्येन सुखहेतवः शब्दादिविषयाः प्रावर्त्यन्त। मनुष्याणां तिरश्चाञ्च शब्दादिविषयानुभवो मिथो विलक्षणः। प्रभो, अहं मनुष्यजातौ बहुधनश्शूद्रो भूत्वा ब्राह्मणविरोधी नृशंसः कदर्यो वृद्धिजीवनः श्लक्ष्णवागशिक्षितमतिस्सर्वकार्यद्वेषी गुप्तनिधिः परस्वहरणे रतो भोजनवेलायां स्वाद्वन्नकामो मात्सर्याद्भृत्यातिथिजनान्वर्जयित्वा तदन्नं भुञ्जानो देवार्थं पित्रर्थं च श्रद्धया कस्यापि कर्मणोऽकर्ताऽन्नकामेष्वन्नस्यादाता येनकेनापि दत्तस्यान्नस्यापहर्ता निशायां भयेषु गुप्तमस्मद्गृहमाश्रित्य शरणागतानभयमदत्त्वाऽकस्मात्परित्यजन् मनुष्याणां धनं धान्यं प्रियान् दारान् यानमद्भुतं वासः श्रियं च दृष्ट्वा निरर्थकमसूयन् परसुखमवलोक्येर्ष्यन् अन्यस्यानैश्वर्यं वाञ्छन्नन्येषां त्रिवर्गं हत्वा स्वसुखमभिलष्यन्

नृशंसगुणाविष्कारककर्मकारी चासं । तत्स्मृत्वा प्रियमात्मजं हित्वैवानुतप्ये । कृतानां शुभानां कर्मणां फलं नावगच्छामि । मया वृद्धा माता कश्चिद्ब्राह्मणश्चापूज्येताम् । भगवन्, कुलीनो गुणवानतिथिर्यदृच्छया निकेतनमागतस्सन् सकृदार्च्यत च । तेन प्राचीनजन्मस्मृतिर्मां न जहाति । कृतैस्सत्कर्मभिस्सुखाशावानस्मि । तपोधन, त्वत्तस्तादृक्कर्मफलमहं श्रोतुमिच्छामि ।' इति व्याहरत् । व्यासः— 'कीट, त्वं तिर्यक्त्वेऽपि शुभेन कर्मणाऽनपगतपूर्वजन्मज्ञानो वर्तसे । तव पूर्वजन्मज्ञानानपगमो मत्कर्माधीनः । अहं तपोबलात् दर्शनादेव त्वां तारयामि । तपोबलादन्यद्बलवद्बलं न विद्यते । स्वगतैः पापैस्त्वां कीटतां गतं बुद्ध्ये । मनुष्यजन्मनि प्रकृष्टधर्मफलमवाप्स्यसि यदि मन्यसे । कर्मभूमिकृतकर्मफलमेव देवास्तिर्यञ्चश्च भुञ्जते । मनुष्येष्वपि काङ्क्षितफलभाजो गुणवन्तः प्रशस्तवाग्बुद्धिपाणिपादा धन्याश्च विपश्चितस्सन्ति । अर्थस्य कृते जीवतो मन्दबुद्धेर्मनुष्यस्य किमायाति । देवताविप्राग्निशशिसूर्यान् पूजयन् पुण्यां कथां कथयन्मनुष्यो भविष्यसि । तत्र जन्मनि भूतानि तव विषयान्युपभोक्ष्यसे । अहं ते क्रमाद्ब्राह्मण्यं दास्यामि यदीच्छसि ।' इत्युदैरयत् ।

स कीटस्तथेति प्रतिश्रुत्यातिष्ठत् । श्वाविद्गोधावराहमृगपक्षिश्वपाकशूद्रवैश्यक्षत्रिययोनिषु जनित्वा तासु सर्वास्वपि योनिषु तमृषिमीक्षितुमगच्छच्च । सत्यवादिना तेन ऋषिणैवमाख्यातं स्मृत्वा मूर्ध्नि कृताञ्जलिस्सन् तस्य पादौ जग्राह । तदा तमृषिमालोक्य 'अहं पूर्वं कीटो भूत्वाऽद्य राजपुत्रोऽभवम् । एषा ममेप्सिताऽसदृशी स्थितिः । इयं मया दशभिर्वारैरलभ्यत । अतिबला हेममालिनः कुञ्जरा उष्ट्राश्वतरयुक्तानि यानानि च मां वहन्ति । स्यन्दनेषु काम्भोजदेश्यास्समीकवाजिनोऽयुज्यन्त । सबान्धवामात्यः पिशितमश्नामि । महाभाग, स्वर्गसदृशेषु भवनेषु महामूल्येषु सुखशयनेषु सुपूजितस्सन् स्वपिमि । सर्वेष्वपररात्रेषु सूतमागधवन्दिनः प्रियवचनैर्मां देवा महेन्द्रमिव स्तुवन्ति । जुगुप्सितां कीटतामास्थितवतोऽपि मम पूर्वजन्मस्मृतिरमिततेजसस्सत्यसन्धस्य भवतः प्रसादादेवाजनिष्ट । यत्पापं पुरा मयोपचितं तस्य किं नाशोऽस्ति ।' इत्यन्वयुङ्क्त ।

व्यासः— 'त्वयाऽर्थप्रधानेन नृशंसेनाततायिना शूद्रेण स्थितवता तदा ममैतद्दर्शनं प्राप्यत । तत्पूर्वकृतसुकृतफलम् । त्वया तिर्यग्योनौ जाते-

नापि ममाभ्यर्चनादपि तव सुकृतमजनि। त्वं गोब्राह्मणकृते रणाजिरे स्वकीयान् प्राणान् हित्वाऽस्माद्राजपुत्रत्वाद्ब्राह्मण्यं समासादयिष्यसि।' इत्यभ्यधत्त। स राजपुत्रस्सुखं प्राप्य प्रचुरदक्षिणान् यागानकरोत्। अथ स्वर्गे चिरं सुखमनुभूयादीप्यत। तिर्यङ् शूद्रतां, शूद्रो वैश्यत्वं, वैश्यः क्षत्रियत्वं, श्लाघ्यवृत्तः क्षत्रियो ब्राह्मणत्वं साधुवृत्तो ब्राह्मणः पुण्यात्स्वर्गं चाभ्युपैति। राजन्, कीटतामुत्सृज्य क्षत्रधर्ममनुप्राप्तस्स वीरः पूर्वजननं स्मरन्नेव विपुलं तपश्चचार। तदा द्विजश्रेष्ठः कृष्णद्वैपायनो धर्मार्थौ विदुषस्तस्य तत्तपो विलोक्याजगाम। ततस्सः 'कीट, क्षत्रियधर्मं देवधर्मं ध्यायन् क्षत्रियधर्मेणैव भूतानि शाधि। तेन विप्रत्वमेष्यसि। परिशुद्धमना गुणदोषविद्गुणिभ्योऽपेक्षितं वितीर्य तत्तदपराधान्परिहृत्य सर्वाः प्रजास्सम्यक्पाहि। शान्तः स्वधर्माचरणे प्रवणः सुप्रीतश्च भव। तेन क्षात्रीं तनुं त्यक्त्वा ब्राह्मण्यं लप्स्यसे।' इत्यवोचत्। युधिष्ठिर, स नृपोऽपि तस्य महर्षेर्वचनमाकर्ण्यारण्यादेत्य पुनरपि प्रजा धर्मणारक्षत्। पार्थिवसत्तम, पूर्वं कीटस्स नृपः प्रजापालनधर्मेणाचिरेणैव कालेन प्रेत्य विप्रत्वमभजत। ततो महायशा महाप्राज्ञः कृष्णद्वैपायनः पुनरपि तं ब्राह्मणमवलोकितुमागत्य 'भो, भो, ब्रह्मर्षभ, श्रीमन्, कथञ्चन मा व्यथिष्ठाः। धर्मज्ञ, तस्य तस्य धर्माचारयोरानुगुण्येन पुण्यकृच्छुभयोनिषु पापकृदधमयोनिषु च जायते। कीट, तस्मान्मृत्युभयात्कथञ्चन मा व्यथिष्ठाः। धर्मात्परं नास्ति। तस्मादुत्तम धर्ममनुतिष्ठ।' इत्यभाषत।

कीटः— भगवन्, भवत उपकारादहं सुखादुत्कृष्टं सुखमलभे। धर्मेण पुण्यमासेदुषो ममाद्य पाप्मा नष्टः।' इत्यगदत्। भूपाल, स भगवतो व्यासस्य व्याहाराद्दुर्लभं ब्राह्मण्यमविन्दत। क्षत्रियत्वदशायां पृथिवीं यज्ञयूपशताङ्कितामकलयत्। तदनु ब्रह्मवित्तमो भूत्वा ब्रह्मणस्सालोक्यमियाय। पार्थ, अथ व्यासस्य वचसा कीटः पापहरं स्वकर्मफलनिर्वृत्तं सनातनं ब्रह्म ययौ। पुत्रक, पुण्ये कुरुक्षेत्रे युद्धहतास्ते क्षत्रियपुङ्गवाः पुण्यां गतिमासीदन्। तस्मात्त्वं मा शोच।" इति।

---

# वृद्धभाषितम् ॥ (20)

—o—

आचार्यः — रामकृष्णौ, मन्ये सम्प्रति भवदीयाः सर्वे संशयाः परिहृता भवन्ति ।

रामकृष्णौ — आम् । परिहृतप्रायाः ।

आचार्यः — परिहृतप्रायाः, न तु परिहृताः ?

रामकृष्णौ — न, भगवन् । अतिललितया अतिस्पष्टया अतिहृदयङ्गमया रीत्या भगवता विषया उपदिष्टाः । आवाभ्यां अवहिताभ्यां श्रुताश्च । परं तु विज्ञापितपूर्वमेतत् यत् चिरप्ररूढवासनान्तरदूषितमनस्कत्वादावयोः ते मन्दं मन्दं बुद्धौ लगन्ति । पुनः पुनर्मननं कृत्वा दृढप्रतिष्ठाः कार्याः । अद्य ते विद्युद्वत् स्फुरितविनष्टा वर्तन्ते ।

आचार्यः — अस्मद्देशे उत्तमोत्तमवैदिककुलेषु जातानां युष्मादृशानामपि इयं स्थितिरिति पश्यतो मे हृदयं नूनमतिमात्रं तप्यते । अथापि इदमिदानीं हर्षाय कल्पते यद् युवयोर्द्वयोः कथमपि एषां विषयाणां तत्त्वावगमे इयती श्रद्धा भवति ।

व्यवस्थितो वेषः, नियता आचाराः, वेदाध्ययनं, औपासनवैश्वदेवाद्यनुष्ठानं, भगवदाराधनं, शुद्धान्नस्वीकरणं, जपोपवासादि, इत्येतत् सर्वं महद्भिः अत्यन्तं आदरेण यत् परिपाल्यते, तत् किं मूढश्रद्धया, अथ वा लोकवञ्चनया आत्मोत्कर्षसम्पादनाय ? अतिक्लेशसाध्यं हि सर्वमेतत् । तावन्तं क्लेशं सोढ्वाऽपि किमिति तत् सर्वं ते अस्खलितमनुतिष्ठन्ति, स्वगतं फलं किमपि नोद्दिशन्ति ?

माधवाचार्यः — केवलं भगवत्प्रीत्यर्थतया कुर्वन्ति ।

आचार्यः — सत्यमेवम् । परन्तु कुतो भगवान् सज्जनानां इयता क्लेशेन आत्मनः प्रीतिमिच्छतीति पर्यालोचनीयम् । अत्र यो भगवतो भावः स स्वयं तेन विवृतो गीतायाम् —

देवान् भावयताऽनेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥

इत्यनेन श्लोकेन । शास्त्रविहितं यद्यदस्माभिः क्रियते, स सर्वो यज्ञः । स एव धर्मः । अस्माभिः सम्यगनुष्ठितेन अनेन इन्द्रादयः प्रीयन्ते । प्रीताः काले यावदपेक्षं वृष्टिमुत्पाद्य अन्यच्च हितं कृत्वा

अस्मान् सुखयन्ति। एवं महतां धर्मपरिपालनं केवलं लोकक्षेमायेति तस्य गौरवं न वाचां विषयः। प्रमाणभूतानि शास्त्राणि एवमुपदिशन्ति। प्रत्यक्षदृष्टं चैतत्— यदा यत्र धर्मो वर्धते तदा तत्र जनानां विपदो न भवन्ति, सम्पदश्च समृध्यन्ते; विपरीते विपरीतमिति। तस्मादत्र अविश्वासो न युक्तः।

रामः— अहं, अन्ये च मादृशाः, अनधीतवेदाः, अनाचाराः, अननुष्ठितशास्त्रविहितकर्माणः। यदेवं वयं भवामः तदेव कारणं सम्प्रति जनैरनुभूयमानानां नानाविधानां सङ्कटानां, इति पर्यवसानं भवति।

आचार्यः— आम्, तात, तथा वक्तव्यं भवति।

कृष्णः— वधाः, अनृतवादाः, स्तेयानि चेति एवंविधा अधर्माः परितो भूयिष्ठं दृश्यन्ते। तेन कारणेन नानाविधा विपदो जनानां जायन्ते इत्यपि वक्तुं शक्यम्।

आचार्यः— तदपि सत्यम्। अधर्मो द्विविधः— कृत्यानामकरणरूपः अकृत्यानां करणरूपश्चेति। तत्र आद्यः केषुचिद्वर्तेत, अन्त्य अपरेषु। उभयमप्यन्येषु। सर्वे इमे लोकानर्थहेतव एव।

कृष्णः— वेदाभ्यसनं, औपासनं, पञ्चमहायज्ञानुष्ठानं, भगवदाराधनं इति सर्वमिदं शास्त्रविहितं धर्मशब्दाभिधेयं लोकक्षेमसाधनतया उत्तमं कर्म भवतु। श्रद्धयाऽवश्यमनुष्ठेयं भवतु। शिखा, कच्छः, तिलकः, उपवीतं इत्येषां धारणे को निर्बन्धः? तदभावे का हानिः?

आचार्यः— सर्वत्र नः शास्त्रं प्रमाणम्। शास्त्रं कर्तव्यतया यद्विधत्ते तत्र दृष्टं प्रयोजनमस्ति चेत् तदर्थं तद्विहितमिति मन्तव्यम्। यत्र तु दृष्टं प्रयोजनं नास्ति तत्र अदृष्टं किञ्चिदस्तीति प्रतिपत्तव्यम्। शिखाकच्छतिलकोपवीतानि धार्याणीति शास्त्राणि विदधति। तेन एषां धारणे किञ्चित् प्रयोजनमस्तीति ज्ञायते। किं तत् प्रयोजनमिति नूनं जिज्ञासा भवेत्। तत्र यत् शास्त्रान्तराविरोधि, यत् उपपन्नं, तत् कल्पनीयम्। स्नातव्यमिति विधिरस्ति। स्नानस्य मलापकर्षणं दृष्टं प्रयोजनमस्त्येव। अथापि तीर्थे गङ्गामावाह्य अर्घ्यं दत्वा मन्त्रान् जप्त्वा स्नातव्यमिति यद् विधीयते तस्य दृष्टप्रयोजनमात्रेण प्रयोजनाकांक्षा न शाम्यति। गङ्गाऽऽवाहनादिकं विनाऽपि किल कृतेनस्नानेन मलापनयनं भवति। अतः तदतिरिक्ता अदृष्टरूपा काचन शुद्धिर्भवति तदर्थं गङ्गाऽऽवाहनादिपूर्वकं स्नानं कर्तव्यमिति विधि-

तात्पर्यं कल्पनीयम् । एवंविधशास्त्रीयसाङ्गस्नानजन्या या अदृष्ट-रूपा शुद्धिः, सा कुत्रोपयुज्यते, तस्याः किं फलमिति विमर्शे उपरि कर्तव्येषु सन्ध्यावन्दनभगवदाराधनादिषु कर्मसु तस्या उपयोगः, तां शुद्धिं विनाऽनुष्ठीयमानानि इमानि कर्माणि विफलानि स्युरिति प्रमाण-न्यायाभ्यामवधारयन्ति । स एव पन्थाः प्रकृतेऽप्यनुसर्तव्यः । शिखादीनां शास्त्रविहितत्वात्, तेषां धारणेन काचन योग्यता पुरुषस्य भवति । तया योग्यतया विशिष्टेन पुंसा कृतानि कर्माण्येव स्वस्वफल-जननाय प्रभवन्तीति निश्चीयते । तस्मात् शास्त्रविहितत्वात् शिखा-दिधारणमपि अवश्यं कर्तव्यम् ।

माधवाचार्यः — शिखादीनां धार्यत्वे उपपत्तिः आचार्यपादैः सम्यक्प्रादर्शि । सा रामकृष्णाभ्यां सुगृहीतेति मन्ये । परं तु इयदुपपादनमपि वस्तुतः नावश्यकम् । सर्वेषु विषयेषु स्वकुलपरम्परया आगतो यः क्रमः तस्य परित्यागः क्रमान्तराश्रयणमित्येतत् बुद्धिमतां सर्वथाऽऽनुचितम् । मानवन्तो हि पुरुषाः स्वकुलगौरवं रक्षन्ति । केषाञ्चिदनुकारेण अद्य एकधा शिखाकरणम्, श्वः अन्यान् दृष्ट्वा अन्यथा, परश्वः पुनरपरथेति विपर्यासे हि केवलमल्पता प्रकाशिता भवति ।

कृष्णः— यदत्रभवन्तो भवन्ति तत् तथा । परं तु एषां विषये इयत् प्राधान्यं अस्मत्पूर्वपुरुषा अकुर्वन्निति अस्माकमविदितमासीत । दीर्घैः कृत्तैर्वा, पुरतः स्थितैः पश्चात् स्थितैर्वा केशैः को विशेषो भवति । वृथा निर्बन्धोऽत्र क्रियत इत्यभात् । तस्मात् पुनः पुनः चोद्यमकुर्म ।

रामः — मधूकतैलदीपाः पूर्वं गृहेषु अज्वलन् ततः चणकतैलदीपाः । ततो मृत्तैलदीपाः । अद्य पुनः विद्युद्दीपाः । एवमेव अन्येष्वपि वस्तुषु वेषेषु आचारेषु च महान् विपर्ययः । कालानुरोधेन अपरिहार्योऽयं भवति । कामं भवतु । का हानिरित्यमन्यामहि ।

माधवाचार्यः— सा मतिरिदानीं मन्ये अत्यन्तं नष्टा ।

रामः— कः संशयः ? विशदगम्भीरवाचां दयामूर्तीनां आचार्यशिखा-मणीनां प्रसादेन अज्ञानग्रन्थिरस्माकं निर्भिन्नः । यत्र शास्त्रं किञ्चिदाह तत्तथैवानुसर्तव्यम् । दृष्टप्रयोजनविरहेऽपि अदृष्टप्रयोजनवत्त्वात् तद्द्वारा लोकक्षेमपर्यवसायित्वाच्चेति बोधोऽस्माकमिदानीं अजनि । दीपादिषु पुनः शास्त्रकृता व्यवस्था नास्ति । तेन तेषु विपर्यासो न दोषाय ।

माधवाचार्यः— तत्रापि वैद्यशास्त्ररीत्या विमर्शः कार्य इति भाति । नेत्र-स्वास्थ्यस्य किं तैलदीपा अनुकूलाः ? किं नवीना विद्युद्दीपाः प्रतिकूला न भवन्तीति ।

कृष्णः— यद्यत् प्राचीनं तत्र सर्वत्र स्वामिनां पक्षपातः ।

माधवाचार्यः— इतरेषां द्वेषः । (सर्वे हसन्ति) ।

---

# प्रकृतिभेदः ॥

आगन्तुकः— (कवाटं मृदु ताडयन्) को नु भो गृहस्य अन्तः ?

गृही ज्यायान्— (कवाटमपावृत्य बहिरागत्य) स्वागतं स्वामिन् । कुतोऽत्रभवान् ? का अपेक्षा ?

आगन्तुकः— कार्यविशेषेण इदं पुरमागतोऽस्मि । न मे परिचिताः केचिदत्र सन्ति । भगवदाराधनस्य कृते स्थलमपेक्ष्यते । अत्र-भवान् अनुमन्यते चेत् अस्मिन् दिने अत्रोपित्वा श्वः प्रस्थाय गमिष्यामि ।

गृही— परमः सन्तोषः । भवादृशा अतिथयो दुर्लभाः । अस्ति सन्निहिता नदी । गत्वा स्नात्वा अनुष्ठानानि निर्वर्त्य आगन्तव्यम् । प्रतीक्षमाणो वर्तिष्ये ।

आगन्तुकः— धन्योऽस्मि । एको विषयः । अस्ति मे परान्न-(वर्जन)नियमः । स्वयं पक्त्वा भगवदाराधनं कर्तव्यम् ।

गृही— (क्रुद्धः उच्चैः) यातु भवान् अन्यत्र यत्र क्वापि । नास्मद्गृहे भवतः स्वयम्पाकाय स्थलमस्ति न वयं पतिताः येन अस्मद्गृहभोजनं भवतः पापाय कल्पेत ।

गृही कनीयान्— (भ्रातुर्घोषं श्रुत्वा बहिरागत्य ससान्त्वम्) किमेतद् भ्रातः ? कुतो महत्सु अपराध्यसि ? यैः स्वे नियमाः

परिगृहीताः तैस्ते अवश्यं परिपालनीयाः । शिष्टैः परिगृहीत एवायं परान्नवर्जननियमः । तमेष स्वामी परिपालयितुमिच्छति चेत् कुतस्तस्मै भवान् क्रुध्यति । कोऽस्माकं तेनापकर्षः ? अभ्यागता यद्यदपेक्षन्ते तत्तत् संविधाय उपचरितव्याः न तु इदं कर्तव्यमिति इत्थं कर्तव्यमिति अस्माभिर्निर्बद्धव्याः ।

स्वामिन्, क्षमतां भवान् यन्मे भ्रात्रा सहसा किञ्चिदुक्तम् । स्नात्वा द्रुतमागन्तव्यम् । सर्वं सौकर्यमत्र भविष्यति ।

---

# सुभाषितानि ॥

जन्मक्षीरपयोनिधौ सहभुवः श्रीपारिजातादयो
बिम्बं यस्य सुधामयं त्रिजगतामीशेन मूर्ध्ना धृतम् ।
यश्चासी(त् कुमुदाक)रप्रियतमस्तस्योदये केवलं
सङ्कोचः कमलस्य दुष्कृतिरियं निन्द्यो न ताराधिपः ॥ १ ॥

अनागतानामिह षट्पदौघै-
राशामुखोल्लासितसौरभाणाम् ।
कान्ताजनैर्मौलिभिरादृतानां
का हानिरेषां नवचम्पकानाम् ॥ २ ॥

निरर्थकम् जन्म गतं नलिन्या
यया न दृष्टं तुहिनांशुबिम्बम् ।
उत्पत्तिरिन्दोरपि निष्फलैव
यतो न दृष्टा नलिनी विनिद्रा ॥ ३ ॥

# पुस्तकपरामर्शः ॥

——:o:——

## संस्कृतसम्मेलनसञ्चिका ।

गुण्टूरु - संस्कृतभाषाप्रचारिणीसभा - कार्यदर्शिभ्यां साहित्यविशा-प्रवीण विद्वान् नेति सुब्बरायशास्त्री, साहित्याचार्य पिल्ललमर्रि वेङ्कटहनुमन्तरावु M. A., इत्याभ्यां सम्पाद्य प्रकाशिता ।

मूल्यम् — रू. २.

नाम्नैव ख्याप्यमानस्य महत उद्देश्यस्य निर्वर्तनाय आन्ध्रप्रदेशान्तर्गते चित्तूरु - नगरे दशाधिकेभ्यो वर्षेभ्यः पूर्वं प्रतिष्ठापिता 'संस्कृतप्रचारिणी-सभा' जनानां संस्कृतपरिचयश्रद्धावर्धनौपयिकानि विविधानि कार्याणि महता उत्साहेन कुर्वती विराजते । तस्याः तत्र तत्र वर्तमानासु बह्वीषु शाखासु गुण्टूरु - नगरस्था अन्यतमा । इयमपि स्वकार्यनिर्वर्तने अत्यन्त-मुत्साहिनी, अत्यन्तं व्यग्रा । कार्यदर्शी श्री नेति सुब्बरायशास्त्री तत्कार्य-निर्वहणे अनितरसाधारणं श्रद्धाविशेषं बिभर्ति । सेयं शाखासभा प्रपूर्वस्मिन् जयवत्सरे 'संस्कृतसम्मेलनं' किमपि महता समारोहेण प्रवर्त-यामास । तदनुबन्धितया प्रकाशितेयं बहुसंख्य संस्कृतान्ध्रविद्वल्लिखितना-नानिबन्धसङ्कलनात्मिका सञ्चिका ।

सञ्चिका रमणीयमुद्रणा, सुबद्धा, हृदयङ्गमाकारा। उपराष्ट्रपतेरारभ्य प्रायः सर्वेभ्यः भारतप्रधानपुरुषेभ्यः प्राप्तैः अभिनन्दनैः शुभाशंसनैश्च आचिता । तेषां, संस्कृताभिमानिनां अन्येषां, निबन्धकाराणां विदुषां च प्रतिकृतिभिश्चित्रिता ।

निबन्धाः सुलिखिताः संस्कृतसम्बन्धिविविधविषयप्रतिपादकाः । संस्कृतनिबन्धाः आहत्य सप्तविंशतिः । आन्ध्रनिबन्धाः एकोनविंशतिः । एतत्सञ्चिकाप्रकाशकानां संस्कृतभक्तिः तथा महती, यथा संस्कृतविश्व-परिषदः चतुर्थमधिवेशनं तिरुपतिनगरे यद्वृत्तं तत्र सीमातिलङ्घिनं प्रहर्षं प्राप्ताः तद्दिनाङ्कितं एतत्सञ्चिकाप्रकाशनमकुर्वन् ।

वर्धतां संस्कृतम् । वर्धतां ईदृशानां संस्कृतभक्तानां सङ्ख्या । सम्पद्यतां जनानां शुभा मतिः । सम्पद्यतां लोकक्षेम इत्याशास्महे ।

——

॥ श्रीः ॥

# उद्यानपत्रिका ॥

एकोनविंशवर्ष-

# ॥ विषयसूची ॥

# UDYANA PATRIKA

[XXIX Year]

## CONTENTS


1 शृङ्गारनारदीयम्। [Y. Mahalinga Sastri M.A., B.L.
1, 23, 47, 69, 89

2 वरदाभ्युदयचम्पूः। 5, 27, 51 73, 115

3 मुकुन्दमाला। 9, 31, 55, 77, 95, 119

4 प्राचीनम्। 10

5 श्रीवेङ्कटाध्वरी। 12, 87

6 वैदिका विशेषाः। [V. R. S. Tatacharya Siromani]
13, 35

7 वृद्धभाषितम्। 16, 43, 62, 83, 102, 127

8 वीरलब्धं पारितोषिकम्। [R. Ramamurti M A.]
[18, 38, 64

9 कविः महालिङ्गशास्त्री। [सं] 21

10 प्रकृतिभेदः। 22, 45, 67, 86, 107, 130

11 संस्कृतम्। 32

12 पुस्तकपरामर्शः। 46, 68, 88, 109, 132

13 नृगोपाख्यानम् । [V.R.S. Tatacharya Siromani] 60
14 विमर्शगोष्ठी । 79, 96, 120
15 श्येनकपोतोपाख्यानम् । [V. R. S. Tatacharya Siromani] 81
16 नववर्षप्रशंसा । [R. Rajagopalan M. A. Bangalore 94
17 संस्कृतपुनरुज्जीवनम् । [R. Rajogopalan M. A., Banglore.] 57, 98
18 वत्सनाभमुनिचरित्रम् । [V. R. S Tatacharya Siromani.] 100
19 धर्मतत्परता । 105
20 चाटुश्लोकाः । 110
21 उद्भ्रान्तदशाननम् । [Y. Mahalinga Sastri M. A., B. L.] 111
22 कीटोपाख्यानम् । [V. R. S. Tatacharya Siromani] 123
23 सुभाषितानि । 131
24 विषयसूची । 133
25 शास्त्रानुबन्धः ।
गीतार्थदीपः । [१३७–१८४]

Registered No. M 2300.

Book XXIX ॥ श्रीः ॥ No. 12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २९] कलि ५०५७ दुर्मुख - सिंह [ सं १२

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

AUGUST 1956

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Rs. Two only.
Do. With Sastraic Supplement Rs. 3—0—0

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं द्वे रूप्ये। सानुबन्धायाः त्रीणिरूप्याणि।

२ कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्ध-सञ्चिकाश्च प्रकाश्यन्ते।

३ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः।
(संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D.T. Tatacharya Siromani, M. O. L.
TIRUPATI.

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयः ॥

शास्त्रानुबन्धः — श्रीगीतार्थदीपः। १७७—१८४

पञ्चमी । ततस्ततः - तस्मात्तस्माच्छब्दादेः, एतत् - मनः, नियम्य - तत्तन्निमित्तयाथात्म्यनिरूपणेन आभासीकृत्य, आत्मन्येव - आत्मविषय एव; वशं नयेत् - अतिशयितसुखभावनया वशीकुर्यात् ।

மனதானது நிலையற்றது. ஆத்மாவில் நிலை நிற்காது. அது ஈடுபடும் சிற்றின்பங்களிலிருந்து அதைக் கட்டுப்படுத்தி ஆத்மாவே மேலான ஸுகமாகையால் ஆத்மாவிடத்திலேயே
வசப்படுத்தவேண்டும். 26

२५९ प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

आत्मनि वशीकरणोपायं प्रागुक्तमेवाह— योगिनं - आत्मन्यस्तमनसं, तत एव हेतोः अकल्मषम् - दग्धाशेषपापम् । तत एव शान्तरजसं - विनष्टरजोगुणम् । तत एव प्रशान्तमनसं - आत्मनि निश्चलमनसम्, तत एव ब्रह्मभूतं - स्वस्वरूपेणावस्थितम्, अणोरपि जीवस्य 'स चानन्त्याय कल्पते' इति श्रुतेः धर्मतो बृहत्त्वमस्त्येव, ब्रह्मभूतमित्यनेन देहात्मभ्रमादिप्रयुक्तक्लेशादिदशारूपाब्रह्मत्वव्यवच्छेदः, एनं - योगनिष्ठम् , उत्तमं सुखम्— आत्मस्वरूपानुभवरूपं निरतिशयं सुखम्, उपैति हि - उपगच्छति हि । 'हि' इति पूर्वश्लोकोक्तमनोवशीकरणे हेतुपरः, उत्तमसुखरूपत्वादात्मानुभवसुखस्य आत्मन्येव मनोवशीकरणं कार्यम् ।

ஆத்மாவினிடத்தில் மனதை வைப்பதனால் ஸமஸ்த பாபங்களும் தீர்ந்து அதனால் ரஜோகுணமற்று ஆத்மாவிடத்தில் நிச்சலமனம் பெற்ற யோகநிஷ்டனுக்கு நிரதிசயமான
ஆத்மாநுபவஸுகம் வருகிறது. 27

२६० युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

एवं योगप्रभावादाविर्भवत्सुखस्यात्मानुभवरूपत्वं साक्षात्कारात् पश्चान्निरतिशयत्वमनिर्वचनीयत्वमनायाससाध्यत्वं चोच्यते— एवम्— 'योगी *युञ्जति' इत्यारभ्योक्तप्रकारेण, आत्मानं युञ्जन्, आत्मानं अनु-

* गी — ६. १०

भवन्, तेनैव विगतकल्मषः - विनष्टसमस्तप्राचीनपापः, योगी, ब्रह्मसंस्पर्शं - ब्रह्मणः संस्पर्शं, संस्पर्शशब्दोऽनुभवलक्षकः - ब्रह्मानुभवरूपम्, अत्यन्तं सुखम् - अपरिमितं सुखं, सुखेन - अनायासेन, सदाऽश्नुते - सर्वदा प्राप्नोति ।

இவ்வாறாக ஆத்மாநுபவம் செய்கிற யோகியானவன் ப்ராசீனபாபமெல்லாம் கழியப் பெற்று நிரதிசயமான ப்ரஹ்மாநுபவஸுகத்தை ஸர்வகாலமும் அநுபவிக்கின்றான். 28

२६१ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

एवं योगाभ्यासविधिः प्रपञ्चितः, फलपर्यन्तत्वं चोक्तम् ; अथ चतुर्भिश्श्लोकैः चतुर्धा योगी प्रतिपाद्यते । समदर्शित्वरूपयोगविपाकस्य पर्वक्रमेण तारतम्याच्चतुष्प्रकारत्वम् । अत्र प्रथमदशोच्यते—भूतशब्दोऽचिद्विशिष्टचेतनवाचकोऽपि 'सत्यं भूतहितं प्रोक्तम्' इत्यादिष्विवात्र चेतनांशपरः । योगयुक्तात्मा - योगसमाधिगतात्मस्वरूपः, योगयुक्तात्मत्वं समदर्शनत्वे हेतुः । सर्वत्र - सर्वेष्वात्मसु, समदर्शनः - ज्ञानैकाकारतया समदर्शनवान्, आत्मानम् - स्वात्मानम्, सर्वभूतस्थं - चेतनान्तरेषु सर्वेषु स्वसाम्यसम्बन्धेन विद्यमानं, आत्मनि - स्वात्मनि, सर्वभूतानि च - साम्यसम्बन्धेन वर्तमानानि, ईक्षते- पश्यति, स्वात्ममात्रानुसन्धानरूपे योगे प्रवृत्तोऽप्ययं, एकजातीयेषु पदार्थेष्वेकव्यक्तिदर्शनेनैव स्थालीपुलाकन्यायात् तज्जातीयं सर्वमपि तथात्वेन पश्यति । 'सर्वत्र समदर्शनः' इति वचनात् सर्वभूतस्थमित्यादेरिह साम्यमेव विवक्षितम् ।

யோகநிலையானது நான்கு விதமானது. அதில் முதல் நிலையில், எல்லாவாத்மாக்களும் ஜ்ஞாநஸ்வரூபங்கள் என்பதாக தனக்கு ஸமமாக மற்றவாத்மவஸ்துவையும் அதற்கு ஸமமாக தன்னையும் பார்க்கின்றான். யோகத்தில் தன்னுடைய ஞானகாரநிலையைக் கண்டவாறே இதே நிலைதான் மற்றவாத்மாக்களுக்கும் என்று கண்டதாகின்றது. 29

२६२ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ०३ ॥

देवमनुष्यादि प्रकृतिपरिणामरूपभेदनिरसनेन ज्ञानद्रव्यतयैकरूपत्वानुसन्धानं पूर्वमुक्तम् । अथ तस्यैव योगिनो देवादिभेदहेतुभूतपुण्यपापतारतम्यविधूननेन परमात्मना परमसाम्यानुसन्धानमुच्यते । इयं प्रथमदशातोऽधिका विपाकदशा । ईदृशीं दशामापन्नः यः - योगी, सर्वत्र-मुक्तिदशायां सर्वस्यात्मवस्तुनो मत्साम्यात् स्वरूपेणावस्थिते आत्मवस्तुनि सर्वत्र, मां पश्यति - साम्यसम्बन्धेन सर्वात्मसु मां विद्यमानं अनुसन्धत्ते, सर्वं च मयि पश्यति - तुल्यन्यायेन सर्वात्मसाम्यं मयि पश्यति, अन्योन्यसाम्यादन्यतरदर्शनेनान्यदपीदृशमिति पश्यतीति यावत् । तस्य - स्वात्मस्वरूपं मत्समानं पश्यतः, अहं न प्रणश्यामि - नशिधातुरत्रादर्शनार्थकः, नादर्शनमुपयामि, तादृशत्वानुसन्धानस्य विच्छित्तिरेव अदर्शनमिह । तादृशत्वानुसन्धानविच्छित्तिर्न भवतीति यावत् । स च मे न प्रणश्यति - सर्वसाक्षात्कारिणो मम तत्साम्यात् मत्स्वरूपानुसन्धाने सर्वदा तत्स्वरूपमप्यनुसंहितं भवति । तत्साम्यानुसन्धानविरहो मम च न भवतीति भावः । 'सर्वत्र समदर्शनः' इति वचनात् 'योऽयं योगस्त्वया प्रोक्तस्साम्येन मधुसूदन' इत्यनुभाषणाच्च परमात्मना स्वस्य शुद्धावस्थायां अपहतपाप्मत्वादिभिस्साम्यदर्शनमेवेह विवक्षितम् ।

முன்கூறிய நான்கு விதமான யோகநிலையில் ஈச்வரனோடு முக்தி தசையில் தனக்கு வரப்போகும் ஸமநிலையை அநுஸந்தாநம் செய்தல் இரண்டாவது தசையாகும். தன்னை அவ்வாறாக அநுஸந்தித்தவாறே தன்னைப் போலே ஜ்ஞானாகாரமான எல்லா வாத்மவஸ்துக்களிலும் பரமாத்மாவோடு ஸாம்யம தோன்றும். பரமாத்மாவும் எல்லா சேதநர்களோடு துல்யனாய் தோன்றும். அவனுக்கு நான் மறைவதில்லை. அவனும் எனக்கு மறையமாட்டான். இருவருக்கும் பரஸ்பரம் ஸாம்யபுத்தியானது எக்காலத்திலும் நிலைநிற்கின்றது என்றவாறு. 30

२६३ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥

तृतीयां योगविपाकदशामाह— अकर्मवश्यत्वाकारेणेश्वरसाम्यदर्शनं पूर्वश्लोकोक्तम्, अत्र तु कर्मरूपाविद्यावेष्टनविरहादसङ्कुचितज्ञानाकारतया

साम्यानुसन्धानमुच्यते— सर्वभूतस्थितं - सर्वव्याप्तं मां, एकत्वं आस्थितः - असङ्कुचितज्ञानाकारतया ऐक्यं सुदृढमनुसन्दधानः, यो भजति मत्समात्मावलोकनमेव भजनमिह, स योगी सर्वथा वर्तमानोऽपि - लौकिकक्रियाव्यापृतोऽपि, मयि वर्तते - वृत्तिरत्र बुद्धिवृत्तिः, मामेव पश्यति । स्वात्मनि सर्वभूतेषु च सर्वदा मत्साम्यमेव पश्यतीति यावत् । सर्वभूतस्थितेन परमात्मना स्वस्यैकत्वानुसन्धानं नाम स्वस्यापि सर्वभूतस्थितत्वानुसन्धानम् । तच्च सर्वभूतस्थितत्वं परमात्मनः स्वरूपतः, अणोरात्मनस्तु धर्मभूतज्ञानद्वारेण मुक्तिदशायां भवति । तदानीन्तनसाम्यस्य भाविनो योगदशायामनुसन्धानात् तत्संस्कारप्रभावेन व्युत्थानकालेऽपि तथाविधानुसन्धानानुवृत्तिरिति भावः ।

மூன்றாவது யோக நிலையில் ஈச்வரனோடு தனக்குத் தோன்றும் ஸாம்யமிவ்வாறானது — அதாவது-மோக்ஷதசையில் ஏகவிகாஸம் பெறுகின்றது தன்னுடைய ஜ்ஞாநம். எல்லா வஸ்துக்களையும் அதுவிஷயமாகக் கொள்ளுகின்றது. ஈச்வரன் எல்லா வஸ்துக்களிலும வ்யாபித்திருக்குமாப் போலே தானும் முக்தி தசையில் தன்னுடைய ஜ்ஞானத்தாலே எல்லாவற்றையும் வ்யாபித்திருக்கும். எல்லாவற்றையும் வ்யாபித்திருக்குமாகாரமே தனக்குமீச்வரனுக்குமுள்ள ஐக்யம். இதை யோக தசையில் நிரந்தராநுஸந்தாநம் செய்வதால் யோகத்திலிருந்து விலகிய ஸமயங்களிலும் ஈசனோடு ஸாம்யாநுஸந்தாநம் தொடர்ந்திருக்கும்.

31

२६४ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

योगविपाककाष्ठाभूतां कर्मज्ञानतारतम्यप्रयुक्तसुखदुःखतारतम्यनिवृत्त्यनुसन्धानरूपां चतुर्थीं दशामाह— सर्वत्रात्मौपम्येनेत्यन्वयः । उपमाशब्दस्तुल्यवचनः तस्य भाव औपम्यम् । 'सर्वत्र' इति काकाक्षिन्यायेन 'समं पश्यति' इत्यत्राप्यन्वितम् । हे अर्जुन, यः— योगी, सर्वत्र आत्मौपम्येन - सर्वेषामात्मनां देहविलक्षणत्वादिना स्वसाम्येन, सुखं वा दुःखं यदि वा, पुत्रजन्मादिसुखं तन्मरणादिदुःखं वा सर्वत्र समं पश्यति असम्बन्धसाम्यात् समं अनुसन्धत्ते, परपुत्रजन्ममरणादिजे सुखदुःखे

स्वात्मनीव स्वपुत्रजन्ममरणादिजन्ये सुखदुःखे अपि स्वस्मिन् न सम्बध्नीतः इति पश्यतीति यावत् । स योगी परमो मतः - योगकाष्ठां गतो मतः, जीवात्मयोगकाष्ठेयम् । परमात्मयोगः परस्ताद्वक्ष्यते ।

'चतुर्विधसमदर्शनविपाकक्रमोऽयम् — 1) आत्मनां ज्ञानत्वानन्दत्वादिभिरन्योन्यसाम्यदर्शनम् 2) शुद्धावस्थायां अपहतपाप्मत्वादिभिरीश्वरेण साम्यदर्शनम् 3) परित्यक्तप्राकृतभेदानामसङ्कुचितज्ञानैकाकारतया ईश्वरेण, तदपृथक्सिद्धविशेषणत्वादिभिरन्योन्यं च साम्यदर्शनम् 4) औपाधिकैः पुत्रादिभिरसम्बन्धसाम्यदर्शनं चेति ।'

நான்காவது யோக தசையில், கர்மமூலங்களான புத்ராதி களோடு தமக்கு ஸம்பந்தமில்லாமையால் அவற்றின் மூலமான சுகதுக்கங்களும் தன்னிடம் ஸம்பந்தம் பெறமாட்டாது என்று அநுஸந்தானம் ஏற்படும். பிறரும் தன்னைப் போலவே ஞானாகாரராய் தனக்கு ஸமமானவர்கள். அவ்வாறே தனக்கும் பிறருக்கும் ஸுகதுக்கங்களும் ஸமமானவை. எப்படியென்றால்: பிறருக்கு ஏற்படும் ஸுகதுக்கங்கள் தன்னோடு எவ்வாறு ஸம்பந்தம் பெறமாட்டாவோ, அவ்வாறே தனக்குத் தன் புத்ரஜன்மமரணாதிகளால் சுகதுக்கங்களும் ஸம்பந்திக்க மாட்டா. பிறருடையவும் தன்னுடையவும் ஸுகதுக்கங்கள் தன்னிடம் ஸம்பந்தம் பெறாமை என்பது இரண்டிற்குமுள்ள ஸாம்யம். இந்நிலையை யடைந்தவன் உத்தமயோகி எனப் 32
படுவன்,

अर्जुन उवाच—

२६५ योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ॥ ३३ ॥

२६६ चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

एवं ज्ञानैकाकारतया, निर्दोषतया, ब्रह्मतद्गुणसम्बन्धेन, इतरासम्बन्धेन च साम्यं श्लोकचतुष्टयेनोक्तम् । योगाभ्यासविधिश्चतुर्धा योगी चोक्तः । अथ प्रागुक्तमेव योगसाधनं विशदं ज्ञातुं पुनरर्जुन उवाच - हे मधुसूदन, रजस्तमोमयप्रबलविरोधिनिरसनशील, ईदृशस्त्वमेव मनोनिग्रहोपायम् उपदिशेति हृदयम् । साम्येन - सर्वेष्वात्मसु ज्ञानैकाकारतया परस्पर-साम्येन, अकर्मवश्यतया चेश्वरसाम्येन, योऽयं योगः - चित्तवृत्तिनि-रोधरूपः त्वया प्रोक्तः - स्वतस्सर्वज्ञेन त्वयैव ह्येतदनुसन्धातुं प्रवक्तुं च शक्यमिति भावः । 'मनसः' इत्यध्याहार्यं 'चञ्चलं हि मनः' इत्युत्तर-वाक्यानुरोधात् । मनसः चञ्चलत्वात् - एकत्रावस्थापयितुमशक्यत्वात्, एतस्य - समदर्शनरूपयोगस्य, स्थिरां स्थितिम् - चिरानुवृत्तिम्, अहं न पश्यामि - अनादिभेदानुसन्धानवान् अजितचित्तश्चाहं न पश्यामि, हे कृष्ण ! हि यस्मात् मनः चञ्चलं - अत्यर्थं चलनस्वभावं, प्रमाथि-प्रमथ्नातीति प्रमाथि - प्रमथनशीलं, शरीरं इन्द्रियाणि च विक्षिपत् सत् परवशीकरोति । बलवत् - प्रबलं न केनचित् नियन्तुं शक्यम् । दृढ - अच्छेद्यम्, तस्य - एवंभूतस्य मनसः, निग्रहं - निरोधम्, वायोः निग्रहमिव - प्रतिकूलगतेर्वायोः दुर्बलेन व्यजनादिना निरोधमिव, सुदुष्करं - अत्यन्तदुस्साधम् । अहं मन्ये, अतो मनोनिग्रहोपायो वक्तव्यः इत्यभिप्रायः ।

அர்ஜுனன் சொன்னான்— ராஜஸனும் தாமஸனுமான மது என்னும் அஸுரனை ஸம்ஹாரம் செய்தருளினீரன்றோ தேவரீர்! மனஸ்ஸை நிக்ரஹம் செய்யுமுபாயத்தையும் உபதேசித்தருளவேணும். நான்கு விதமாய் ஸமதர்சநயோகம் அருளினீர். மனது சஞ்சலமாகையால் இந்த யோகமானது என் ஹ்ருதயத்தில் ப்ரதிஷ்டிதமாகுமென்று தோன்றவில்லை. ஏனென்றால், மனதானது மிகவும் சஞ்சலம்; சரீரத்தையும் இந்த்ரியங்களையும் தன் வசமாக்கிக்கொள்ளுகிறது. யாராலும் கட்டுப்படுத்த வியலாத பலம் பெற்றது. இதர விஷயங்களிலேயே த்ருடமாய் ஈடுபடுகிறது. மஹா வாயுவை எதிர்த்துத் தடுப்பதுபோன்றதே மனதைக் கட்டுப்படுத்துவதும் என்பதாக நான் எண்ணுகின்றேன். மனதையடக்குமுபாயத்தை யருளவேணும். 33-34

श्री भगवानुवाच—

२६७ असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥

२६८ असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

अथार्जुनेन कण्ठोक्तमनुवदन् बुभुत्सितं मनोनिग्रहोपायं श्लोकद्वयेनाह भगवान् असंशयमित्येतत् सत्यमितिवदर्धाङ्गीकारपरम् । हे महाबाहो ! कौन्तेय ! मनः चलं, अत एव दुर्निग्रहं इति असंशयं - नात्र संशयः, 'तु' शब्देन विशेषो द्योत्यते - किन्तु अभ्यासेन - अभ्यासो नाम चित्तभूमौ कस्याञ्चित् चित्तस्य समानप्रत्ययाऽऽवृत्तिः । आत्मनो ज्ञानत्वानन्दत्वनित्यत्वादिगुणाकरत्वस्यासकृदनुसन्धानेन, वैराग्येण च - वैराग्यं नाम दृष्टादृष्टेषु भोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यम्, तेन च, गृह्यते - (मनो) निगृह्यते, अयं मनसो निग्रहोपायः । असंयतात्मना - अभ्यासवैराग्याभ्यां असंयतः - अजितः, आत्मा - अन्तःकरणं, यस्य तेन, योगः दुष्प्रापः - दुःखसंप्राप्यः, इति मे मतिः । उपायतः - पूर्वोक्तेन मदाराधनरूपेणान्तर्गतज्ञानेन कर्मणा, उक्तलक्षणं कर्ममात्रं मनोनिग्रहोपायः अभ्यासवैराग्ये तु तदङ्गतयोक्ते । वश्यात्मना - जितमनसा, यतता तु - भूयोऽपि प्रयत्नं कुर्वता तु, योग इत्यनुषज्यते योगः अवाप्तुं शक्यः ।

ஸ்ரீ பகவான் அருளியதாவது— அர்ஜுனா ! மனது சஞ்சலமாகையால் அடக்கமுடியாதென்பதில் ஸந்தேகமில்லை. ஆனால் ஆத்மாவை ஜ்ஞானானந்தம் முதலிய குணங்களுக்கு ஆச்ரயமாய் அடிக்கடி அநுஸந்தானம் செய்தும் சிற்றின்பங்களிலுள்ள தோஷங்களைக்கண்டு அவற்றில் ஆசையைத் தவிர்த்தும் மனதை ஆத்மாவிடம் கட்டுப்படுத்தலாகும். மனதை அடக்காதவன் யோகம் அநுஷ்டிக்கவியலாதென்று என்னுடைய அபிப்ராயம். பலங்களில் நோக்கம் கொள்ளாமல் பகவதாராதனரூபங்களான கர்மாநுஷ்டானங்களாகிற உபாயத்தினால் மனதை ஜயித்தல் கூடும். அவ்வதிகாரியின் முயற்சியால் யோகமானது அநுஷ்டிக்கமுடியும். 35-36

अर्जुन उवाच—

२६९ अयतिश्श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७ ॥

२७० कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

२७१ एतं मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः।
त्वदन्यस्संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

एवं प्रागुक्तमेव योगसाधनं यथावच्छ्रुतम्, अथ 'नेहाभिक्रमनाशोऽस्ति' इत्यादिना प्रागुक्तमेव योगमाहात्म्यं श्रोतव्यं सर्वप्रकारान्वितं प्रपञ्चेन श्रोतुं पृच्छति। आत्मावलोकनरूपयोगहेतुभूतस्य कर्मयोगस्य माहात्म्यं प्रागुक्तम्, तेन तत्फलभूतयोगमाहात्म्यमेवोक्तं भवति। हे कृष्ण, श्रद्धया - आस्तिक्यबुद्ध्या, उपेतः - योगाधिगमवान्, अयतिः - दृढतराभ्यासरूपयतनविकलः, योगसंसिद्धिं अप्राप्य - योगसिद्धेः पूर्वमेव योगात् चलितमानसः - पुष्कलयोगं कर्तुमननुगुणचित्तः, कां गतिं - कामभोगमोक्षनिरयेषु कतमां गच्छति।

हे महाबाहो - छिन्नाभ्रमिव - पूर्वस्माद्बृहतो मेघाच्छिन्नः मेघशकल इव, स यथा पूर्वं बृहन्तं मेघं, परं बृहन्तं च मेघं अप्राप्य उभयविभ्रष्टो मध्ये विनष्टो भवति तथैवायमपि अप्रतिष्ठः - निराश्रयः, सांसारिकफलसाधनकर्मात्मकप्रतिष्ठारहित इति यावत्, फलाभिसन्धिरहितस्यास्य स्वर्गादिफलसाधनं कर्म प्रतिष्ठा न भवतीत्यप्रतिष्ठः, ब्रह्मणः पथि ब्रह्मप्राप्त्युपायभूते योगे, विमूढः - तस्मात्पथः प्रच्युतः अतः उभयविभ्रष्टः - सांसारिकफलात् ब्रह्मप्राप्तेश्चोभयस्मात् प्रच्युतः, न नश्यति कच्चित् - न नश्यति किम्?

हे कृष्ण, एतं संशयं, अशेषतः, छेत्तुमर्हसि, त्वदन्यः स्वतस्सर्वज्ञात्त्वत्तोऽन्यः, संशयस्यास्य छेत्ता, न ह्युपपद्यते - युक्तिविरोधोऽभिप्रेतः त्वदन्येषां ज्ञानं हि करणाधीनम्, अविशदम्, क्रमभावि, कतिपयविषयं कादाचित्कञ्च, अतस्त्वदन्येषां संशयच्छेत्तृत्वं नोपपद्यते हि।

VERIFIED 1985

VERIFIED 1989

VERIFIED-2001

Acc. No. 995

Call No. 178/29

Author

Title The Udyana Patrika